


संस्कृत कोशवाङ्मयम्

सामान्यपरिचयः

प्रथमो भागः

— केशव शर्मा



पञ्चाननग्रन्थमालायाः प्रथमं पुष्पम

By

संस्कृतकोशवाङ्मयम्

प्रथमो भागः

केशव शर्मा, शास्त्री, साहित्यरत्नम्, एम. ए., एम. फिल



संस्कृत शोध संस्थानम्
भारती विहार, मशोवरा, शिमला-७
हिमाचल प्रदेश

The Ist. flower of Panchanana Granthmala

SANSKRIT LEXICONS

PART I

Publisher

Prof. K. Sharma,
Hony. Secretary,

Sanskrit Research Institute
Bharti Vihar Mashobra, Simla-7

Printer

The Manager,
Bharati Mudranalaya,
Bharati Vihar, Mashobra, Simla-7
Himachal Pradesh.

याभ्यां स्वकम् निखिलमेव हि जीवनं तत्
प्रीत्या हुतं सुरगिरस्तु प्रसारयज्ञे ।
रत्नादिवाकरपदाम्बुजरेणुपुञ्जे
भृङ्गायतां कृतिरियं किल केशवस्य ॥

Ist. Edition, 1976, Vikram Samvat 2033

Rs. 25/-



Editor's note

The lexicons have an important place in Sanskrit - literature and traditional education of our nation. These are most ancient in the world and have influenced the universal lexicography. Their role is vital in the field of multy-linguistic India's unity. However, there is a very little material which can provide some detailed informations regarding the subject.

The lexicography in these days has advanced in various directions. Here, an effort has been made to collect the facts regarding Sanskrit lexicografers from yaska to Amar Singh, and short discriptions have also been given about various branches of the modern dictionary in this book. Its IInd part is also being prepared. The Sanskrit Shodh Sansthan is bringing out its publications under various granthmalas. This is the Ist. flower of Panchananagranth mala and I am extremely happy offering this little flower to the Sanskrit world.

K. Sharma

प्रास्ताविकम्

संस्कृतसाहित्ये विशेषतश्च संस्कृतस्य पारम्परिकशिक्षाक्षेत्रे कोशाणाँ विशिष्टमहत्वमासीत् । विश्वस्य कस्या अपि भाषाया अपेक्षया संस्कृतकोशा :- निसन्देहं प्राचीनतमाः । ससारस्य सर्वासु भाषासु कोशनिर्माणम् सस्कृतकोशाणाँ निर्माणानन्तरमेव जातम् । अतः विश्व-कोशकला यथाकथञ्चित् संस्कृतकोशप्रभाविता । सस्कृतवाङ्मयस्य ज्ञानं कोशकुञ्चिकायत्तम् । आधुतिकभारतस्याखण्डतारक्षासाधनभूतास्तथा च निखिले संसारे भारतीयभाषाप्रभावप्रदर्शका संस्कृतकोशाः कथमप्यु–पेक्षणीया न सन्ति ।

इदानीं कोशकला नितान्त विकसिता । संस्कृतकोशैश्च समाजस्य तत्तत्कालीनावश्यकता सर्वदा प्रपूरिता । इति सर्वं विचार्यानुभूय च निघण्टुकालतोऽमरसिंह यावत् विषयोऽयं किञ्चित् सम्बद्ध–सामयिक-सामग्रीसकलनपूर्वकम् संस्कृतसंसारस्याग्रे संस्थाप्यते । वैज्ञानिकदृष्टया अत्रानेकास्त्रुटयो विद्यन्ते । तथापि विद्यावयोवृद्धा विद्वांसो माम् प्रोत्साह–यिष्यन्ति, इति विश्वसिमि ।


— केशव शर्मा

संकेतिका

सामान्यपरिचयः

संस्कृत कोशाः

संस्कृतकोशाणामितिवृत्तम्





संस्कृतकोशवाङ्मयम्

समान्यपरिचयः

ज्ञानविज्ञानेऽनुसन्धानाधारे :-

पाञ्चभौतिकं हि चराचरात्मकमिदं निखिलं जगत् । अद्यतनोऽयं संसारो विज्ञानमयोऽस्ति सञ्जात इति–आधुनिकानां मतम् । परम् विज्ञानशब्दो नास्ति नूत्नः । प्राचीनकालादस्माभिरस्य प्रयोगो विधीयते । भारतीये दर्शनसाहित्ये पञ्चकोशवर्णनावसरे विज्ञानमयकोषोऽन्तिमः । वेदेषूपनिषत्स्वपि चास्य प्रयोगः । एवञ्चाद्य यस्य विज्ञानस्योन्नतिर्दृश्यते तद् भौतिकविज्ञाननाम्नैव कथयितुं शक्यते । परमस्माकं भारतीयानां दृष्टिरत्र भिन्ना । वयं विज्ञानमुभयविधम् स्वीकुर्मः । भौतिकमाध्यात्मिकञ्च । भारतीया आसृष्टिकालादेव-अनुसन्धानपराः (1) विज्ञाने च बद्धादराः । परमस्माकमनुसन्धानम् यत्र पाञ्चभौतिकविषयसम्बद्धं भवति तत्रैवाध्यात्मिकमचिन्तनीयम् रहस्यपूर्णमपि च शक्तिजातं नास्माभिरुपेक्षितुं शक्यते ।

अस्मिन्नेव प्रसङ्गे नैतदप्रासङ्गिकम् भवेत्-यत्-नवीनवैज्ञानिकगवेषकाणाञ्चा–

---

(1) परम् ब्रह्मानुसन्दध्यात् । नृसिंहोत्तर तापिन्युप० १,६ (पङ्क्तिः)

भिमतमिदमस्ति समुल्लेखनीय यत्ते केवलं भाषाविज्ञानं किमपि नवीनविषयमश्रुतपूर्वं च कथयन्ति स्म। परं विद्वांसस्तावत् पर्यन्तं भाषाणां वैज्ञानिकानुसन्धानम् कर्तुं शक्ता न बभूवुर्यावत्तो संस्कृतस्य शरणम् न प्रापुः * अत्र व्याकरणस्य कोशवाङ्मयस्य च परमः सहयोगः। संस्कृतविद्वांसश्चचोभयविधज्ञानमेवाध्यात्मिकम्भौतिकञ्चानुसन्धानमूलमाहुः।

कोशव्याकरणयोरुभयोरेव पारस्परिकसम्बन्धः परमो घनिष्ठः। पुरा-अवैय्याकरणोऽन्धः कोशज्ञानविहीनश्च बधिरः कथ्यते स्म (1) व्याकरणेन किं साधुः किञ्चासाधुरिति विविच्यते (2) आंग्लभाषा-शास्त्रा स्त्रीटः व्याकरणम् सामान्यतथ्यप्रतिपादक कोशञ्च विशिष्टतथ्य प्रतिपादकम्-मनुते (3) किमपि स्यात् परमुभयोरेवानयोरध्ययनाध्यापने सहैव भवतः स्म। व्याकरणशास्त्रप्रवक्तारः स्वरोत्पत्तिं वायु-अग्नि-संयोगेन स्वीकुर्वन्ति (4)। परमियमुत्पत्तिरपि न केवलम् भौतिकी। अस्याः कारणं आत्मा ईश्वरो वा। भौतिकाध्यात्मिकशब्दयोः कृते एव ज्ञानविज्ञानशब्दप्रयोगो भवति स्म। भारतीयानुसन्धानस्यैषा एव सन्तुलिता प्रणालिः परम्परा वा।

पाश्चात्या :— वैज्ञानिका अपि-अनया विचारधारया नूनमेव प्रभाविताः प्रतीयन्ते। आणविकशक्तेः पुनरनुसन्धाताऽणुबमस्य च गवेषको महावैज्ञानिकोऽमेरिकादेशीयः श्री आईन्स्टाइनः यदाऽस्याणुबमस्य प्रयागप्रतिक्रियां विचारयामास तु तत्क्षणमेवासौ स्वयमनुभूतवान् यदियं महती सांहारिकी शक्तिः। असौ लिखति यत्— "यदाहम्-अणुबमस्य प्रयोगफलं ज्ञातवान् तदा सहसैव गीतायाः श्लोकोऽय मामकीनं स्मृतिपथमायातो यत्"—

"कालोऽस्मि लोकक्षयकृत्प्रवृद्धः
लोकान् - समाहर्तुमिह प्रवृत्तः।" (गी. श्लो. ३२ अ. ११)

कोशाधारः

मूलतः कोशाणामाधारः स्वराः वर्णाश्च सन्ति। तदनन्तरञ्च शब्दस्तोमः। अत एव प्रथमं वाक्समाम्नायाध्ययनम् विधाय ततोऽनन्तरञ्च स्वर-वर्णोत्पत्ति-भेदादिकं सम्यक् सुपरीक्ष्य स्वरवर्णशक्तिञ्चाप्यनुमाय शब्द - शब्दार्थमहिमाविवेचनपुरस्सरम् कोशादिविषये सम्यक्तया सुविचारयितुं शक्यते। अतो नु खलु सर्वप्रथमं वाक्समाम्नायो व्याख्यायते ऽधस्तात्।

---

* एशियाटिक सोसायटी आफ बंगालस्य यशस्वी प्रधान - विलियम जोन्सानुसारम्।

(1) अवैय्याकरणस्त्वन्धो बधिरो कोशवर्जितः। (लोकोक्तिः)

(2) साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः। (वाक्यपदीयः)

(3) आटो जेस्पर्सनः The philosophy of Grammar. P. 31-33

(4) आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्। पा. शि. ६।७।

सामान्यपरिचयः

अथ वाक्समाम्नायः, अक्षरो वर्णो वा

परमात्मसिसृक्षानुरोधेन समुपलब्धविग्रहमिदं स्थावरकीटपतङ्गकृमि-पशु-पक्षि-मानव-संहतिततम् चराचरम् विश्वम् शब्दस्यासत्वे सम्भूतिं स्थितिं व्यवहारञ्च कच्चिदश्नुवीत न वेति निर्णेतुं न कल्पेत। तदेतदखिलं जगत् शब्दाधीनमिति विदुषामतिगोचरमस्योपरि चाग्रे विशेषतो विनिवेदयिष्यते। यदि शब्दो न स्यात् तर्हि कीदृग् जगतः स्थितिः स्यादिति कल्पनाकोटिसङ्घातसान्निध्येऽपि कल्पयितुम् न पार्येत। एतदेवाभिप्रेत्य श्रुत्या "देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्ज्जं दुहाना धेनुर्वाग् – अस्मानुपसुष्टुतैतु" इत्यत्र भगवत्या देव्या वाचोऽन्नबलदातृत्वसमर्थनपूर्वकं धेनुत्वेन सकलकामधुक्त्वं प्रतिपाद्यते।

सैषा दैवी मानुषी च वाङ् निखिलं जगदिदमभिव्याप्य विद्योतते शब्दरूपा। सोऽयं शब्दो वर्णसङ्घातरूपः। वर्णसंघातः शब्दस्य शरीरम्। वर्णश्चाक्षरपर्यायः। शब्दब्रह्मरूपेण सर्वत्र शास्त्रेषु परिगणितः। स चायं वर्णोऽखिलस्य वाङ्मयस्य मूलमिति निश्चप्रचम्।

वर्णानां रूपवर्णदेवतागोत्रच्छन्दांसि

वर्णाः सर्वप्रथममुदात्तानुदात्तस्वरिताः। तेषां वर्णः क्रमशः शुक्लः, लौहितः श्यामश्च। उदात्तानामग्निर्देवता। अनुदात्तानां सोमदेवता। स्वरितानाञ्च सूर्योऽस्ति देवः। एते हि क्रमशः भारद्वाजगौतमगार्ग्यगोत्रीयाः। छन्दांसि चैतेषां गायत्री-त्रिष्टुब्जगत्यादीनि इत्थं किल छन्दः शास्त्रे प्रतिपादितम्। एवमेवोदात्तो निषादगान्धारस्वरवान्, अनुदात्तऋषभधैवतस्वरयुक्तः। स्वरितश्च षड्जमध्यमपञ्चमः संयुक्तः। सामगानं किल इमामेव सरणिमनुसरति। उदात्तानुदात्तस्वरितादिभेदसम्पन्नाः स्वरास्तु प्रायेण शुक्लस्वरूपाः नानादेवताकाश्च। स्पर्शाः कृष्णाः। कण्ठ्या आग्नेयाः। जीह्वामूलीयौ नैऋतौ। तालव्याः सौम्याः। मूर्धन्याः वायवीयाः दन्त्या रौद्राः। औष्ठ्या आश्विनाः। शेष इव वैश्वदेवा इत्थम् किल वर्णानाँ देवतावर्णनम्। अन्यत्र च कादिमान्तानां शनिः, अग्निरन्तस्थानाम्, उष्मणाञ्चादित्य इति प्रतिपादितम्। अन्तस्थाः कपिलाः, उष्माणोऽरुणाः, यमाः नीलाः। नासिक्याः हरिताः। अनुस्वारः पीतः। जिह्वामूलीयो रक्तः उपध्मानीयः पीतः। विसर्गः श्वेतः। रङ्गः शबलः अनुनासिकश्चातिनील इति वर्णानाँ वर्ण-देवता–स्वरूप-गोत्र-जाति-छन्दःस्वरादि-विचारो याज्ञवल्क्यनारदपाणिन्यादिशिक्षाग्रन्थेषु छन्दो ग्रन्थेषु च वैशद्येन व्याख्यातः।

वर्णानामुत्पत्तिः

प्राकृतप्रलये ग्रस्तसमस्तप्रपञ्चा माया स्वप्रतिष्ठे निष्कले परशिवाख्ये ब्रह्मणि विलीना यावदवशिष्टकर्मपरिपाकम् तिष्ठति। ततश्च पृथिव्या अप्सु, अपां तेजसि,

तेजसो वायौ वायोराकाशे, आकाशस्य च—अव्यक्तपदवाच्यायां मायायां प्रलयः। (1) ततश्छान्दोग्य - एतरेय - तैत्तरीयमुण्डक-प्रपञ्चसारानुसारम् गीतमहिमा परमेश्वरः कर्मणां सम्यक् परिपाके सञ्जाते सति ईक्षणकामतपो विचिकीर्षादिशब्दाभिधेया-मव्यक्तरूपां मायामाश्रित्य जगदङ्कुराकारम् कुण्डल्यधिष्ठितम् विन्दुमुत्पादयति। स बिन्दुरचिदंशत्वेन स्थूलः, चिदचिदंशत्वेन सूक्ष्मः, केवल—चिदंशत्वेन परः, इति त्रैविध्यमावहन्—

"बिन्दोस्तस्माद् भिद्यमानाद् रवोऽव्यक्तात्मको भवेत्
स रवः श्रुतिसम्पन्नः शब्दब्रह्मेति गीयते ॥"

इति तृतीयश्चिदंशरूपः परमात्मपदवाच्यः शब्दब्रह्मापरपर्यायो रवो नादो वा सर्वभूतानां कुण्डलिनीमाश्रितः सन् विराजते।

"देहेऽपि मूलाधारेऽस्मिन् समुद्यति समीरणः" इति कुण्डल्युत्थितसंस्कृत-पवनेनाभिव्यज्यमानं विन्दुरूपं ब्रह्म परा वागिति सञ्ज्ञां भजति। ततो नाभिं यावदा-गच्छता वायुना विमर्शरूपेण मनोयोगं वहन् पश्यन्ती वाग् इत्युच्यते। ततश्च हृदयं यावदाव्रजन्-अनिलो विशेषस्पन्दरूपो मध्यमा वाग् इति व्यवह्रियते। ततश्च स्थान प्रयत्नभेदेन प्रवर्तमानः स एव विन्दुः पर-श्रवण-योग्या वैखरी वाग्-इति निर्दिश्यते कोविदैः। सोऽयमव्यक्ताद् समुत्पन्नो रवः क्रमेण व्यवहारयोग्यतामापन्नो रवनाद-वर्णमातृकादिविशिष्टसञ्ज्ञाभाक् निखिलस्य जगतो मूलस्तम्भतामुपगतो येनेदं चराचरं विश्वमभिव्याप्तं विलसति।

वर्णानां भेदाः

मातृका—शब्दस्यैवापरः पर्यायोऽयं "वर्णः"। तन्त्रशास्त्रविदोऽपि सम्यङ् जानन्ति यत् स्थूलवर्णं मन्दाधिकारिणा, सूक्ष्मो मध्यमारूपो मध्यमसाधकेन सूक्ष्मतरश्च पश्यन्तीरूप उत्तमाधिकारिणा साधकेन प्रयुज्यते। एवं खलु मन्त्रशास्त्र-निर्दिष्टानां सबीजानां मन्त्राणामुच्चारणे सम्प्रदायविदो मध्यमापश्यन्तीचारिणः स्थितप्रज्ञायोगवित्तमा एव प्रभवो नान्ये श्रुतशीलसम्पन्ना अप्यसम्प्रदायविदो महाविद्वांसः। आसां मातृकाणां सबिन्दुका, सविसर्गा, सोभया केवलेति भेदचतुष्ट-यम्। तत्र सबिन्दुकानां सविसर्गाणाञ्चोच्चारः समस्तजनगोचरः किन्त्वेक-काला-

---

(1) तदैक्षत बहु स्यां प्रजायेय। (छान्दोग्ये)
स ऐक्षत लोकानुत्सृजै। (ऐतरेये)
सोऽकामयत बहु स्यां प्रजायेय। (तैत्तरीये)
तपसाऽचीयत ब्रह्म। (मुण्डके)
विचिकीर्षुर्घनीभूता क्वचिदभ्येति विन्दुताम्। (प्रपञ्चसारे)

वच्छेदेनानुस्वारविसर्गयोः सममुच्चारम् तान्त्रिकाः कथं सम्पादयन्तीत्यस्मिन् विषये त एव प्रमाणम् । केवलास्तु सर्वजनसमुच्चारणसुलभाः ।

तत्र भगवता पाणिनिना अकारेकारोकारऋकारा ह्रस्वदीर्घप्लुतभेदेन द्वादश, लृकारो ह्रस्वः केवलः, एकारैकारौकारौकाराश्च दीर्घप्लुतभेदेनाष्ट, इत्याहृत्य स्वराणामेकविंशतिः शिक्षायामुपवर्णिताः । कादिमान्ताः पञ्चविंशतिः स्पर्शाः, यादि हान्ताश्चाष्टौ, यमाश्चत्वारः अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः, दुःस्पृष्टः प्लुतो लृकारः, अनुस्वारश्च दीर्घाः, इत्याहृत्य चतुःषष्ठि वर्णानां परिगणनं कृतम् ।

तन्त्रशास्त्रेऽकारादिविसर्गान्ताः षोडश. तत्र प्लुताः परित्यक्ताः, क्षकारः- एकः, अन्येषां मते लकारोऽपीति पञ्चाशत् एकपञ्चाशत् · वा मातृका निरुक्ताः । तत्रैकपञ्चाशन्मातृकापक्षे सङ्गृह्यमाणो लकारः ऋग्वेदे तन्त्रशास्त्रेषु च दृष्टिपथमवतरति । तद्राहित्ये पञ्चाशन्मातृकाः । एवमनुस्वारस्य मकारनकारस्थानीयत्वेन, विसर्गस्य च रेफसकारस्थानीयत्वेन तन्त्रशास्त्रस्वीकृतयोः अं अः इत्यनयोः स्वातन्त्र्येण स्वरत्वमनुपपन्नमिति कृत्वा चतुर्दशस्वराः । तत्रापि दीर्घस्य लृकारस्य तन्त्रेष्वेव दृश्यमानत्वात् सोऽप्यपहीयत इति स्वराणां त्रयोदशत्वं समुपपन्नम् । व्यञ्जनेषु लकारस्य क्वाचित्कत्वात् क्षकार–ज्ञकारयोः कषयोगेन जञ-योगेन च निष्पन्नत्वात् तेषां त्रयाणामपगमे व्यञ्जनानि कादि हान्तानि त्रयस्त्रिंशत् समेषां वैय्याकरणानां सम्मतानि विवादविषयाणि ।

स्वरेषु पुनः पाणिनिपरिगणितैकविंशति संख्यातो यथा तान्त्रिकैः प्लुतपरित्यागः सम्पादितस्तद्वत् ततोऽपि मूलभूतस्वरमात्रपरिगणनमुद्दिश्य नव स्वरा वैय्याकरणैः समादृता इति सम्भूय व्यञ्जनयोगेन द्विचत्वारिंशदेव मातृका इति समायाति । दीर्घप्लुतयोर्मात्रा—विवृद्ध्या अकारादिस्वरूपत्वमेव न स्वातन्त्र्येण स्वरत्वमिति सुस्पष्टम् । पञ्चमे परे वर्गगत— वर्णचतुष्टयस्याम्रेडि म् स्वरूपम् यमपदवाच्यमिति तेषां वर्णत्वं पराधीनम् । जिह्वामूलीयोपध्मानीययोः कखयोः पफयोश्च सापेक्षत्वात्—विसर्गस्य रूपान्तरमेव तत्, न स्वातन्त्र्येण वर्णत्वमिति चतुर्दशसूत्राणि पुरस्कृत्य प्रवर्तमानेन भगवता पाणिनिना मूलाक्षरत्वेन द्विचत्वारिंशद् वर्णाः एव स्वीकृता इति सुविदितचरं विदुषाम् ।(1) शिक्षायां या चतुष्षष्टिः परिगणिता सा तु वर्णप्रस्तारमनुरुध्य न पारमार्थ्येन, इति मातृकाभेदो यथायथम् सुनिरूपितः । अस्य वर्णप्रपञ्चस्य महात्म्यं तादृशम् सुदृढकोमल - रज्जुपरिवेष्टितम् यथा समस्तजगत्येतद् द्विचत्वारिंशद्—वर्णभिन्नम् लकारवर्जम् संयुक्तवर्णं विहाय स्वातन्त्र्येण लिख्यमानमुच्यमानम् वाऽन्यदक्षरम् दृष्टिविषयं नापततीति कियद्गौरवं भगवतः पाणिनेः हकारस्तु प्रयोजनविशेषमनुरुध्य द्विरुक्त इति न स संख्यां भिनत्ति ।

---

(1) त्रिषष्टिश्चतुःषष्टि र्वा वर्णाः शम्भुमते मताः । पाणिनि शिक्षा पृ. १. श्लो. २

नादः

"तत्र विद्युल्लताकारा कुण्डली परदेवता ।
सुप्ताहिभोगसदृशाकृतिर्जीव - समाश्रिता ॥

हंसः प्राणाश्रयो नित्यं प्राणो नाड़ी पथाश्रयः ।
आधारादुद्गतो वायुर्यथावत् सर्वदेहिनाम् ॥"

देहं सम्व्याप्य नाडीभिः प्रयाणं कुरुते बहिः ।
अगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने ॥

नासारन्ध्रे मध्यमाभ्यामन्याभिर्वदनं दृढम् ।
वद्ध्वात्मप्राणमनसामेकत्वं समनुस्मरन् ॥
धारयेन्मारुतं सम्यग् योगोऽयं योगि-बल्लभः ?

इत्याद्युपक्रम्य योगशास्त्रेऽभ्यास-वशात् जायमानो नादो मत्तमृगाङ्गनागीत-सदृशः वशिकास्यानिलापूर्णः, वंशध्वनिसमः घण्टारव-समः, मेघध्वनि समश्चेति मूलाधाराज्जायमानस्य नादस्य स्फोटापरपर्यायवाच्यस्य पञ्चविधत्वम् सुप्रतिष्ठापितम् स एवायं नादः प्रथमं बिन्दुरूपतां धारयन् । क्रमेणोर्ध्वगः सन् विभिन्नान् वर्णान्-अव्याहत व्यनक्ति । वर्णयन्ति च प्राञ्चश्चतुर्दशसूत्राणां ताण्डवनृत्यकालिकशिव प्रवर्तितडमरु-नादात् समुत्पत्तिमिति नाद एव जगतो मूलम् ।

अक्षर-समाम्नाये

योऽयमक्षरसमाम्नायो भगवता पाणिनिना चतुर्दशसूत्रैरनूदितस्तत्र सम्प्रदायानुसारं—अकाराद्यौकारान्तस्वरनिर्देशे न कश्चिद् विवादः । परन्तु सम्प्रदायविदः परम्परया कादिमान्तान् स्पर्शानादौ ततो यरलवानन्तस्थान्, अनन्तरञ्च शषसहानूष्मणश्च पठन्ति, स एव क्रमः स्थान—प्रयत्नादिविवेके प्राचीनैराधुनिकैश्च वैय्याकरणैः समादृतः । तत्र परम्पराप्राप्तममुं क्रमं दूरीकृत्य हकारमादौ निरुच्य ततो यवरला अन्तस्थाः पठिताः, अत्रापि यरलवाः इति क्रममपहाय यवरलपाठे किञ्चिद विशिष्टमुद्देश्यं भवितुमर्हति । तदनु वर्गपञ्चमा अनुनासिका अपि ङजणनम इति सरणिमपाकृत्य ञमङणन-क्रमेण निर्दिष्टाः, पश्चाद् वर्गचतुर्था अपि सप्तमसूत्र-निर्दिष्टक्रमानुरोधेन अष्टमनवमसूत्राभ्यामुपात्ताः । पुनश्च दशमसूत्रे वर्गतृतीया जवगड़दा अपि सप्तमसूत्रपद्धतिमनुयान्ति, एकादशसूत्रे तु खफछठथा वर्गद्वितीयाः सप्तमसूत्रक्रमम् परित्यज्य भिन्नक्रमेण पुनः स्थापिताः । एकादशद्वादशसूत्रयोः पुनश्च तटकपानां परिगणनं सप्तमैकादशसूत्रतोऽपि कञ्चिद् विलक्षणम् क्रममावहति । त्रयोदशसूत्रे तु प्राचीनसम्प्रदायः शषसानां पाठेन समादृतः । इति महद् वैलक्षण्यम् च सहृदयानां गवेषकाणां चेतस्याविर्भवति । चतुर्दशसत्रे पुनरुपात्तो हकारः प्रयोजनवै-

शिष्ट्यमनुभाव्य प्रवर्तते । इति प्राचीनसम्प्रदायमपगमय्य वर्णनिवेशे भगवतः पाणिनेः किञ्चिद् विशिष्ठमुद्देश्यं स्यादेवेति मन्यामहे (1)

तत्रादौ वैदिक–लौकिक-संस्कृत-वाङ्मयरूपमहाप्रासादनिर्माण-आधार शिलास्थानीयत्वेन समग्रं साहित्यमावर्ज्य प्रवर्तमानो वर्णविनिवेशे ऽद्भुतमप्रतिमं त्रिकालाबाधितं गौरवमासादयन् हादिदान्तान् विंशतिसंख्याकान् घोषान् वर्णान् हश्प्रत्याहार-मञ्जूषायामलङ्कारवद् विनिक्षिप्यानेकभूमिकम् महाप्रासादम् समुपबृंहयति तदनु खादि सान्तान् त्रयोदशाघोषानेकतः खर प्रत्याहारत्वेनाकलय्य रचना –विशेषचातुरीं प्रादुष्करोति ।

वर्णविशेषनिवेशनम्

विभिन्नप्रमाणैः सम्यक्तयेदमेव सिद्ध्यति यत् वर्णविपर्यये प्रत्याहाररचनैव किल प्रधानं कारणम् (2) । विभिन्न ग्रन्थानामालोडनेन च ज्ञायते यदकारः परमात्मनः स्वरूपम् (3) । आकाशस्य बीजं हकारः, आकाशात् शब्दसमुत्पत्तिः एवमकार-हकारयोर्योगेन अहम् इति सञ्ज्ञयाऽकारादि हान्ताः सर्वे वर्णा अक्षर ब्रह्मरूपपरमात्म स्वरूप प्रतिपादका एवेति सिद्ध्यति, यैरिदं चराचरं जगत् सकलं वाङ्मयञ्चाधिष्ठितम् । एतदेव चान्यत्र ग्रन्थेषु-अपि प्रति पादितम् (4) ।

अत्र हि परमात्मस्वरूपे स्वरक्रमवर्णनमित्थम् :–अकारो निर्गुण ब्रह्मवाचकः । इकारश्चित्कला मायाशक्तिः, उकारो व्यापकः सगुण ईश्वरः । ऋकारः परमेश्वरः लृकारो मनोवृत्या चराचरजगज्जनकः । एकारो मायायुक्त ईश्वरः । ओकारो निर्गुणसगुणब्रह्मरूपनिदर्शकः । ऐकारो जगद्विस्तारयिता शक्तियुक्त ईश्वरः औकारश्च जगत्समुपबृंहकः परमेश्वर :–इति स्वराणां निवेशः परमात्मनः शब्दमयम् वपुः प्रकटयति ।

---

(1) अइउण् । २. ऋलृक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । ६, लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् ।
(सिद्धा त कौमुदी पृ. १.)

(2) महादेवो मुनीन्द्रेभ्यो मातृकामो संजगौ ।
पौर्वापर्यं परित्यज्य प्रत्याहार—प्रवृत्तये ।।
सर्वथा सापि नो त्यक्ता चोः कुरित्यादिदर्शनात् । (व्याकरणग्रन्थेषु)
तेनाक्षर—समाम्नायमसृजद् भगवान्—अजः (श्री मद्भागवते)

(3) अकारः सर्ववर्णाग्र्यः प्रकाशः, परमात्मनः आद्यमन्त्येन संयोगात्–अहमित्येव जायते । "सुरभारती" बटोदर स. म. प. वार्षिकांकः सम्वत् २०२५। पृ. ४२
अक्षराणामकारोऽस्मि । गीता अ. १० श्लोक ३३

(4) एष जीवो बिवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ।। (श्री मद्भागवते)

अथ च व्यञ्जनाभिनिवेश इत्थम्:—हयवरलानां क्रमे किञ्चिद् विचार्यते। सृष्टिक्रमे निरुच्यमान आकाशाद् वायुः वायोरग्निः अग्नेरापः, अद्भ्यः पृथिवी, अमुनोपनिषन्निर्दिष्टक्रमेण तन्त्रशास्त्रानुरोधेन हमित्यकाशबीजम्, यमिति वायुबीजम्, रमिति वह्निबीजम्, वमिति जलबीजम्, लमिति च पृथिवीबीजम् यथाक्रमं समापतितम् तेन च श्रुतिरनुगृह्यते यरलवा अन्तःस्था इति प्राचीनपाठश्च संसाध्यते। तथापि यकारपाठादनन्तरम् रकारपाठमपहाय वकारादनन्तरं रकारपाठः वलप्रत्याहारे रेफ-पाठं रलप्रत्याहारे च वकारापाठ ऋलृवर्णसावर्ण्यं र प्रत्याहार चिकीर्षां च पुरस्कृत्य प्रवर्तमानः श्रुतिक्रमं किञ्चिदिवापहाय प्रवर्तते-इति भाति। तदनु ञमङणनाः शब्दस्पर्श-रूप-रसगन्ध-रूप-विषयबोधकाः, झभघढधा वाक्पाणि-पाद पायूपस्थकर्मेन्द्रियनिर्देशकाः, जबगडदाः श्रोत्रत्वक् चक्षुर्घ्राणजिह्वारूपज्ञाने-न्द्रिय वाचकाः, खफछठथाः प्राणादिपञ्चकगमकाः, चटता मनोबुद्धि-अहङ्कार सूचकाः, ककारः पुरुषः, पकारः प्रकृतिः, शषसाः रजस्तमसत्वशंसकाः हकारश्च गुणातीतः पुरुषः इति चतुर्दशसूत्रैर्निर्दिष्टोऽक्षरसमाम्नायः सृष्टिक्रमं पञ्चमहाभूतेन्द्रियविषय-गुण -पुरुष - प्रकृति सहितं गुणातीत परमात्मानमेव बोधयतीत्यहो गौरवं वाङ्मयव्या-प्तस्य शब्दब्रह्मरूपपरमात्मनः। चतुर्दशसूत्रेष्वन्तिमा णकारादयश्चतुर्दशानुबन्धास्तु-"अत्र सर्वत्र सूत्रेषु ह्यन्त्यवर्णं चतुर्दशम्, धात्वर्थं समुपादिष्ट पाणिन्यादीष्टसिद्धये" (1) इत्थं किल धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थं प्रत्याहारनिर्माणद्वारा सकलवाङ्मयसङ्कल-नाय निवेशिताः सन्ति वर्णाः।

तन्त्रशास्त्रे वर्णानां महत्वम्

प्रत्यक्षरमेवं विविधदेवतावर्णगुणधर्मादि संग्राहकं मातृकाजातम् तन्त्रशास्त्रे प्राचीनाचार्यैः- देवतानुग्रहाच्चेतसि समुद्भूतया प्रस्फुरणया सङ्ग्रथ्य मन्त्रयन्त्रतन्त्र-त्रितयेनाखिलं विश्वं समभिव्याप्याधि-दैविक तेजः सम्पादनाय विविधमार्गसंस्थापना विहिता। महौजांसि वर्णजातानि-इमानि परदेवत्वेनालम्भ्यानेके पारङ्गताः सिद्धिंग-मिष्यन्ति चापरे। तत्र प्रत्यक्षरं बिन्दुयोजनं तत्र शक्तियोजनार्थं सम्प्रदायविद्भिरा-ख्यायते। योऽसौ बिन्दुः शब्दाब्रह्मापरपर्यायः स एव स्वीयां शक्ति वर्णवाच्यदेवतया संयोज्य भक्ताभीष्टकामाननायासेन साधयतीति साधकानां सुविदितम्।

सामर्थ्यम् च

वर्णानामर्थबोधने कियत् सामर्थ्यमिति विचिकित्सायाम्—एकं निदर्शनमत्र द्रष्टव्यम्:—

"क का कि की कु कू के कै को कौ कं कश्च नोऽवतु।"

अस्य श्लोकस्य सौभर्यादि-मुनिनिर्दिष्टवर्णार्थानाश्रित्य कृतं विवेचनमित्थम्:-ककारो—ब्रह्मा, तस्य का—मही-उत्पत्तिस्थानम् कमलम्, तस्य किः- कर्णिकः

(1) सुरभारती वा. अ. २०२५ पृ. ४२

सामान्यपरिचय:

कीनाश इव विनाशको हिमर्तुः, तस्य कीः–द्विज्वह्निः, तस्य कुः उत्पत्तिस्थानम् वायुः वायोरग्निः इति श्रुतेः, तस्माद् वायोः कू उद्भवो यस्य भीमसेनस्य हनूमतो वा तस्य केः बलम्, तेन कंः विनत्रो भीरुः तस्य को शोकः, तस्य कौः वृषः वर्षयिता वीरः, तस्य कं सुखं, येन स जयोऽर्जुनः, तस्य कः गमनं गतिर्यत्र, स विष्णुर्नोऽस्मानवतु इति । ब्रह्मोत्पत्तिस्थानभूतकमलविनाशकहिमर्तुद्विड्वह्नि समुत्पादक वायु पुत्रभीमसेनबलभीतकापुरुषशोक वर्षकवीरस्यार्जुनस्य या गतिः स कृष्णः नः अस्मान् सदा अवतात् इत्याभिर्मातृकाभिरियान् गभीरार्थः प्रकटी क्रियते । यास्कनिरुक्तेऽपि वर्णानामीदृश्या सामर्थ्यगवेषणयैव एकस्यैव शब्दस्य व्यवहारे स्वप्नेऽप्यगोचरीभूता अर्थाः प्रकाश्यन्ते यैरर्थैं वैदिकं वाङ्मयं विदुषश्चमत्करोति । संस्कृतवाङ्मये गूढार्थकं-साहित्यं पर्याप्तमात्रायामस्ति (1)।

इदं नाम च रूपञ्च

विचित्रोऽयं भूलोकः । कर्तुमकर्तुमन्यथाकर्तुं शक्तः सर्वशक्तिमान् ईश्वरो दिव्यामिमां सृष्टिं कल्पयाञ्चक्रे । न जाने चराचरवस्तुजातमत्र कियदस्ति । इत्थं किल भगवता सर्वशक्तिमता प्रभुणा या विभिन्ना सृष्टिः सृज्यते तस्या नामकरणं लोकैरेव विधीयते । यत् किमपि वस्तुजातं मानवज्ञानविहीनं भवति तत्तु नामरहितमेव तिष्ठति । यथैव तज्ज्ञानसीमायामायाति मानवस्य तथैव तस्य किमपि न किमपि नाम भवति । रूपञ्च नामयुक्तं जायते । यथा:

"सर्वं वा इदं नाम च रूपञ्च ।
देवा रूपाणि चक्रे वयं नामानि कृण्मसि ।"

इत्थं किलास्माकं प्रगत्या सहैव कोशसम्पदप्यस्माकं वृद्धिमाप्नोति । चेत्सा वृद्धिं नाप्नुयात्तदाऽस्माक प्रगतिः कौण्ठ्यमापन्ना भविष्यति । अतः प्रगतिशीला जनाः सर्वदा निर्माणशक्तिसम्पन्नां भाषामाकलयन्ति । दैनिकनवीनशब्दनिर्माणेन सहास्माकं दैनिकी प्रगतिः सुस्पष्टतामाप्नोति । विश्वस्य मानवसमाजस्य जीवनमस्ति पुरुषार्थचतुष्टयम् ।

वर्ग-चतुष्टयी

परं कलियुगेऽस्मिन् सर्वमपि प्रायेण परिवर्तितमस्ति । भारतीया अपि वर्गचतुष्टयेनाद्य परिचिताः न सन्ति । तथापि धर्मार्थकाममोक्षरूपोऽय वर्गः सर्वमपि जगदावृणोति । कुर्युर्नाम लोकाः धर्मेण द्रोहम् । मोक्षञ्च तथैव कल्पितं मन्येरन् । तथापि विश्वस्य कोऽपि जन एतादृशो नास्ति योहि नामेनार्थेन वा परिचितो न भवेत् ।

(1) बटोदर· संस्कृतमहाविद्यालय पत्रिका "सुरभारती" । सम्वत् २०२५ वार्षिकाङ्कः श्री लक्ष्मी शंकर गौड़ः शुक्लः ।

धर्मार्थकामादिकप्राप्तिर्विविधप्रकारैः सम्भवा। चतुर्वर्गे च मोक्षप्राप्तिर्हि दुर्लभा। मोक्ष एव च परमपुरुषार्थः। "न स पुनरावर्तते" इत्यादिश्रुतिभिस्तस्य नित्यत्व-बोधनात्। इतरेषां त्रयाणां "यथा कर्म चितो लोकः क्षीयते एवमेव पुण्यचितो लोकः क्षीयते" इत्यादिभिर्वाक्यैः- अनित्यत्वमेव बोधितम्। मोक्ष प्रयोजक हि ब्रह्मज्ञानम्। तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय इत्यादि श्रुतेः। तज्ब्रह्मज्ञानं च शब्दज्ञानं विना न सम्भवति। यथोक्तमाचार्यैः:—

शब्द-महिमा

"शब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति। (1) अनया श्रुत्या अपि सुस्पष्टं भवति :—

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति। अत्र किलेदमवधेयम्-पाठक्रमादर्थक्रमो बलीयान् इति न्यायात्-आत्मा श्रोतव्यः तदनन्तरं मंतव्यः, तदनन्तरं निदिध्यासितव्यः तता द्रष्टव्य इति योजना। इत्थ च शास्त्र-आत्मसाक्षात्कारे प्रथमं सोपानम्। यद्यपि श्रवणमात्रेण न मननं सम्भवम् तथापि श्रवण किलार्थावगमोपयोगि। तथा हि –

पदज्ञानं तु करण द्वार तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥ इति॥

इयं खलुशाब्दबोधप्रक्रिया, यत् प्रथमतः श्रोत्रेन्द्रियेण शब्दज्ञानं भवति। ततोऽनन्तरं शक्तिज्ञानेन सह कृतशब्दार्थस्मरणम्, ततः शब्दबोधः अतः शास्त्र श्रवणमात्मसाक्षात्कारस्य प्रथमं कारणम्।

शास्त्रञ्च शब्दात्मकम्। "येनोच्चारितेन सास्नालाङ्गूल ककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः", इतिभाष्यकारः। शब्दं श्रृणोमीति अनुभव सिद्ध शब्दत्व जातिमान् शब्द इत्याहुः नैय्यायिकाः। आकाशविशेषगुणः शब्दः, श्रोत्रग्राह्यो गुणः शब्दः। इत्थञ्च शब्दस्यानेक लक्षणानि विविधशास्त्रकार विहितानि।

शब्दस्य महिमाऽचिन्त्यः। शब्दोऽपि ब्रह्मवन्नित्यः। शब्दानां संकलनं कोशेषु सम्पृक्तौ शब्दार्थौ वा कोशेषु सवसाधारणानां कृते संस्थाप्येते। अतोऽत्रापि शब्दार्थ विषमे किञ्चिद्-विचारणीयम्।

शब्दार्थौ

संस्कृत वाङ्मयाकाश-भानुः कविताकामिनीविलासो महाकवि कालिदासः शब्दार्थयोः सम्बन्ध परमसश्लिष्टमुपवर्णयाचक्रे (2)। न केवलमिदमेवापितु

(1) सूर्योदयः। वर्ष ४२। अंकः १०। पृ. २१८।
(2) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ॥ रघुवंशम्-१-१।

सामान्यपरिचय:

प्राचीनैर्नवीनैश्चापि भाषाशास्त्रिभिः। शब्दार्थयोः। सर्वंच्छद्य सम्बन्धस्य विवेचना कृता। आधुनिकाः—भाषाशास्त्रिणोऽपि शरीरात्मनः सम्बन्धमिवानयोः सम्बन्धमुपवर्णयन्ति। तेषाँ कथनमस्ति यच्छरीरं शब्दोऽर्थश्चात्मा। आत्मनोऽभावे शरीरम् निरर्थकं निष्क्रियञ्च। इत्थमेव चेत् शरीर न स्यात्तदाऽऽत्मनः स्थितिः क्व भवेदिति ? इत्थं किल भाषाशास्त्रिणां मतेऽनयोरन्योन्याश्रयसम्बन्धः। प्राचीनाः भारतीय भाषाशास्त्रिणोऽपि शब्दार्थयोरभिन्नसम्बन्धः इति स्वीकुर्वन्ति। तेषां मते शब्दार्थौ—एकस्यैवात्मनो भेदद्वयरूपौ। अनयोः स्थितिरपृथग्भूता। (1) इत्थं किल प्राचानभाषाशास्त्रेषु शब्दार्थावेकस्यैवात्मनो रूपद्वयम्। शरीरात्मनोः- उपमयाऽनयोः सम्बन्धो न प्रकटितः। शब्दार्थयोः सम्बन्धस्य व्याख्यानं विविधतया विहितम्. वेदान्ताश्रयं गृहीत्वा तदित्थं कथितं यद्यथा ज्ञानक्षेत्रे ज्ञातुरात्मनो हि परमा परिणतिः ज्ञेये ब्रह्मरूपे भवति तथैव शब्देनार्थः स्वकीय रूपं प्रकटयति। (2) कथनस्यायमाशयोऽस्ति यत् शब्दः – आत्मरूपतत्वस्य प्राप्तिम् – अर्थद्वारेणैव करोति। चेद्शब्द एव न स्यात्तदाऽर्थप्रतीतिः कथं स्यात् ? व्यवहारक्षेत्रेऽपि शब्दं विना कार्यं न प्रचलति। न च किमपि बोधजात शब्द विना कदापि भवति. (3)

रामचरितप्रणेता जलोर्मिवदेव शब्दार्थौ मनुते (4) अर्थम् हि वाचोऽथवा शब्दस्य पुष्पम् फलञ्चाप्याह (5)। ह्येल्म स्लेफ नामको ह्याधुनिकचिन्तकः वाक्यपदीय परिभाषामेवानुकरोति यथा—'भारागतरूपस्य कृते प्रतीयमानं वस्तु आवश्यकं नास्ति। पर वस्तुकृते भाषागतरूपमावश्यकमस्ति" (6)। इत्थमनेकोदाहरणैरुल्लेखैश्चेदं ज्ञायते यत् भारतोयाः प्राचीनभाषाशास्त्रिणः शब्दार्थयोरविच्छेद्यसम्बन्धं स्वीकुर्वन्ति। मुख्यसंस्कृतकवीनामपि दृष्टिर्हि तादृशी—एव। अस्मा तिरिक्तमर्थः शब्दस्य पुष्पफलादिरूपेऽपि दृष्टः। पाश्चात्यैरपि मतस्यास्यानुकृतिरेव प्रदर्शिता। अनेन प्रकारेण शब्दार्थयोरविच्छिन्नत्वं भारतीयप्राचीन भाषाविदां मतेन सिद्ध्यति।

---

(1) एकस्यैवात्मनो भेदौ शब्दार्थावपृथक् स्थितौ। २-३१। वाक्यपदीयम्, ब्रज विलासदास एण्ड-कम्पनी, बनारस, सन् १ ८७ ई०।

(2) आत्मा रूपं तथा शब्दे स्वरूपञ्च प्रकाशते ॥ १।५० वाक्यपदीयम्।

(3) न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ १-१२४ ,,
अर्थं क्रियासु वाक् सर्वा समीहयति देहिनः। १-१२८ ,,

(4 गिरा अरथ जल बीचि सम कहिअत भिन्न न भिन्न।
बन्दौ सीतारामपद जिन्हहि करम प्रिय खिन्न ॥

माताप्रसादगुप्त सम्पादित, राम चरितमानस, बालकाण्ड साहित्यकुटीर, प्रयाग, सन् १९४९।

(5) अर्थं वाचः पुष्प फलमाह। ९-२० लक्ष्मण स्वरूप सम्पादित निरुक्तम्।
लवपुरम्, १९ ७ ई०।

(6) सारस्वती सुषमा-वा. सं. वि. वि. त्रैमासिकी अंक १ वर्षम् २४ सं. २०२६ पृ. ९०।

एवमेव भारतीयाः प्राचीना भाषाशास्त्रिणः शब्दार्थयोः सम्बन्धं नित्यमपि कथयन्ति । ते नु खलु महर्षिणो भवेयुः, सूत्रप्रणेतारो वा, अथवा भाष्यकाराः स्युः सर्वेषामेवायमपि सिद्धान्तोऽस्ति समुपवर्णितः भाषाबिज्ञानग्रन्थेषु (1)। श्री पी० एस० सुब्रह्मण्य शास्त्री अपि–अस्यैव मतस्य सर्वथा समर्थनम् कृतवान स्वकीयै भाषणैः (2) । व्याकरणशास्त्रस्य विद्वद्भिर्हि शब्दार्थयो नित्यसम्बन्धस्य साधनं विहितम् । दार्शनिकैरप्यत्र शब्दार्थयोः सम्वन्धे सुविचारितम् । तेषामनुसारमपि शब्दार्थयोः सम्बन्ध नित्यमेव । मीमांसका र्मीमांसां कुर्वाणाः भाषाशास्त्रिणामिवानयोः सम्बन्धं नित्यमामनन्ति (3)।

परमत्रैव वशेषिकाः- मीमांसकेभ्यो भिन्नं विचारमस्मिन् विषये प्रकटयन्ति । तेषाँ मते शब्दार्थावसम्बद्धौ । एवं सति शब्दार्थौ न चापि-अन्योन्याश्रितौ न च नित्यसम्बद्धौ । तद्यथा :—"शब्दार्थावसम्बद्धौ (3) ।

परं व्यवहारेण ज्ञायते यद् शब्दार्थयोः सम्बन्धोऽस्त्यवश्यमेव । भवतुनाम वैशेषिकानामनुसारं विच्छेदोऽप्यत्र । को नाम न जानाति यद् "ग्रन्थः" अस्य शब्दस्योच्चारणेन कस्यचिद् वस्तुविशेषस्य वोधो भवति । अयम् वोधश्चास्माक कृते नित्यः । अस्य तर्कस्योपस्थापनायां शब्दार्थयोः सम्बन्धे वशेषकाः शब्दार्थयोः सम्बन्ध स्वीकुर्वन्ति, परं ते सम्बन्धमिमं नित्यं नैव मानयन्ति । ते किल सम्वन्धमिम सामयिकं कथयन्ति । यथाहि :—वैशेषिकाणामस्य मतस्य विषये निम्नप्रकारेणावधारणीयम् । संस्कृते "धर्मः" शब्दोऽयमातपार्थे प्रयुज्यते पर वंगभाषायामस्यैव प्रयोगः "प्रस्वेदार्थे" भवति । इत्थमेव संस्कृते "रागः" शब्दोऽयं प्रेमार्थको भवति तद्वदेव च हिन्द्यामपि परमस्यैवार्थः बंगभाषायामथ च महाराष्ट्रियभाषायां च

(1) नित्याः शब्दार्थ सम्बन्धाः, समाम्नाता महर्षिभिः । सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः १-२३-वाक्यपदीयम् सं. १८८६ ।

(2) सिद्धे शब्दार्थ सम्बन्धे लोकतोऽर्थ प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्म नियमः यथा लौकिक वैदिकेषु ।...नित्यपर्यायवाची सिद्धशब्दः । नित्यो हि अर्थवतामर्थैरभिसम्बन्धः ।

P. S. Subrahmanya Shastri's Lecturs on Patanjali's Mahbhashya, Annamalai University, Annamalai nagar, Madras. 1944 Christ era.

(3) औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं वादरायणस्यानपेक्षत्वात् १-१-५ ।

मीमाँसादर्शनम् , पुस्तकम् १, दि एशियाटिक सोसायटी आव बंगाल. कलकत्ता । सन् १८७३ ई. ।

(4) (२।२।१८ वैशेषिक दर्शनम् । पुस्तक दिए. सो. अ. व. कं. सन् १८६१ ।

(5) वैशेषिक दर्शनम् ७।२।२० । सं. सन्. १८६१ ई०

"क्रोधो" भवति । अतः शब्दस्यार्थेन सम्बन्धः सामयिको न तु नित्यः इति वैशेषिकाणामभिमतम् ।

अस्माभिः पूर्वमेव दृष्टं यन्मीमांसकाः शब्दार्थयोः सम्बन्धं नित्यमिति समामनन्ति । परं यदा मीमांसायाः (१-१-५) अस्य सूत्रस्योपरि व्याख्यानमारब्धम् शबरस्वामिना तदा तेन शब्दार्थयोर्नास्ति कोऽपि सम्बन्ध इति संसाधितम् । शब्दार्थौ स्वभावेनैवासम्बद्धौ । दृश्यताम् "नैव शब्दस्यार्थेन सम्बन्धः, स्वभावतो ह्यसम्बन्द्धावेतौ शब्दार्थौ ।" (शबरस्वामी) अस्यायमाशयोऽस्ति यत् शब्दार्थयोः सम्बन्धः कथं स्थापयितुं शक्यते । यतोहि शब्दोच्चारणन्तु मुखेन भवति परम् वस्तु जातं मुखान्नैवायाति तत्त्वन्यत्रैव भवति । यथा(2) "मुखे हि शब्दमुपलभामहे भूमार्थम् जैमिनेः मीमांसादर्शनेनेदमपि प्रतिपाद्यते ।

इत्थं मीमांसा—वैशेषिक दर्शनयोरर्थशब्दसम्बन्धिविचारयो भिन्नतायाश्मनयोः कीदृशः प्रयोग. ? अथ च मीमांसादर्शनमिव शब्दार्थयोः सम्बन्धो नित्यो हि एवं किल प्राचीनाः भाषाविदोऽपि वदन्ति । तेषामपि मते शब्दार्थयोः सम्बन्धोऽस्ति नित्यः । सर्वमिदम् पूर्वमेवोपस्थापितम् । अतोऽयं नित्यसम्बन्धः कथं गृह्येत ? अस्याः समस्यायाः विवेचनं द्विधा भवितुम् शक्नोति । अत्रैको दार्शनिक पक्षस्तथा द्वितीयो व्यावहारिकः । दार्शनिक रूपेण चेद् विचार्येत तदित्थं ज्ञातव्यम्—यत् पृथिव्यप्तेजोवायु—आकाशादीनि पञ्चतत्त्वानि नित्यानि । नित्यस्याकाशस्य च गुणः शब्दः । तद्यथा- "शब्दगुणकमाकाशम्" । नित्यस्य गुणोऽपि नित्यः । अत एव नित्यस्याकाशस्य गुणः शब्दोऽपि नित्यः । अर्थतत्वदृशा चेद् विचार्येत तदा ज्ञातं भवति यत् शब्दार्थौ एकस्यैवात्मनो रूपद्वयी । चेच्छब्दो नित्यस्तदा नूनमेवार्थोऽपि नित्य एव । दार्शनिक विचारधारानुसारं शब्दार्थयोनित्य-सम्बन्धस्य मीमांसाया इदमेकं रूपं मन्तुं शक्यते ।

अस्य विवेचनस्य व्यावहारिकोऽयं पक्षः—यत् भाषाया निर्माता मानवोऽस्ति । आधुनिक-भाषा-शास्त्रिणोऽपि—अस्यैव मतस्य समर्थकाः सन्ति । एवम् किल मानवो यादृशीं कामपि सभ्यतां संस्कृतिं च गृहीत्वा चलति तद्वदेव तस्य भाषापि कस्या अपि सभ्यतायाः—संस्कृतेश्च परिवेषे प्रवहमाणाऽस्ते । मानवस्य सभ्यतायाः संस्कृतेश्च परिवेषः सदैव परिवर्तनशीलः । अत एव भाषापि नाचला । भाषा च यदा

---

(1) मीमांसा दर्शनम्, वाल्यूम १ दि एशियाटिक सोसायटी आव् बंगाल, कलकत्ता सन्. १८७३ ई.

(2) मीमांसा दर्शनम्, वा. १ दि एशियाटिक, सोसायटी आव् बंगाल, कलकत्ता सन् १८७३ ई. ।

परिवर्तनशीला तदा तस्याः शब्दार्थावपि कथं स्थिरौ भवितुं शक्नुतः । देशकाल-भेदेन शब्दा अपि परिवर्तनशीलाः । अर्थश्चापि तथैव । अतः शब्दस्यार्थेऽपि परिवर्तनं मिलति । अनेन प्रकारेण "शब्दार्थावसम्बद्धौ" इत्यस्य वैशेषिकमतस्य प्रतिपादनम् भवति ।

मीमांसकानां प्राचीनभाषाशास्त्रिणाञ्च शब्दार्थयोर्नित्य-सम्बन्धविषये व्यवहार-पक्षमक्षिलक्षीकृत्यान्ययैव दृशा विचारः क्रियते । तद्यथा रागशब्दस्यार्थः संस्कृतभाषायां "प्रीति" रिति भवति । अयमर्थः संस्कृते नित्यः । एवमेव वंगभाषायां, महाराष्ट्र्याञ्चास्यैवार्थः "क्रोध" इत्ययमपि नित्यः । स्व स्व सीमायामुभावपि नित्यौ । अनेन प्रकारेण नेयमखण्डनित्यता स्वीक्रियतेऽपितु खण्डनित्यता स्वीक्रियते । बंग भाषाया महाराष्ट्र्या च यदा रागशब्दस्यार्थः क्रोधातिरिक्तः कश्चिदपरो भविष्यति तदा तस्यार्थस्यैव रागशब्देन सह नित्यता भविष्यति । शब्दार्थौ नित्या-विति प्राचीनाः स्वीकुर्वन्ति । अनेन सहैव तेषामभिप्रेतमासीत्-अर्थपरिवर्तनमपि । अनेन प्रतीयते यत्तेषां शब्दार्थयोर्नित्यत्व-धारणा किञ्चिदुपरिनिर्दिष्टविचारेण समाना एवासीत् । कथ्यतेऽपि यच्छब्दानां प्रयोगविषयः परमव्यापकोऽस्ति । केचन विशिष्टशब्दाः केषुचित् —प्रदेशविशेषेषु विशिष्टार्थे एव प्रयुज्यन्ते । यथा 'शव्' धातुः काम्बोजेषु गत्यर्थकः परमार्याः—अस्यैव प्रयोगम् विकारार्थे कुर्वन्तिस्म । यथा- "एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते - तद्यथा—" शवतिर्गतिकर्मा कम्बोजेषु-एव भाषितो भवति विकारमेनमार्या भाषन्ते शव इति (1) ।"

वैशेषिकैरेवोद्भाविता एकापरा समस्यापि वर्तते । सा चेयम्—यत्-शब्दस्तु मुखे भवति परमर्थोऽन्यत्र । किमस्ति समाधानमस्याः समस्यायाः ? अस्या इदमेव समाधानं यत् किमपि शब्द श्रुत्वाऽस्माकं हृदयं बुद्धिर्वा तेन शब्देन सम्बद्धम् । वस्त्वादिरूपं गुणम्वा जानाति । ततश्चापि शब्दस्य सम्बन्धश्चेद् केनापि भौतिकपदार्थेन सहाभवत्तु बुद्धिस्तदपि ज्ञातुं शक्नोति । "ग्रन्थः" शब्दस्यास्योच्चारणेन सहैवास्य रूपं गुणश्चाभावप्यस्माक हृदयबुद्धौ समागच्छतः । तदा च वयमावश्यकतानुसार यथास्थानं तस्य भौतिक रूपेण प्राप्तिं कुर्मः । अनेन विवेचनेनेदम् सिद्ध्यति यच्छब्दा-र्थयोः सम्बन्धो वर्तते । परमस्य सम्बन्धस्य माध्यमं हृदयंवा बुद्धिरेवास्ते । वैशेषिका-णामिदमेव मतमस्ति स एवायं च तेषां तर्कः । इत्थ किल शब्दार्थयोः सम्बन्धस्य विवेचनं विभिन्नमतानुसारं कर्तुं शक्यते । विषयस्यास्योपपादनमत्र दार्शनिकाधारेण विशेषतश्च व्यावहारिक दृशा विहितम् । शब्दार्थयोः सम्बन्ध-विषये पाश्चात्यविदुषा-मपीदमेव मतम् । तेऽपि शब्दार्थौ—अन्योन्याश्रितावेति स्वीकुर्वन्ति आदिमजाति

---

(1) पी. एस. सुब्रह्मण्य शास्त्री, "लैक्चर्स आन पातञ्जलीज् महाभाष्य, वाल्यूम, १ । पृ. ६५ । अन्नमलाई वि. वि., अन्नमलाई नगर मद्रास, सन् १९४४ ई० ।

भाषाध्येता नृतत्वज्ञो ब्रोनिस्लाव् मैलिनोव्स्की एवं प्रतिपादयति—"यत् भाषा-विषयकप्रतिपादने तथा सांस्कृतिकविश्लेषणे परस्परम् घनिष्ठसम्बन्धस्य यथार्थानु-भवस्य प्रत्यक्षीकरणस्य वा विश्वासं दापयन् एतत् प्रदर्शितं यन्न शब्दस्य न चाप्यर्थस्यैव — ऐकान्तिका सत्ता । लेखकस्यायमाशयोऽत्र यदुभाववेमौ-अन्योन्याश्रितौ (1)* ।

विभिन्नदृष्टिकोणेन शब्दार्थयोः सम्बन्धे विचारितम् । अनेन विचारेण ज्ञायते यदुभयोः शब्दार्थयोर्द्वयोरेव समानं माहात्म्यम् । परन्तु क्वचित् क्वचित् प्राचीनाः भारतीयभाषाशास्त्रिणः शब्दो गौणः- अर्थश्च प्रधानः इत्यामनन्ति । तेषामिदं कथनमस्ति यदनन्वितेऽर्थे शब्दादीनां प्रादेशिक—परिवर्तनस्याभावे शब्दानां परीक्षा तेषामर्थोपरि दृष्टिं संस्थाप्य किञ्चिद् वृत्तिसामान्याधारे करणीया ।

यथा—"अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यं परीक्षेत केनचिद् वृत्ति सामान्येन" २—१ । (1) निरुक्तस्यास्यांशस्योपरि विचारयन् युगाचार्योऽन्ते कथयति यदर्थ प्रधानः शब्दश्च गौणः । यथा—"अर्थो हि प्रधानं तद्गुणभूतः शब्दः (2) । अस्मिन् सम्बन्धेऽन्यत्रापि—एतादृशी एव विवेचनोपलभ्यते । तद्यथा—लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ।—२-१३२ (3) । अर्थात् लोके शब्दार्थयोरर्थ-प्राधान्यमेव । पुण्यराजश्चास्य टीकां कुर्वाणः कथयति—"अर्थरूपतां प्रतिपन्नोऽर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते । अयं गौरित्यादिः । तत्रार्थ एव बाह्यतया प्रधानमवसीयते (4) ।

अनेन विचारेण प्रत्यक्ष भवति यद्यथा निरुक्तकारः यास्कः व्यवहारपक्षम-वलम्ब्य—अर्थप्राधान्यं स्वीकरोति तथैव वाक्यपदीये भर्तृहरिरपि लोकपक्षमव-लम्ब्यैवार्थप्राधान्य प्रकटयति । इत्थं किलोभयोर्विचारसाम्यं भाषाविज्ञयोरनयोः । तथापि शब्दार्थयोः कः गौणः कश्च प्रधान इति निर्णयोऽय न सुकरः । पूर्वमपि उभयो रन्योन्याश्रितत्वं विवेचितम् । अत्रैवं कथयितु शक्यते यद् भावानां, विचाराणाञ्च प्रकटनायैव भाषा समुत्पन्ना भाषा निर्माणस्यादिकाले भावानां विचाराणाञ्चोदया-

---

(1)* For the clear realisation of the intimate connection between linguistic interpretation and the analses of the Culture to which the language belongs, shows conveniently that neather a word nor it's meaning has an independent and self-sufficient existance"

G. K. Agden, I. A. Richards "The meaning of meaning page 308–9.

(1) डा. लक्ष्मण स्वरूप शास्त्री सम्पादितम् निरुक्तम् पं. वि. वि. लाहौर सन् १९२७ ई.

(2) निरुक्तम्-आनन्दाश्रम मुद्रणालय, पूना, सन् १९२२ ई.

(3) वाक्यपदीयम्, व्रजविलासदास एण्ड कम्पनी, वनार

(4) वाक्यपदीयम् ,, ,, ,,

नन्तरमेव तेषामभिव्यक्तेराकुलतावशेनैव —आक्षरिक—ध्वन्यात्मकभाषानिर्माण-मभूत्। एवन्तु—अनेकेऽर्थाः हस्तान्दोलनेनाक्षिनिक्षेपेणापि च ज्ञायन्तेऽभिव्यज्यन्ते वा। यथा - "बहवोऽर्थाः हि गम्यन्ते अक्षिनिष्कोचैः पाणिविहारैश्च" (1)। एवं प्रतीयते यद्यदाङ्गभङ्गिभिः पूर्णतयाऽर्थनिष्कासनं नाभूत्तदा—एव भाषानिर्माणस्या-वश्यकता तीव्ररूपेणानुभूता स्यात्। अतोऽर्थरूपग्राहकाः भावाः विचाराश्च प्रथमं समुदिताः भवेयुः। चेदर्था एव न स्युः, भावा एव न भवेयुस्तदा शब्दानाम् कावश्य-कता ? अतोऽर्थः प्रधानः शब्दश्च गौणः।

अनया मीमांसयाऽर्थस्य प्राधान्यं सिद्ध्यति-एव। लोक—व्यवहारेऽपि पश्याभः—यत् भाषा यदि सुस्पष्टापि न स्यात् परं भावाः सन्ति, अथ च विचाराश्चेद् विद्यन्ते तु कार्यम् संगच्छत्येव। अथ चेद् विचारा एव यदि न सन्ति तु भाषायाः कावश्यकता ?

सर्वस्याप्यस्य विचारविमर्शस्य सारोऽयं यद् भावानां, विचाराणामर्थानामेव प्राधान्यं भाषायाः शब्दस्य वा स्थान गौण्म् प्राचीन भाषा शास्त्रविदां मतस्य सम्यग् व्याख्यानमनेन प्रकारेण समीचीनं सिद्ध्यति (2)। इमौ च शब्दार्थाविव कोशवाङ्म-यस्य मुख्यघटकौ। अतएवात्र किञ्चिद् विचारितम्। शब्दार्थाणाञ्च प्रकाशनं प्रचारणं संरक्षणमिति सर्वमपि लिपिद्वारेणैव सम्भवम् : अतो लिपिविषयेऽपि संक्षेपतोऽवधेयम्।

लिपेः सत्तायाम्-

भाषायाः अपेक्षया किञ्चिदेव स्वल्पं महत्वं लिपेः। भाषायाः- विशेषतश्च साहित्यस्य रक्षायाः श्रेयोभाजनं लिपिरेव। भाषेयं मनुष्येणैव विकसमाना स्वयं मानवस्य विकासे समाजोन्नतौ च सहयोग चकार। इत्थमेव लिपिरपि मानवानां विचारान् स्थायित्वप्रदाने, विकासे च तेषां प्रसारकर्मणि च प्रमुखकारणभूता। अद्यतन-विविध साहित्यसंरक्षणस्य मुख्यं कारणं लिपिरेव।

भारतीयशासनाधार लिपित्रयमाधुनिके युगेऽभवत्। प्राचीनकाले ब्राह्मीलिपिरे-वास्माकम् शासनकर्मणि लेखनकार्ये च प्रयुक्ताऽभूत्। तदनन्तरं तस्या एव लिपेर्भेदाः। त एवाद्य विभिन्नप्रान्तीयलिपिरूपेषु विकसिता। यवनसाम्राज्यकालेऽत्र यावनी लिपिः प्रचारिताऽभूत्। तदनन्तरञ्च रोमनाख्या लिपिः प्रशासनलिपिः सञ्जाता। नात्र कापि विचिकित्सा इत्थ किल सस्कृतकोशाणां मुख्या लिपिरद्य देवनागरी एव विद्यते। यद्यपि यत्र तत्र विभिन्नप्रान्तीयलिपिस्वपि संस्कृतकोशाः लिखिताः वभूबुः। तथाप्यद्य संस्कृतकोशवाङ्मयं नागरी—लिपि-समाश्रयणमेव कुर्वत्-प्रतीयतेऽतो-ऽस्या गुणदोषविवेचनं भारतस्य प्रशासनकर्मणि च प्रयुक्तस्य लिपियुगलस्यान्यस्यापि समालोचनं, प्रसङ्गवशादत्रावश्यकं लगति। इयमेव च लिपिः ब्राह्मीलिपेः शुद्धतमो रूपः। एतदर्थमत्र देवनागर्या विषयें किञ्चिदुच्यते।

---

(1) महाभाष्यम्। २-१-१ निर्णय सागर मुद्रणालय, बम्बई, सन् १९३५ ई.।

(2) श्री शिवनाथ। "नागरी प्रचारिणी" वर्ष ६३ अं. ३-४ पृ. ३११।

देव-नागरी-

मानवो ह्यस्य प्राणिजगतः सर्वाधिको विकसितजीवोऽस्ति। तस्य स्वरयन्त्रं पशुपक्षि-मृगादीनामपेक्षयाऽतीवोन्नतं परिपूर्णञ्चास्ति। सो हि स्वकीयेन स्वरयन्त्रेण विविधध्वनिनिःसारयितुं समर्थः। आसां ध्वनीनां शब्दरूपेणासौ नियमनं कृत्वा स्व हृदयभावान् समभिव्यञ्जयति। यथाह वाक्यपदीयकारः— "अर्थप्रभृति तत्वानां शब्दा एव निबन्धनम्"। आसामेव ध्वनीनां-अर्थमय—व्यवस्थाविशेषेण भाषाया निर्माणं भवति(1)। अतः सुस्पष्टमिदम् यद्ध्वनीनां—एककानि–एत्र, यानि मानवमुखोच्चारितानि भवन्ति भाषानिर्माणकारणानि। एतानि एककानि यैर्विभिन्न-चिन्हैर्व्यक्ती भवन्ति, तानि लिपिचिन्हानि उच्यन्ते। हिन्दीभाषायामेव लिपि-चिन्हान्येतानि "वर्णः" इति नाम्ना कथ्यन्ते। परं संस्कृते पुरा वर्णः इत्ययं शब्दो मूलतः भाषायाः ध्वनिक-एककानां कृते प्रयुज्यते स्म। न च लिपिचिन्हानां कृतेऽस्य शब्दस्य प्रयोगो भवति स्म। "वर्णमाला" इत्ययं शब्दस्तन्त्रशास्त्रस्य वर्तते न व्याकरणस्य। वर्णानां क्रमबद्धा सुगठिता तालिका एव वर्णमालास्ते यस्यां लिपिभेदेन भेदोऽपि सम्भवः। यद्यपि वर्णमाला लिपिश्चेति शब्दयुगलम् समानार्थकमिति मन्यते परन्तु वैज्ञानिकाधारेणात्र नूनमेव सूक्ष्मभेदोऽस्ति। लिपिम् परिभाषयन् विद्वानेवमाह– "ध्वनिरेव भाषाधारः, ध्वनिश्च श्रव्या। ध्वनिम् दृष्टिपथमानेतुं यानि प्रतीकानि प्रयुज्यन्ते तदेव लिपिरिति लिपिचिन्हमिति वाच्यते (2)।

एषां लिपिचिन्हानां व्यवस्थयैव मानवीयवाक् दिक्कालातीतं रूपम् प्राप्तवती। गौतमकपिल-कणादौपमन्यववाल्मीकि-व्यासकालिदास-बुद्ध - प्लेटो–होमर·फिरदौसी– आदिस्वनामधन्यसरस्वतीपुत्राणां वाग्स्माभिर्लिपि - कृपयैवास्वाद्यतेऽद्य। अतएव सम्भवतो विश्वकोशकारो लेखलम् मानवस्य सर्वाधिकमुपलब्धिमूतम् लिलेख(3)।

विद्वद्भिः—व्यापकान्वेषणानन्तरं लिपि-विकास-सोपानानि सुनिश्चितानि (4)। मिश्रस्य मेसोपोटामियायाश्च चित्रलिपीनां प्रारम्भात् तथा च पेरुदेशस्य कुइपसहितं

---

(1) A language is a system of Arbiterary vocal symbol, by means of which a social group cooperates.
B. Block and G. L. Tagor.
Out line of linguistic analyses (1942) Page 5.

(2) भाषा विज्ञानकोशः, डा० भोलानाथ तिवारी (प्रथम संस्करण) पृ. ५७५।

(3) World book Ensyclopaedia (chicago) volume 8 page 49

(4) लिपीनां क्रमिकविकसितरूपस्य संक्षिप्ताध्ययनार्थं सामान्यभाषाविज्ञानं द्रष्टव्यम्, डा० बाबूराम सेक्सेना (प्रयाग) अध्यायः २८।

ब्राह्मीं रोमनलिपिञ्च यावत् लिप्याः का का अवस्थाः—न पारिताः । एतस्य वर्णनम् यद्यसम्भवं नास्ति तथापि - अति कठिनन्त्ववश्यमेव विद्यते । यतोहि १२००० द्वादशसहस्रवर्षाणामविरतसाधनाया इतिहासोऽयम् । विकासस्यास्यातीवमन्दगतिर्बभूव । ईशवीयाब्दारम्भात् १०००० पूर्वं ४००० पूर्वञ्च ६००० षट्सहस्रवर्षेषु अस्या प्रारम्भिकमेव रूपम् दृष्टिपथमायातमासीत् (1)। तदा प्रभृति अद्यपर्यन्तं कार्यमिदम् सततं प्रचलमानमास्ते । इदानीं यावदपि च पूर्णम् नाभूत् । भविष्यस्य कृतेऽपि च कल्पनेयं भ्रमपूर्णा एव भविष्यति यत् समस्त भाषाणाम् ध्वन्यात्मिका लेखनपद्धतिः सम्भवा (2)। 'लिपीनामितिहासोऽयं प्रायेण पाश्चात्यविदुषामाधारेणैव स्थाप्यते। अत्र किलेवम् प्रतीयते यत्—लिपिप्रादुर्भावस्य तस्या विकासस्य चानेका; शृंखला विलुप्तप्रायाः । यतोहि भारतीयविदुषां विचारानुसारम् भारतीयप्राचीनसाहित्यानुसारञ्च सृष्टेरारम्भः पाश्चात्यविचारकाणामपेक्षयातीव प्राचीनः । यथा—"कालः खल्वनन्तः इत्यत्र न कस्यापि विप्रतिपत्तिः । अतः साम्प्रतिकवैज्ञानिकानां (पाश्चात्य-गुरुकाणां) मतेन सृष्टेरेकद्विमिताब्द वषप्राचीनत्वे ततः पूर्वम् किमासीत् ? अस्मिन् पर्यनुयोगे वैज्ञानिका मौनम् शरणं व्रजन्ति । एतादृशाः बहवः प्रश्नाः धारासम्पातरूपेण वैज्ञानिकानां मुखमुद्रणम् विदधति । भारतीय दृष्ट्या विचार्यमाणे विषये ऽत्र चतुर्युगानि कल्पितानि सन्ति ।

७१ चतुर्युगानां मन्वन्तरम् भवति । चतुर्दशमन्वन्तराणामेकः कल्पो भवति । तत्र वर्षसंख्या ४,२९,४०,८०,००० मानुषसम्बत्सराणाम् । अयमेकः कल्पो ब्रह्मण एको दिवसो भवति, यत्र सृष्टिक्रमः प्रचलति । तथैवैकस्य कल्पस्य रात्रिरपि, यत्र प्रलयो भवति । एवमहोरात्रैः शतवार्षिकम् ब्रह्मणः आयुर्भवति । एतादृशा अनेके ब्रह्माणोऽभूवन् । साम्प्रतं विद्यमानस्य ब्रह्मणः ५० वर्षाणि व्यत्यगुः । ५१ तमस्य वर्षस्य प्रथमो दिवसो प्रारभत । यस्य नाम "श्वेतवाराह कल्पः" इति सर्वे भारतीय-संस्कृति रसिका विदन्ति । तस्य दिवसस्य (कल्पस्य) ७ तमं मन्वन्तर व्यत्येति । यस्य नाम "वैवस्वत" मिति । अस्य २७ चतुर्युग्यो व्यत्यगमन् २८ तमस्यां त्रीणि युगान्यपि समाप्तिं गतानि । साम्प्रतं चतुर्थं युगम् कलियुगमिति । अस्यापि ५०२७ वर्षाणि व्यतीतानि। साम्प्रतं ५०५८ तमं वर्षं प्रचलति । अनया रीत्या वर्तमानायाः सृष्टेरारम्भो भूत्वा १,९५,५८,८५०,५८ वर्षाणि व्यत्यगमन् (3) । परमत्र निश्चिततिथि-समुद्घोषणे वैज्ञानिकाः मौनाः सन्ति । अतो हि लिपेः क्रमोऽयं मध्यकालीन एव भवितुं शक्नोति ।

---

(1) भाषा विज्ञानम् डा० भोलानाथ तिवारी (१९६१) पृ. ४६७ ।

(२) भाषाः जो वांद्रियाज (अनु० ज० कि० बलवीर) पृ. ३८२ ।

(3) पाश्चात्यसाहित्ये भारतीय साहित्यस्य प्रभावः, श्री गजानन शास्त्री, मुसलगांवकर (दिव्यज्योतिः" स. मा. पृ. ३)

यथास्यात्तथा परं भारतीयो मनीषि: प्रश्नमिमं प्रति सततं जागरूकोऽभवत् । असौ हि गम्भीरता-पूर्वकं मानवीयोच्चारणप्रक्रियाया:-अधिकाधिकध्वन्येकत्रणं कृत्वा एकस्या: सर्वाङ्गीणाया लिपेर्विकासो विहित: । एतावदेव नहि स हि ध्वनीना-मुपरि गम्भीरं चिन्तनं कृत्वा तदर्थमेकं विशिष्टं शास्त्रं निर्मितवान् । इदमेव हि व्याकरण-शास्त्रम् । व्याकरणस्य तथा लिपेर्व्यवस्थाया वैज्ञानिकनिर्माणं भारते सर्वेभ्यो देशेभ्य: पूर्वमकरोत [(1)]। पाश्चात्या अपि सप्तमाष्टमशतकयोर्भारतीय-व्याकरणस्याविर्भावं स्वीकुर्वन्ति [(2)] । न जाने भाषाया एवं विधव्याकरणनिर्माणे कियत्-जन्मानि लगितानि । दीर्घेऽस्मिन् काले ये किल कालकवलिता न बभूबु स्तेषामप्याचार्याणां नाम-सूची पर्याप्तदीर्घा । पाणिनिरपि-एवं विधानेकसंस्कृत-वैय्याकरणानां स्मरणं करोति ये तस्मात् पूर्ववर्तिन: आसन् । पाणिनित: पूर्वाचार्या:-र्यैलिपे: व्याकरणस्य च क्षेत्रे कार्यं विहितमासीदेवम् विधा: —अष्टषष्टिमिता:- आसन्-इति प्राध्यापको बर्नेलो लिलेख [(3)]। अद्य सकलमपि जगत्-एषां महीयसां भाषाशा-स्त्रिणामधमर्णतां स्वीकरोति [(4)]। एतदपि च मन्यते यद्व्याकरणविज्ञानस्याधारशिला संस्थापका: भारतीया एव [(5)] । अस्य कौशलस्य प्रमुखकारणन्तु भारतीयानां व्याकरणम् प्रति साधना निष्ठा चैव विशेषत: [(6)] । भारतीयै: शब्दसाधनम् कृतम् । अक्षरञ्च ते अ-क्षरमित्याहु: । अर्थात् न क्षरतात्यक्षरम् । इयमेव भारतीयाना-मास्तिकबुद्धिरक्षरब्रह्मकल्पनाम् करोत । यथाह भर्तृहरि: वाक्यपदीये—"अनादि-निधनं ब्रह्म शब्दतत्वम् यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ।" अक्षर-

---

(1) अंग्रेजी 'ग्रामर' शब्दस्य मूलभूतो ग्रीकभाषाया अर्थ: "लेखनस्य कला" । थ्यौरिटिकल लिंग्विस्टिक—लियोन ।

(2) The most scientific grammar, that world has ever produced with its alphabet, based on thoroughly phonetic principals was composed in India about 7th and 8th century B.C.
गोल्डस्टुकर (पाणिनि एण्ड हिजप्लेस इन संस्कृत लिटरेचर) ।

(3) फोनेटिक्स इन एन्शियेन्ट ईण्डिया: डब्ल्यू० एस० एलन (न्यूयार्क) पृ० २ ।

(4) It is a common place of linguistics to acknowledge the debt we own to the Indian Grammarians.

Prof. Parth "Introduction to the Devnagari script" H. N. Lumbart's forword. Page 1.

(5) प्रो. मलेट: तस्यामेव भूमिकायाम् ।

(6) आसन्नं ब्रह्मणस्य तमसामुत्तमम् तप: । प्रथमं छन्दसामङ्गमाहु व्याकरणं बुधा: । वाक्यपदीये भर्तृहरि: ।

ब्रह्मस्यैषा परिकल्पना आ-उपनिषद्गीतादिभ्योऽधुनातमग्रन्थेषु सर्वत्र व्याप्ता। यथा मुण्डके—"यथा सुदीप्तात् पावकात् स्फुलिङ्गाः सहस्रशः प्रभवन्ते सुरूपाः। तथाक्षराद् विविधाः सौम्यभावाः प्रजायन्ते ऽत्र चैवापि यान्ति।" इत्थमेव गीतायाम्-"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते"। व्याकरणस्य क्षेत्रेऽपि-अक्षरस्य परिव्याप्तिः परमव्यापका (1)। ऋक् प्रातिशाख्येऽक्षरस्य विवेचनं कुर्वद्भिः कथितमिदं यदक्षरे कदाचिद्-शुद्धस्वराः, कदाचिच्च स्वरव्यञ्जनौ, एवमेव कदाचित् स्वरानुस्वारौ, ततश्च स्वर व्यञ्जनानुस्वाराः सर्वं एव सन्निहिताः भवन्ति। "सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्।"

देवनागर्या वैशिष्ट्यम्

१. देवनागरी लिप्याः प्रत्येकं लिपिचिन्हमक्षरम्। इदमेव अस्या प्रथमं वैशिष्टयम्। आंग्लशब्दावल्यां 'सिलेबिल' शब्दोऽक्षरस्य कृते प्रयुज्यते। अत एव देवनागरी लिपिः (सिलैबिक) अक्षरात्मका वर्तते। यतोहि अस्माकं सर्वेषां व्यञ्जनानामन्ते "अ" समाहितो भवति। यथा—

क + अ = क।
ख + अ = ख।

इयमेका महती वैज्ञानिकी विशेषता। लेखनकाले ऽ कारस्य मुहुर्मुहुरावृत्तिकरणस्यावश्यता न भवति अनेन। अयमस्य गुणस्य सर्वोपरि लाभः। शब्दस्याकारः लघ्वायते। लेखने च स्वल्पावसरो लगति। उदाहरणार्थमांग्लभाषाया शब्दद्वयी प्रस्तूयते—

(1) Narrowmindedness नैरोमाइण्डेडनैस।

अत्र षोडष वर्णानां शब्दोऽय-मांग्लभाषाया देवनागर्यामेकादशाक्षरेष्वेव पूरितो भवति।

(2) Acknowledgement एकनालिजमैन्ट

अयमांग्लभाषाशब्दः पञ्चदशवर्णात्मकः नागर्यां केवलमेकादशाक्षरैरेव लिख्यते।

अनेन सम्यक्तया सुस्पष्टं भवति यत्–लेखनेऽप्यतीव संक्षपो भवति नागरीलिप्याम्। आंग्लभाषायां विंशतिवर्णानामथवा द्वाविंशतिअक्षराणामपि शब्दाः सामान्यतया मिलन्ति परम् सुरभारत्यां क्वचिदेव-एवं विधाः शब्दाः द्रष्टुम् शक्यन्ते। यत्र कुत्रचित् मिलन्त्यपि तत्र केवलम् सूत्ररूपा समस्तरूपा वा। संस्कृते समासानां

---

(1) द रैनेसाँ आफ देव नागरी अक्षरजः प्रेमकृष्णभटनागर दिल्ली।

सहयोगेन सूत्राणां च साहाय्येन या संक्षिप्तता भवति लेखऽनेर्थे च सा परमविलक्षणाश्चर्यमयी च । एतस्य विशाललघुशब्दयोः प्रयोगस्य मुख्यं कारणं देवनागर्याणम् अक्षरात्मिकता तथा आंग्ललिप्या वर्णात्मिकता एव नात्र संशयः । देवनागर्यां यत्र घनत्वं वर्तते तत्रैवांग्ललिप्यां विकीर्णता विद्यते । इदमेवास्ति मुख्यं कारणं यद्यदि संस्कृत-शब्दाः आंग्ललिप्यां लिखिताः स्युस्तु द्विगुणं त्रिगुणम्वा स्थानमाच्छादितं भवति । यथा–घटः (वर्णत्रयम्) GHATAH (षड्वर्णसमूहः)

षष्ठः (वर्णत्रयम्) SHASHTAH (वर्णाष्टकम्)

१. इत्थं श्रम-समय-स्थानदृशा देवनागर्याः वैज्ञानिकता महत्वपूर्णा । अत्रेदमपि–अप्रासंगिकं न स्याद्यत् देवनागर्यां टंकणं, तारप्रेषणञ्चातीव स्वल्पमूल्येन भवितुं शक्नोति । एतदर्थमेव प्रसिद्धो वैय्याकरणः श्री किशोरी दासो वाजपेयी तारप्रेषनार्थं देवनागरीमेवोपयुक्त मनुते (1) । नागरी मात्राभिरपि स्थानलाघवकर्मणि महीयान् सहयोगो विधीयते । आंग्लभाषायान्तु पूर्णवर्णोल्लेखः परमावश्यकः ।

३. लिपेरिदमपि महत्वपूर्णं कार्यमस्ति यल्लेखने सारल्यं स्यात् । तत्र शैघ्र्यमपि भवेत्, लाघवमपि च भवतु । अस्य प्रयोगस्य संसाधनं नूनमेवातिकठिनो कार्यमासीत् । एन्साइक्लोपीडिया ब्रिटैनिकायामस्य विषये रुचिकरा चर्चोपलभ्यते (2) । अनया दृष्ट्या सर्वासु लिपिसु श्रमसाध्या चीनी-भाषायाः लिपिरस्ति । यतोहि तत्राधिकांशवस्तु-ज्ञानायाद्यापि चित्रलिपिरेव प्रयुज्यते । अनया दृशा देवनागरी लिपिरेव सर्वासु सरला । इयं लिपिः केवलं तिसृणां ज्यामितीयाकृतीनां अभ्यासमात्रेण सर्वापि शिक्षितुमधिगन्तुं च शक्यते (3) ।

१. सरलरेखा = म प स ।

२. सरलवक्रचापौ = य, = म, ल, ह ।

३. ग्रन्थ्यनुस्वारौ = थ, = श्र ।

इत्थं किल रोमन-लिप्या z, y, f, g, q आदि वर्णाः कठिनाः । परन्तु ये o ओकारमाश्रित्य वृत्ताकारेषु वर्णा लिख्यन्ते तेषां लेखने रोमनलिप्यां नागरीतोऽप्यधिकं सौविध्यं भवति । यतोहि तत्र लेखन्यासमुत्थापितस्य विरामस्य वावश्यकता नैव भवति । नागर्यञ्च तद् भवति । आरब्य-पारस्यभाषायोः उर्दूलिपिराभ्यां कठिना । सर्वाधिकश्रमसाध्यापि च । परन्तु तत्र नागरीवदेकीकृत्याक्षार

(1) हिन्दीशब्दानुशासनम्ः पं. किशोरीदास बाजपेयी, ना. प्र. सभा भूमिका ।
(2) एन्साइक्लोपीडिया ब्रिटैनिका, खण्डम् २, पृ० ८१३ ।
(3) एन. सी. आर. टी. आई. दिल्ली । डा० मा० गो० चतुर्वेदः ।

ज्ञानेनैव कार्यं कर्तुं शक्यते (1)। परन्तु - आंग्लभाषायां लिपिचतुष्टयज्ञानमावश्यकम्।


यथा

A B C D	मुद्रणस्य टंकणस्य वा स्थूलाक्षराणि।
a b c d	,, ,, लघ्वक्षराणि।
A B C D	लेखनस्य स्थूलाक्षराणि।
a b c d	,, लघ्वक्षराणि।

देवनागर्यां नेदं लिपि-जालम्।

४. देवनागर्यां वर्णानां विभाजनक्रमो न केवलं वैज्ञानिकोऽपितु कलात्मक एव। अनया विशेषतयैव देवनागरी विश्वेऽद्वितीया। सम्पूर्णोऽपि—अक्षरसमुदायो वर्गद्वयां विभाजितः। स्वराः व्यञ्जनानि च। सम्पूर्णा अपि स्वरा आदौ परिगणिताः व्यञ्जनानि च पश्चात्। स्वरा अपि ह्रस्वदीर्घ मूलमिश्रितजिह्वाग्र-जिह्वापश्चादि-क्रमेण संयोजिताः।

अ (मूलो ह्रस्वश्च) आ (मूलो दीर्घश्च) एवमेव इ ई उ ऊ एव क्रमेण। मिश्रिताः संयुक्ताश्च स्वरा अपि ए ऐ ओ औ—अनेनैव क्रमेण विन्यस्ताः।



व्यञ्जनानां विभाजनमितोऽपि सूक्ष्मतया विहितमस्ति। सम्पूर्ण-व्यञ्जनानि पञ्चसु वर्गेषु विभक्तानि। येषां नामानि वर्गस्यादिमाक्षराणामुपरि संस्थापितानि।

यथा—कवर्गः, चवर्गः टवर्गः, तवर्गः, पवर्गः, एवम्। यरलवान्तस्थेषु शषसहाश्चोष्माणेषु परिगणिताः। वर्गाणामेव च पुनर्विभाजनमन्यदपि सूक्ष्मतमं वैज्ञानिकञ्च। प्रत्येकवर्गस्य प्रथमतृतीयौ अल्पप्राणौ, द्वितीयचतुर्थौ महाप्राणौ, प्रथमद्वितीयावघोषौ,

---

(1) कीलाक्षर मयानि-अक्षराणि उर्दू मुद्रणस्याधुना प्रचलनं नास्ति।

तृतीय-चतुर्थौ च सघोषौ व्याख्यातौ। प्रत्येकस्य वर्गस्य च पञ्चमवर्णः- अनुनासिको भवति । वर्णानां प्रथमद्वितीयक्रमोऽपि मुखविवरे तेषामुच्चारणानुसारमस्ति निर्धारितः । अनेन विस्पष्टमस्ति यत् देवनागर्यां वर्णविभाजनं नितान्तसूक्ष्मं वैज्ञानिकञ्चास्ते । एवं-भारतीयध्वनिशास्त्रकाराणामस्य विभाजनस्योपरि विश्वस्य भाषाशास्त्रिणः परमाश्चर्यान्विताः ।

अपरतश्च-उर्दू भाषाया प्रथमं अलिफः (स्वरः) समागच्छति तदनन्तरञ्च बे, ते, से, इत्यादिव्यञ्जनानि समायान्ति । "ऐन" एषः स्वरः मध्ये "ये" अयं स्वरश्चान्ते समायाति । रोमनलिप्यामपि इयमेवाव्यवस्था दृश्यते। ए. ई. आई. ओ. यू. एते स्वराः कमपि समुपयुक्तं वैज्ञानिकमाधारं विहाय स्वेच्छया वर्णमालाया मध्ये समायान्ति । व्यञ्जनानामपि तत्र नास्ति किमपि विभाजनम् । अतः सुस्थिरं सुस्पष्टञ्चेदं यद्रोमनलिप्यामपि वर्णमालाया किमपि वैज्ञानिकं विभाजनं वर्गीकरणं वा नास्ति । प्राध्यापको मैक्डानलः-इत्यालोक्य एव रोमनभाषाया वर्णमाला-वैज्ञानिकताविषये विस्तारेण क्षोभम् प्रकटयामास (1) ।

५. लिपिचिन्हानां वर्गीकरणेन सहैवैकमन्यतथ्यमपि लिपिचिन्हानां नाम्नामपि वर्तते । आरव्यां पारस्यां उर्दू भाषायाम्वा लिपिचिन्हानां नामकरणम् क्रमशः "अलिफ, बे. पे. ते" इत्यादिरूपेण कृतम । परं सत्यन्त्विदमस्ति यत्-एभिः अ, ब, प, त, ध्वनीनां बोधो भवति । न तु बे पे ते इत्याद्यक्षराणाम् । अतः सुस्पष्टमिदं यदेषां नामकरणमवैज्ञानिकम् । एभिः- ब+ए, त+ए ध्वनीनाम् व्यक्तीकरणं भवति । उर्दू वर्णमालायां 'यः' ध्वनिरन्तेऽस्ति । परन्तु लिपिचिन्हानां नामकरणे सा प्रथममेवायाति । ध्वनिशिक्षां विनां तस्योच्चारणाशा सर्वथा तर्कहीनो व्यापारः । बे, पे, ते आदिषु तु कुशलं मन्यतां परं 'अ' ध्वने व्यक्तीकरणाय सऽप्रथमं लिपिचिन्हं "अलिफ" प्रयुज्यते । अस्य स्थितिश्च परमोपहासजनका । अ+ल + इ+फ इत्थमयं चतुर्णां ध्वनिग्रामाणां समूहोऽस्ति । "ज्वाद" अयं शब्द इतोऽप्यधिक-

(1) "We Europeans 2,500 years latter and in a scientific age, still employ an elphabet, which is not only inadicted to represent all the sounds of our language, but even preserves the random order, in which vowels and consonents are jumbledup, as they were in the Greek adeption of the premitive semitic arrange of 3000 years age".

— A History of sanskrit literature,
Prof. Mecdonell.

ग्रामकोऽस्ति । अस्मिन्—ज्+उ+व+द्+आ+द इत्थं ध्वनिग्रामपञ्चकमस्ति । यदानेन एकस्या एव 'ज' ध्वनेरभिव्यक्ती क्रियते । स्पष्टमेवेदमप्यस्य नामकरणं तर्कहीनमवैज्ञानिकञ्चास्ते ।

रोमनलिपिचिन्हेष्वपीदमेव काठिन्यमस्ति । अकारस्य वकारस्य च ज्ञापकौ वर्गौ "ए. बी." वस्तुतः अ+ए, ब+इ इत्थं द्वयोर्ध्वनिग्रामयोः संयुक्तरूपौ । एक्स, वाई, जेड आदयस्तु त्रिभिस्त्रिभिर्ध्वनिग्रामैर्विनिर्मिताः । 'डब्ल्यू' विशेषतो विचारणीयः । (ड+ब्+अ+ल+य्+उ) अत्र पञ्चभूतानामपि समाप्तिर्भवति अस्य संरचनायाम् । स्पष्टमस्ति यदेतादृशी–अवैज्ञानिकता संस्कृतस्य नागर्यां नैव वर्तते । तत्र अकारः 'अ' ध्वनेः वकारश्च व ध्वनेरेव प्रातिनिध्यं करोति ।

६. रोमनवर्णमाला केवलं वर्णात्मिका । साक्षरात्मिका कर्तुं न शक्यते । यदा देवनागरी वर्णमालाया कस्याप्यक्षरस्य स्वरादपि पृथक्कृत्वा लेखनं सम्भवम् । 'दर' शब्दो हि द्वाभ्यामप्यक्षराभ्यां लिखितुं शक्यते द्+अ+र्+अ एवमपि चास्य विभाजनं सुलभम् । अस्य गुणस्योपरि पाश्चात्यानां ध्यानं न गतम् । अत एव कतिपय पाश्चात्य भाषावैज्ञानिकाः देवनागर्या गुणाङ्कनं कर्तुं न शक्ताः [1] ।

७. लिपेरयं सर्वतोऽधिको महीयान् गुणोऽस्ति यद्वक्तुर्ध्वनेः याथातथ्यमङ्कन स्यात् । अत एव हाकेटमहाशयेन स्वग्रन्थस्य 'राइटिंग' नामकाध्याये (मार्फीम ग्रेफीमयोः) अत्यधिकसामीप्ये बलं दत्तम् [2] । देवनागरी लिपिरप्यनया दृष्ट्या–आदर्श लिपिरस्ति । इयं पूर्णतायाः सन्निकटे । रोमन-उर्दू लिपि-युगले नेदमस्ति । आंग्लभाषायां यदा 'टाक' कथ्यते तु टाल्क लिख्यते । इत्थमेव च 'वाक' कथने वाल्क इत्येवं लिख्यते । 'यू' इत्यस्योच्चारणेऽनावश्यकरूपेण 'ओ' 'यू' योगेन (you) अस्य लेखनम् भवति । उर्दू भाषायामपि (बिल्कुल) पूर्णतः अस्य शब्दस्योल्लेखः (बाल्कुलो) एव लिख्यते । अतः स्पष्टरूपेण कथयितुं शक्यते यदासु भाषासु ध्वनि-उच्चारणे लेखने च मिथो महीयान् भेदः ।

८. लिपिविशेषस्येदं दायित्वमस्ति यत्तेन भाषायामुच्चारितानां सर्वध्वनीनामङ्कनं क्रियेत । आंग्लभाषायां दिस. (इदम्) चेयर, (आसनम्) थिन (प्रतनुः) आदि शब्दास्तु सन्ति परन्तु मूल ध्वन्यः द, च, थ, इत्यादयस्तत्र न सन्ति । केवल (एच) संयोगेन कार्यं प्रचाल्यते ।

---

(1) फोनिटिक्स इन एंशेंट इण्डियाः डब्ल्यू. एस. एलेन (न्यूयार्क) पृ. ८ ।

(2) ए कोर्स इन मोडर्न लिंग्विस्टिक्सः चार्ल्स एफ. हाकेट (न्यूयार्क) पृ. ५४०

७५-४।१९

महाप्राणध्वनिषु (एच) इत्यस्य सम्मिश्रणेन कार्यं प्रचलति परन्तु अल्पप्राणस्य 'द' इत्यस्य (th) अनेन व्यक्तीकरणम् न केवलं-अव्यावहारिकमपितु—अवैज्ञानिक-मप्यस्ति। स्पष्टमिदं यत् रोमन-लिपिरांग्लभाषिणामावश्यकतां नैव पूरयति। उर्दू लिप्यामपि ध्वनिचिन्हानामभाव एव। तत्र (ज़ेर, ज़बर, पेश) आदीनाम् चिन्हानि—अंकयित्वा कार्यं प्रचाल्यते।

९. लिपेरियमपि क्षमता परमावश्यकास्ति यत्सा सामान्यरूपेण किञ्चित् स्वल्पपरिवर्तनेन वान्यभाषाभाषिणामपि ध्वनीनामंकनं कर्तुं शक्ता भवेत्। उदाहरणार्थं हिन्द्यां जिह्वामूलीयो (ज़ेड् क़ाफ, गाफ)—आदि-ध्वनयः—व्यक्ता न भवन्ति सौकर्येण, परन्तु तथापि क-ख-गानां निम्नैरनुस्वारप्रयोगेणासां ध्वनीनामुच्चारण-मस्माभिः स्पष्टतया कर्तुं शक्यते। यथा काग़ज, ज़्वरन। परन्तु देवनागर्याः 'ण' एषा ध्वनिर्नान्यासु—आरब्य-पारस्यउर्दू रोमनादिलिपिषु लिखितुं शक्यते। इदमेवास्ति कारणं यद् ब्राह्मण शब्दस्योल्लेखो न उर्दू भाषायां न चापि रोमन-भाषायां शुद्धरूपेण लभ्यते। उर्दू—भाषायान्तु' बिरहमन' एवम् रूपेणास्य शब्दस्यो-च्चारण क्रियते। एवमेव 'गौं' शब्दोऽपि न किलोभय-लिप्यो र्लिख्यते।

१०. संयुक्ताक्षरप्रणालिरपि देवनागर्या महती वैज्ञानिकोपलब्धिरस्ति। अनया किल लिप्यां 'यथातथ्यता' (Exactness) समागच्छति। "अच्छः" शब्दोऽयं आंग्लभाषायां शुद्धरूपेण नैव लिखितुम् शक्यते। यतोहि तत्र संयुक्ताक्षराणां न कापि व्यवस्था। तेषां स्वकीया शब्दा अपि वास्तविक ध्वनितो नितान्तदूरतमा भवन्ति। यथा (Few, New) एषु फ़,-न,-वर्णों उच्चारितौ भवतः। उर्दू लिपि रोमन लिप्यपेक्षया किञ्चिद् श्रेष्ठा परं तत्रापि-अधि ध्वनीनां कृते प्रातिनिध्यं नैव मिलति। कथनस्यायमाशयो यत् यथातथ्यता संयुक्ताक्षरै र्विना नैव समायाति। यथा अच्छः अय शब्दस्तत्र अछः एव लिख्यते। यतोहि तत्र छकारस्य ध्वनिरेव नास्ति तासु लिपिषु। इदम च तासां वर्णविचारोपरि निर्भरमस्ति।

११. स्वराणामपेक्षाकृताधिक्यं देवनागरीलिप्यं वैज्ञानिकाधारं प्रददाति। स्वराणां कारणेन देवनागर्यामन्यलिपीनामपेक्षया ध्वनेर्व्यक्तीकरणमधिकपूर्णतया कर्तुं शक्यते। आंग्ल्यां उर्दू भाषायाञ्च स्वराणामभावः शोचनीयः। आंग्ल्यां केवलम् पञ्चस्वरचिन्हानि सन्ति a, e, i, o, u, अत्रैव ह्रस्व—अकारस्य उकारस्य च कृते न कश्चिदपि स्वरः। अत एकैव स्वरो भिन्नेषु सन्दर्भेषु विभिन्नध्वनिव्यञ्जनं करोति। परमनेन बहुबारं न केवलमवैज्ञानिकत्वदोष एव समुदेति—अपितु—उपहा-सास्पदतापि भवति। यथा—(Put पुट, But बट) आदयः शब्दाः। इत्थमेव-(फादर-आ) (गेट-ए) (बौल-ओ) (वाल-आ) - शब्दा उदाहरणरूपेण द्रष्टुं शक्यन्ते।

अत्रैक एव (ए) इत्ययम् स्वरः "फादर-गेट-बौल-वाल"। शब्देषु क्रमशः आ-ए-आ-ध्वनीनां कृते प्रयुक्तः। इत्थमेव च होप—पौट नथिग—वुमैन-शब्देषु "ओ" इदं

स्वर-चिन्हम् क्रमशः ओ-औ-अ-उ-ध्वनीनां कृते प्रयुज्यते। एवमेव च 'यू'। कट-पुट-फ्ल्यूट-आदिशब्देभ्य: स्पष्ट भवति यदांग्लभाषाय। लिप्याः यूस्वरांचन्हम् ध्वनित्रय व्यक्ती करोति। उर्दू लिप्यां केवल त्रय एव स्वरा:। अलिफ-एन-से। एषु अलिफ- एन स्वरौ-अकारध्वनिं प्रयच्छतः यथा (अब्बल एव अबल) एवं तत्र तु स्वराणामकाल एव। परिणामतश्च ध्वनयो भ्रष्टाः—भवन्ति।

१२. शिरोरेखापि नागरीलिप्या एको महान् गुणः। अक्ति-ध्वनिम् शुद्धरूपेणान्यध्वनिभिः सह मेलयित्वा पृथग् रूपेण वा समुच्चारणे शिरोरेखा परमोपयोगिनी। आंग्लयां उर्दू-लिप्याञ्चास्याभावेऽशुद्धम् पठ्यते। अस्माकं कला (Kala) कमलम् (Kamalam) इमौ शुद्धावपि शब्दौ भ्रष्टतां गच्छतः। अनयोरुच्चारणम् काला, कमालम्, कामलम् वेति विभिन्नरूपेण-भ्रष्ट भवति। आंग्लभाषायां षष्टम् Shashtam अयं शब्दः षाष्टम्, षष्टाम एव विभिन्नभ्रष्ट-रूपेण पठ्यते।

उर्दू लिप्यामेव (मीम. ये, लाम) एतेषाँ संयुक्तप्रयोगेण मेलशब्दस्योच्चारण मैल, मेल, मील, मयल, एवं किल विभिन्न-प्रकारेण भवति। एवमेव च काफ-वाव-लाम-अक्षराणां सयुक्तप्रयोगेण कवल-कौल, कौलै-आदि रूपेण शब्दानां पठन भवति। इयमव्यवस्था केवल शिरोरेखाभावेनैवोदेति (1)।

१३. देवनागर्यां एवस्वरस्तु लिखितरूपेण एकामेव ध्वनिं प्रकटयति न स्वरमेव केवलम्। अत्र व्यञ्जनमपि-एकमेवध्वनिं व्यञ्जयति। अत्र तकारेण 'त' ध्वनिस्तथैव च पकारेण 'प' ध्वनिं निकसति। रोमनलिप्यामेकं व्यञ्जन लिखित्वा तस्मात्-अनेकध्वनि-निष्कासनम् भवति। हाकेटमहोदयेन तथ्यमिद प्रकटितमपि (2)। (S एस) व्यञ्जन दृष्ट्वा सकार-जकारशकारादीनां रूपेण पठनस्यापेक्षा क्रियते। एवमेवान्यान्यप्युदाहरणानि सन्ति। (सिंग, Sing) गानम्, अत्र सकारध्वनिः, (रोज़, Rose) पाटलम्, अत्र जकारध्वनिः, (Sugar शुगर) सिता, अत्र शकारध्वनिश्च एस-इत्यस्मात् निकसति विभिन्नरूपेण। अन्येषामपि व्यञ्जनानामियमेव दशा। (एक्सX) व्यञ्जनेन (फोक्स Fox) श्रृगालः अत्र क्स (एग्जेक्टिव Exactive) अत्र ग्ज-इत्थं विभिन्नध्वनि—निष्कासनं भवति। क्वचिद् (TH) इत्यस्य संयोगेन (दिस) अयम् निर्मीयते क्वचित् थिन् (सूक्ष्मं, दुर्बलो वा) इयदेव न परं (CH) संयोगेनानेकध्वनि-व्यञ्जनं भवति। (चार्म—शिवरलेट—आर्क) इत्यादयः शब्दाः द्रष्टुं शक्यन्ते।

एक व्यञ्जनध्वनिं लिखित्वाऽनेकव्यञ्जनध्वनिपठनमालोक्य हाकेट महोदयः पाश्चात्यं वर्णविन्यासं (आर्थोग्रेफी) नितान्तं अनपूर्णमपूर्णञ्च एवमाह (3)।

---

(1) "भाषा विज्ञान सिद्धान्त और प्रयोग" डा० अम्बाप्रसाद सुमन, दिल्ली (पृ. २१७)

(2) ए कोर्स इन माडर्न लिंग्विस्टिक्स, चार्ल्स एफ. हाकेट, न्यूयार्क पृ. ४२१

(3) English orthography fales in many respects.

१४. वैज्ञानिक—दृशा लिपेः सर्वतोऽधिकं वैशिष्ट्यमिदमस्ति यत् वक्ता यदा एकं ध्वनिं समुच्चारयति तु सा एकेनैव ध्वनिसङ्केतेन व्यक्ता भवेत्। यथा पठ्येत तथैव लिख्येत। पठनलेखनयोः, उच्चारणाङ्कनयोश्च मिथो कीदृशोऽपि भेदो न भवितव्यः। ग्लीसनमहाशयोऽपि तथ्यमिमं स्वीकरोति (1)। (one to one) नागर्या तथ्यमिद यदि १००% सत्यं नास्ति तथापि नवनवति प्रतिशतन्तु नूनमेव सत्यं विद्यते। रोमन-लिप्यामियमव्यवस्था भयङ्करा विद्यते। कश्चिद् वक्ता यदि 'क' ध्वनिसमुच्चारणं कुर्यात्, तथा च तस्या अङ्कनार्थं कथयेत् तु श्रोता विभिन्न-प्रकारेणेमं चिन्हयितुं शक्नोति—यथा (सी., के. टी. एच. क्यू.) (cut) कट, (Kitchen) किचन, (Thick) थिक (queen) क्वीन—इत्यादयः शब्दाः—अस्य प्रमाणभूताः। एवमेव शकारस्य ध्वनिः (एस-एच, सी. एच., एस. एस., टी. आई, सी—आई) आदि-विभिन्नप्रकारेण व्यञ्जयितुं शक्यन्ते। (शी–शिवरलेट—एसोसियेशन—अटेन्शन—मिशन) एतेषां शब्दानामध्ययनेनेय दुरवस्था सुस्पष्टा भवति।

स्थितिरेषा लिपेर्महत्या दरिद्रतायाः अपूर्णतायाश्च प्रतीकभूता। एतदर्थमेव प्रख्यातो विलियम जोन्सः—लिलेख इमामेव परिस्थितिम् (2)।

ध्वनेर्यथातथ्याङ्कनदृशा तथा—एकध्वनिकृते एकस्यैव लिपिचिन्हस्य दृशा उर्दू लिप्या दशा इतोऽपि चिन्तनीया। तत्रानेकध्वनयः एकध्वनिचिन्हाश्रिता। 'स' अस्य ध्वनेः कृते "स्वाद-सीन-से" एतत् ध्वनित्रयं—अस्ति। "ज" ध्वनिकृते "जाल जे, ज़्वाद-जो-ध्वनिचिन्हानि सन्ति। एतावदराजकतायामपि लिपिद्वयमिदं भारते यवनांग्लशासनकाले राज्यशासनञ्चकार। किमाश्चर्यमतः परम्। इत्थं किल राजकृपया असम्भवमपि सम्भवम् भवति। अतएव प्रसिद्धो भाषाविज्ञः डा० श्री सुनीतिकुमार चाटुर्ज्या महाशयः सत्यमेवाह—"जगतोऽन्यस्मिन् कस्मिन्नपि देशे पारस्यारब—लिपेरवगुणाः—अस्याः राष्ट्रलिपिनिषेधाय पर्याप्ताः-अभविष्यन् (3)। अस्या महत्या अराजकताया सिद्धयेऽस्माभिरुदाहरणमेकं प्रस्तूयते। पूर्वीय–युवरूपस्य (Europe) एकं जलपोताश्रयस्थानं वर्तते। अस्य नाम "कुस्तुन तुनियां" एवमस्ति। उर्दू लिप्यामस्य लेखनमसख्यप्रकारेण कर्तुं शक्यते। यद्यस्य समानमेव 'कुस्तुनतु-जित' शब्दस्य परिकल्पना क्रियेत तस्य लेखनमपि—अगणितप्रकारेण भवति। तथाप्यस्य सूक्ष्मगणना अनेन प्रकारेण क्रियते।

---

(1) Discriptive linguistics एच. ए. ग्लीसन (न्यूयार्क) पृ. ४१८

(2) Our English alphabet and orthography are disgracefully and almost rediculous imperfect.

(3) भारतीय आर्य भाषा और हिन्दीः डा० सु. कु. चैटर्जी दिल्ली पृ. २३४

१.	तकारकारणेन	२	३ त्रिभिः प्रकारैः ।
२.	तुकारकारणेन	३×२	६ षड्भिः प्रकारैः ।
३.	जकारकारणेन	३×२×४	२४ चतुर्विंशति प्रकारैः
४.	तुकारकारणेन	३×२×४×२	४८ प्रकारैः
५.	जिकार कारणेन	३×२×४×२×४	१९२ ,,
६.	तकारकारणेन	३×२×४×२×४×२	३८४ ,,
			६५७ सर्वयोगः ।

चेदिदं गणितं शुद्धमस्ति तदा लिपेरराजकत्वं, अवैज्ञानिकत्वं असामर्थ्यञ्च कल्पनातीतमेव ।

१५. वैज्ञानिकाधारानन्तरमपि देवनागरी-लिप्या महत्ताया चत्वारि-अन्यान्यपि क्षेत्राणि सन्ति ।

(क) ऐतिहासिक क्षेत्रम् ।

(ख) धार्मिक क्षेत्रम् ।

(ग) सामाजिक क्षेत्रम् ।

(घ) राजनैतिक क्षेत्रम् ।

अत्र चतुर्धा विस्तरेण विवेचयितुं न शक्यते विस्तारभिया । परमेतत् सुस्पष्टं यद् भारतीयलिपीषु देवनागरी—एव सर्वोत्कृष्टा । यतोहीयं ब्राह्मीलिपितः समुद्भूता । ब्राह्मी—विषये इदमिदानीं सुनिश्चितमभूत् यदियं भारतीयानामार्याणां स्वकीयमौलिकाविष्कारभूता (1) ब्राह्मी लिपेः कानिचिद् चिन्हानि, सिन्धुघाटी-सभ्यतायाः प्राप्तलिपि – समानानि । सिन्धु-लिपिर्हि स्वयं चित्रात्मिका-अक्षरात्मिका चोभयविधा । सनिश्चयमेव तस्याः पूर्वमपि काचित् लिपिः- आसीदेव (2) इत्थं किल देवनागर्याः सम्बन्धः-आदिकालीनभारतीयलिप्या सह संस्थापितोऽस्ति-एव । आधुनिकलिपिभिः सह तु नागर्याः सम्बन्धो ऽस्ति नाम नूनम् । अतः—देवनागरी एकास्माकीना सुदृढ़ ऐतिहासिकी शृखला (3) ।

(1) भारतीयप्राचीन लिपिमालाः गौरीशंकर हीराचन्द ओझा. पृ. २४ ।

(2) सिन्धुघाटी से प्राप्त लिपि के अक्षरः ब्राह्मीके अक्षर देवनागरीके अक्षर ।

(3) डा० सुमन के भाषाविज्ञान सिद्धान्त और प्रयोग, पृ. २१३ आधारोपरि संक्षिप्त आदिकालीनवैदिकलिपि. सिन्धुघाटी लिपि, ब्राह्मीलिपि ।

देवनागर्या :—धार्मिकक्षेत्रमतीवविस्तृतम् । जन्मात्-मरणं यावत् यत्किमपि संस्कारजातं भवति तद् सर्वं देवनागर्यां लिखितसंस्कृतभाषायाः कर्मकाण्डग्रन्था-नुसारमेव भवति । वेदाः, पुराणानि, रामायणम्—महाभारतम् उत्तरकालीनं महत्वपूर्णं साहित्यं नागर्यामेव विराजते । समस्तभारते ऽ संख्यानि मन्दिराणि सन्ति तत्र तत्र सर्वत्र धार्मिकं साहित्यं नागर्यामुपलभ्यते (1)। तान्त्रिकाणां मान्त्रिकाणा-ञ्चैषा एव लिपिः सर्वप्रिया। अनेकैः सन्तैः साधुभिश्च धार्मिक स्तोत्र-साहित्यं चास्यामेव लिप्यां निर्मितम् । इत्थम् किलाद्य देवनागरी धार्मिक क्षेत्रे सर्वाधिक-लोकप्रिया वर्ततेऽस्माकं देशे ।

नागरी लिपिः—न केवल संस्कृतसाहित्यक्षेत्रे एव प्रयुज्यतेऽद्य । इयं हिन्दी-भाषाया अपि लिपिरस्ति । हिन्द्याः व्रजभाषाभाषिसमाजः युवरूपस्यानेकदेशानां सम्पूर्णसमाजादप्यधिकः । अतः—एतावान् जनसमूहः—योहि स्वयमेव संख्यायामेको महाद्वीपोऽस्ति—यस्यां लिप्यां स्वविचारान् प्रकटयति. तस्या लिप्याः स्थानं न केवलं भारत एवापितु विश्वस्मिन् विश्वे ऽपि महत्वं स्वीयं संस्थापयति ।

राजनैतिक दृशा च देवनागरी भारतस्य राष्ट्रलिपिरस्ति—एव ।

इत्थं देवनागरी वैज्ञानिकगठन—ऐतिहासिक-परम्परा—सामाजिकगौरव—राष्ट्रियसम्मान-आदिभिः प्रत्येकदृष्टिकोणैर्महामहिमामयी । परमस्याः स्वरूपे सामयिकावश्यकता पूर्तये येषामावश्यकसुधाराणामावश्यकताऽनुभूयते तेऽवश्य करणीया । परमेते सुधाराः समाजानुकूला साहित्यानुसारिणश्च स्युः ।

अस्याः वैज्ञानिकता, राष्ट्रियं गौरवं, विशाला सांस्कृतिक परम्परा एतत्सर्वं संकेतयति यत्-भारतीयाश्चेत् प्रयासं कुर्युस्तु न केवलमियमन्ताराष्ट्रियकार्यें परमोपयोगिनी स्यात् परं विश्वस्य समस्तलिपिमूर्धन्यत्वभूता विश्वप्रिया भविष्यति (2) । कोशविद्यायाः कृते—या विद्या शुद्ध-शब्दार्थ-प्रदानस्य मुख्यं साधनं-लिपिरेषा परमोपयोगिनी ।

इत्थं कोशवाङ्मयस्य घटकत्वेनाक्षर-वर्ण-शब्दार्थलिपि–आदीनां कोशाधा-राणां सम्यक् समीक्षां कृत्वा ऽतीव संक्षेपेणाधुना कोशादिविषये विचार्यते ।

---

(1) स्प्रिट् हैज एज्यूम्ड ए मिस्टिकोरेलीजन सिग्नीफैन्सगवेषणका संगोष्ठी अंक (जनवरी १९६९ पृ० १८५)

(2) श्री बालकृष्ण अकिंच न देवनागरी लिपि और वैज्ञानिकता । नागरी प्रचारिणी पत्रिका सम्वत् २०२७ अंक ४ ।

कोशविज्ञानम्

कोशः—इत्यस्य शब्दस्योल्लेखो द्विधा भवति। मूर्धन्यषकारस्याथ च तालव्यस्यापि प्रयोगो दृश्यते (1)। तद्यथा कोषः—कोशश्च। यद्यपि प्राचीनसंस्कृतकोशेषु "ष" इत्यस्य मूर्धन्यशकारस्यैव प्राधान्येन प्रयोगोऽस्ति तथापि वर्तमानकाले 'श' अस्य तालव्यशकारस्य प्रयोग एवैकरूपता संस्थापनार्थं स्वीकार्यः। धनागारस्य कृते "कोषः" अयं शब्दः, शब्दभण्डारस्य कृते च "कोशः" इत्ययं शब्दः समीचीनः। भारतस्यान्यभाषाविदुषां कृतेऽपीदं मतम् स्वीकार्यम् (2)। तेषां मतानुसारमुभयोः शकारयोरर्थेऽपि भेदः। अतो विशेषार्थेषु मूर्धन्यस्यान्यार्थेषु च तालव्यस्य प्रयोगः-करणीयः। क्वचिच्च कोषशब्दः पुल्लगे प्रयुक्तो ऽन्यत्र च त्रिषु लिङ्गेषु 'कोश' शब्दस्य प्रयोगः। परमिदं वैशिष्ट्येन नास्ति तात्त्विकम्। शब्दकल्पद्रुमेऽस्य शब्दस्योभयरूपयोर्व्युत्पत्तिप्रदर्शनमित्थं लभ्यते—

कोशः– पु० कुश्यते सश्लिष्यते कुश संश्लेषणे
घञ्कर्तरि चेति अधिकरणवादौ घञ्।

कोष :—पु० क्ली, कुष्यन्ते आकृष्यन्ते फलपुष्पोत्पादकमधुमयपरागादयो यस्मिन्।

कुष् ग निष्कर्षे+घञ् कर्तरि चेति अधिकरणे घञ्।

इत्थमयं कोशशब्दो द्विविधोऽपि-विभिन्नार्थेषु प्रयुज्यते—शास्त्रानुसारमुभयोः प्रयोगः शुद्धः।

तद्यथा कलिका-खड्गाच्छादक-धनसमुदाय - जातिकोष-भाण्डार—दिव्य—योनि पानपात्रचषक-धनसंहिति—अण्डआवासगृह-शरीर-पुस्तकागार-निकरनिष्कासितनवीन-सुवर्णरजत - आवरणविशेष - वीजकोश — मुकुल - शपथ - ग्रहसम्बन्धिएकदिवस — लिङ्ग--परिवारादिविभिन्न शब्दार्थेषु प्रयोगो दृष्टस्तच्चाधस्ताद्दीयते–

"ततो निक्षिप्य चरणं रक्तावृते मेषचर्मणि।"
कोषं चक्रतुरन्योन्यं सखड्गौ नृपडामरौ ।। राजतरङ्गिण्याम् ५।३३५
कोषो बल चापहृतं तत्रापि स्वपुरे ततः।—मार्कण्डेय पुराणे देवी माहात्म्ये।
कोषोऽस्त्री कुड्मलेऽर्थौघे गुह्येण्डे शास्त्रदिव्ययोः।

---

(1) 'कोषो मूर्धन्यान्तः तालव्यान्त इत्यन्ये' हलायुधकोशः पृ. २५०।

(2) यह अभिमत 'हिन्दीविश्वकोश' के प्रधान सम्पादक और प्रसिद्ध भाषा-वैज्ञानिक डा० धीरेन्द्र वर्माका है। संस्कृत कोशो में 'ष' वर्णकी प्रधानता देखते हुए पहले प्रस्तुत प्रबन्धमें भी 'ष' का ही प्रयोग किया गया था, जिसको बादमें संशोधित करना पड़ा। एक रूपता रखनेके लिये समस्त ग्रन्थमें 'श' वर्ण ही अपनाया गया है, भले ही भूल से कही 'ष' रह गया हो।

गृहे देहे पुस्तकौघे पेश्यामसिपिधानके ॥ नानार्थरत्नमालायाम् पृ. ५७
स्यात् कोशश्च हिरण्यं च हेमरूप्ये कृताकृते—अमरकोशे २।९।९२
अव्यक्तमाहु हृदयं मनश्च, स चन्द्रमाः सर्वविकार कोशः
— श्रीमद्भागवते २।१।३४
यो वा-अयं द्वीपः कुवलयकमलकोषाभ्यन्तरकोशः । श्रीमद्भागवते ५।१६।६
तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पकजकोशयोः श्रियम् ॥ रघुवशे ३।८
काशोऽस्त्री मुकुले दिव्ये शस्त्रार्थौघे गृहे तिथौ ।
शिश्ने जातिफले खड्गपिधाने यानिवित्तयोः ॥ नानार्थमञ्जर्याम् (राघवः)
कोषो दिव्ये वने पेश्यां परिवारे च कुड्मले
जातीकोषे धनाकारे चषके योनि-शम्बयाः । अनेकार्थ तिलके (महिपः)
तमध्वरे विश्वजिति क्षितीश ।
निःशेष—विश्राणितकोषजातम् ॥ रघुवशे ।
कोषो दिव्यधनेऽपि स्यात् कुड्मलासि पिधानयोः
पनस्यादिफलस्यान्तः कोषः शब्दस्य संग्रहः— त्रिकाण्डचिन्तामणौ ' पृ ६४"
"मेदिनीकोशे शब्दादिसंग्रहार्थे कोशशब्दप्रयोगः" ।

विवेकचूडामणौ अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयकोषाणां वर्णनं कृतमस्ति ।

इत्थं किल विभिन्नगौणार्थानन्तरमस्य शब्दस्य प्रचलितोऽभिधेयार्थश्चायम्— "यस्मिन् ग्रन्थे अर्थेन पर्यायेण च सह शब्दाः- एकत्री क्रियन्ते स कोशः" । तस्याति-व्यापक-सर्वप्रसिद्ध-लोकप्रियमूलभूतलक्षणन्तु "शब्दसंग्रहः" एव । शब्दा - विविधाः भवन्ति । तेषां संकलनं विभिन्नाधारेषु विभिन्नशैलिषु च भवति । अ एव रामचन्द्र-वर्मा प्रसिद्धः- हिन्दीकोशकारोऽपि —"कोशः शब्दस्य संग्रहः" एतमेव लक्षणं आदर्शरूपं मनुते[1] । अतो "कोशो" ऽयं शब्दः—वर्गवाचकोऽस्ति । पर सामान्यरूपेण कोशस्य तात्पर्योऽयं-शब्दानां स संग्रहः यस्मिन् तेषां शब्दानां प्रचलित-शुद्ध रूपाणां अर्थानाञ्च व्याख्याः प्रदत्ताः स्युः ।

कोशकार:

कोशशब्द इव कोशकार शब्दोल्लेखोऽपि द्विधैव भवति । तद्यथा शब्दकल्पद्रुमे—कोशं (कोषं) करोति त्वक्पत्रादिभिरात्मानमाच्छादयति वा कोशः (कोषः)+कृ+अण्[2] । अस्यार्थस्तु- इक्षुरपि भवति[3] । इक्षुस्तु गुरु-शीत-रक्तपित्तक्षयादि-

(1) शब्द साधना, पृ. ७१ ।

(2) शब्दकल्पद्रुमः, खण्डः २. भागः १, पृ० २०५-२०६ ।

(3) शब्दरत्नावल्याम् ।

नाशको भवति । कोशकारस्तु मूलतोऽथ मध्ये च मधुरो भवति [1] । कोशकारः कृमिरपि भवति [2] । अस्य कर्म कौशेय-कीटवदेव भवति [3] ।

एकस्य जनपद विशेषस्यापि नाम कोषकारः इत्यासीत् [4] । इय किल कोशकार भूरसमराज्यस्योत्तरदिशि चीनदेशमिवानुमीयते [5] । रामायणेऽपि उत्तरजनपदेषु कोशकार जनपदस्योल्लेखो लभ्यते [6] । परमेते सर्वेऽपि प्रयोगाः गौणा एवाप्रचलिताश्च । बहुप्रचलितो मुख्यो मूलभूतोऽर्थस्तु कोशकारस्येत्थम्- "कोषं अर्थसहित–शब्दसंयोजनरूप ग्रन्थविशेषं करोति" कोशशब्दयोः पारस्परिकसम्बन्धः शरीर-आत्मनोः सम्बन्धमिव । एतदर्थमेव शब्दस्य जन्म-विकास-परिवर्तनपरिवर्धनैः सहैव सामान्यलक्षणविषयकधारणा अपि परिवर्तिताः भवन्ति । वर्तमानकाले कोशे शब्द-संग्रहणमेव न भवति परन्तु तेषां सम्यक्-वर्णं विन्यासः—अर्थ प्रयोगौ, पर्यायाश्चेति सर्वं परमावश्यकमस्ति [7] ।

अन्यभाषासु संस्कृतकोशच्छाया

आंग्लभाषायां शब्दकोशानामर्थद्योतकशब्दाः कोशशब्दस्याधारे-एव प्रचलिताः बभूवुः । (डिक्शनरी) शब्दस्य प्रयोगः आंग्ल विदुषा जानगार्लैण्ड महाशयेन १२२८ ईशव्यां शब्दानां सूच्यर्थे विहितः [8] । लैटिन भाषाशब्दानामेका पाण्डुलिपिः स्तेन निर्मिता । तस्याः शीर्षकस्य कृते-एव (डिक्शनरी) शब्दः प्रयुक्तोऽभूत् (डिक्शनेरियस डिक्शनरी) अत्रेदं विशिष्ट महत्वपूर्णमस्ति यत् (लैटिन) भाषाया इयं कोशरूपा आद्या सूची आंग्लभाषा कोशसाहित्ये प्रथमा । अस्याः संकलनं अकारादिरूपेण नैवाभवत् परं वर्गक्रमेणैवेयं निर्मिताभूत् । अतः भारतीयानां कृते महत्वपूर्णविषयोऽयं यद् योरपद्वीपीयैरपि विद्वद्भिः संस्कृतकोशाधारो गृहीतः वर्गप्रणालिश्च सर्वप्रथमं स्वीकृता । एतत् सर्वं पश्चिमीयकोशसाहित्योपरि संस्कृतस्य प्रत्यक्षप्रभावं साधयति । (डिक्शनरी) अस्य शब्दस्य भ्वादिगणीयदीक्षधातो र्नियम-मौण्ड्यर्थकात् निष्पत्तिर्भवति । दीक्षन्ते सम्यक् प्रकारेण नियमपूर्वकं साधु कृत्वा

---

(1) राज वल्लभः ।

(2) भावप्रकाशः ।

(3) कोषं स्ववेष्टनं स्वमुखनिसृतलालारूपतन्तुभिः करोतीति-अलं परिग्रहेणेह दोषवान् हि परिग्रह. । सुश्रुतः ।
कृमिर्हि कोशकारस्तु वध्यते स्वपरिग्रहात् ।। महाभारत १२।३२९।२९ ।

(4) मागधांश्च महाग्रामान् पुण्डस्त्तंगा तथैव च ।

(5, 6) भूमिञ्च कोषाकाराणं भूमिञ्च रजताकरम् ।
रामायण किष्किन्धाकाण्ड ४०।२३ ।

(7) वृहत् हिन्दीकोशे कोष शब्दो द्रष्टव्यः ।

(8) Jonnes De Garlandia कृते Dictionaris—दे० नेलसन्स् एनसाइक्लोपीडिया, खण्डः ३ पृ. २०८ ।

संस्थाप्यन्ते शब्दा यस्यां सा दीक्षणरी । अस्यैवार्थस्य द्योतनार्थं (लेक्सिकन) शब्दोऽपि प्रयुज्यते (1) । अयं शब्दः–"दीक्षणरी" शब्दस्यैव पर्यायः (2) । परमत्र केचनांग्ल विद्वांसः (लेक्सिकन) शब्दस्य प्रयोगं मृतभाषाणां (लैटिन ग्रीक हिब्रू–अरबी) आसामेव कोशस्य कृते समुपयुक्तं मन्यन्ते (3)। दर्शनांकनार्थक चुरादिगणीयलक्षधातोः-अस्य शब्दस्य निष्पत्तिः । तद्यथा-लक्षयितुं सम्यक्प्रकारेणाङ्कितान् शब्दान् द्रष्टुं शक्नुवन्ति विद्वांसो यस्मिन् असौ लक्षिकनः ।

संस्कृते तदनुसारमेव च भारतस्य विभिन्नभाषासु हिन्द्यां चापि कोशस्य कृते नाम माला, माला, शब्दमाला, शब्दरत्नमाला, शब्दसिन्धुः, शब्दार्णवः, शब्दसमुच्चयः, निघण्टुः अभिधानसंग्रहः नामचिन्तामणिः वर्णरत्नाकरः, इत्यादयः शब्दाः व्यवहृयन्ते । पारसीकभाषायाः (लुगत) शब्दोऽपि कोशद्योतक एव । पश्चिमीय भाषासु or tus अथवा hortus (यथा wynkyn de worde द्वारा रचितम् ortus vocbulrium) इत्थमेव (Galfridus Grammaticus द्वारा रचितम् Promptorium Parvulorium-१४४० ई०)

शब्दाः प्रयुक्ता,:- बभूवुः

शब्दविचारो मिथः संश्लिष्टौ रतः । नवीनविचारै सहैव नव-शब्दानामपेक्षा भवति । एते शब्दाः अन्यभाषाभ्योऽपि ग्रहीतुं शक्यन्ते ऽथ च ताभ्यस्ताभ्यो भाषाभ्योऽपि गृह्यन्ते । परमेते ऋणरूपेण गृहीताः शब्दाः पुनर्नवीनशब्दनिर्माणे कालान्तरे समर्थाः न भवन्ति ।

काचनभाषाः असीमितां नवशब्दोत्पादनशक्ति धारयन्ति । अपरासु च भाषासु नवीनशब्दनिर्माणस्य सीमितैव शक्तिर्भवति । काचन भाषाश्चात्यल्परूपेण शब्दानामादानं कुर्वन्ति यतोहि तास्त्वल्परूपेणैव नवशब्दनिर्माणशक्ति धारयन्ति ।

यद्यपि स्वल्पसीमायां तु सर्वा एव भाषा शब्दान् रचयन्ति, तथापि – अत्यल्पाः भाषास्तादृश्यः सन्ति याः सदा सर्वदा नैरन्तर्येण नवशब्दोत्पादनं कुर्वन्ति । न केवलं ता नवशब्दनिर्माणमेव कुर्वन्ति परन्तु सर्वमपि क्रमं परिवर्तयितुं शक्नुवन्ति । एतास्तिस्रो भाषा विद्यन्ते सर्वस्यापि संसारस्य मानवसमाजं याः प्रभावयामासुः । प्राचीनकालादारभ्यानेकाः भाषाः आभिः प्रभाविताः बभूवुः । एताः भाषाः सन्ति— संस्कृतम् भारते, चीनभाषा सुदूरे पूर्वखण्डे ग्रीकसहिता लातिनीभाषा पश्चिमे ।

---

(1) एन साइक्लो पीडिया ब्रिटानिका, १४ तमं संस्करणम्, खण्डः ७, पृ. ३३८ ।

(2) एन साइक्लोपीडिया ब्रिटानिका, ११ तमं संस्करणम्, खण्ड. ५ पृ. ५२६ ।

(3) एनसाइक्लोपीडि कडिक्शनरी, खण्डः ३, पृ. ३२

युवरूपखण्डे आहिमवर्षीयप्रदेशात् रूसं यावत् तत्रत्याः सर्वा अपि भाषाः सर्वविध-नव-निर्माणार्थं लातिनभाषाधीनाः । भारते समस्ते च दक्षिणपूर्व-एशिया द्वीपे (वृहत्तरभारते) सर्वभाषा स्रोतभूतम् संस्कृतम् । चीन-मञ्चूरिया-जापानदेशेषु च चीनीया भाषाधारभूता ।

संस्कृतस्यैतिह्यमतिविचित्रम् प्राचीनञ्चास्ति । केचन एव लोका अस्माकं देशे एवं विधाः सन्ति ये संस्कृतस्य सर्वेक्षणं कर्तुमर्हाः । यथापूर्वमेव मया निर्दिष्ट यदखिलाः भारतीयाः-भाषाः सस्कृतायत्ताः। संस्कृतम् साहित्यं प्रायेण विशुद्ध विशालं भारतीयञ्च । केनापि विशिष्टप्रान्तस्थानादिविशेषण सह नेदं सम्बद्धम् । समस्त-भारतोपरि-अस्य सुस्पष्ट साम्राज्यम् । उत्तरीयभागे पञ्जाबी-हिन्दीनेपाली-भाषाः, पूर्वस्यां दिशि असमीया, बंगीया, ओरीयाभाषाः, पश्चिमभागे सिन्धी, गुजराती, महाराष्ट्री, दक्षिणे च पारे समुद्रमपि लङ्कायां सिहली भाषाः सस्कृतस्य पौत्र्यः । इत्थमपि कथयितुं शक्यते यदासां भाषाणां भाषयितृणां पूर्वजाः सर्वेऽपि संस्कृत-भाषिणः आसन् । शताब्दीनां व्यत्ययेन सहैव संस्कृतं पाली-प्राकृत-अपभ्रंशादिरूपेणा-द्यतनरूपे प्रसृतम् संस्कृतभाषास्थाने यद्यपि विभिन्नरूपेण विविधा भाषाः सर्वत्र प्रस्फुटिताः परन्तु ताः सर्वा अपि संस्कृताङ्कुरभूता एवासन् । अतः सस्कृतं साहित्यं यत्र तत्र सर्वत्र पुष्पितम् फलितञ्च बभूव ।

इत्थ न के लं वर्तमाननवीनभारतस्यैव कोणानुकोणं भारतीयं जीवनं संस्कृतेन प्रभावितमस्ति-अपितु-अफगानिस्थानं मध्य-एशियाद्वीपः, चीनं, तुर्कस्थानं एतानि सर्वाण्यपि स्थानानि कदाचित् संस्कृतस्य प्रकाशकेन्द्राणि संस्कृतसभ्यता-सम्पन्नानि चासन् । यत्रेदानीं द्रविडभाषा स्थानानि सन्ति तानि प्रथमं संस्कृतप्रभावि-तान्येवासन् । एवं विधस्थानादेवास्माक प्रखरदार्शनिकः श्री शकराचार्यः, परमो विद्वांश्च सायणाचार्य-इत्येषा आचार्यद्वयी प्रत्यक्षमायाता । समुद्राद् बहिरपि सुदूरे मलयक्षेत्रे, सुमात्रायां, जावाबोर्नियो—फिलिपाइन्स—आदिषु द्वीपेषु, पोतवाहका, व्यापारिणो, राजकुमाराः, विद्वांसश्च सस्कृत स्वलोक निन्युः ।

इण्डोनेशिया देशस्य पञ्चानां मौलिकसिद्धान्तानां नाम पञ्चशीलोऽस्ति । तत्रत्य-राष्ट्रियध्वजस्य नाम द्विवर्णः, तेषां वायुमार्गस्य नाम गरुड़श्चेति सुप्रसिद्धम् । लोकानाम् नामानि सस्कृताधारे सस्थापितानि यथा सुकर्णः ।

कम्बोडिया देशेऽपि संस्कृतस्यानेकेऽभिलेखा आइतिहासकालात् चतुर्दशदशक यावत् मिलन्ति । फ्रेञ्चविदुषां द्वाभ्यां कुलाभ्यामपि—एवं विधसंस्कृतसाहित्य-संकलनं प्रकाशनञ्च विहितम् । तत्रापि संस्कृतं सहस्राब्देभ्योऽधिककाल यावत राजभाषापदमलञ्चक्रे ।

इत्थमेव थाईशब्दकोशाध्ययनकाले संस्कृतमूलत्वं तत्र सुस्पष्टं ज्ञातुं शक्यते। अस्य कोशस्य निर्माणं George Bradley Mc. Farland महोदयेन कृतम्। एकस्यैव पृष्ठस्योपरि उपरि बुद्धि: उपरिभावः उपमेय (:) उपयुवराज (:) उपयोग (:) उपरि, उपरिचर (:) उपमा, उपमान (:), उपरिम (:). उपसर्ग (:) उपसम्पदा, उपाध्यायः-एवमनेके शब्दाः द्रष्टुं शक्यन्ते। तत्रैव (Irrigation-Department) कर्म-जल प्रदान (म्) Ecclesiastical Department) कर्म-धर्मकार (:) (Department of Municipal Affairs) कर्मनगरादर (:) (Algebra) बीजगणित-(म्) (Trignomatry) त्रिकोणमिति-इत्यादिशब्दानां तत्रास्माकं देशमिव प्रयोगो द्रष्टुं शक्यते। मदगास्कर द्वीपात् फिलिपाइन द्वीपं यावत् चैत्र:, वैशाखः इत्यादि-रूपेण मासानां संस्कृतनामकरणमेव। बालीद्वीपे जावायां वर्मादिशे च शकाब्दस्यैव प्रयोगो ऽद्यापि। लङ्कायां सिंहली भाषा संस्कृतादेवानुस्यूता। संस्कृतप्राणस्यायुर्वेदस्या-द्यापि तत्र भूयान् प्रचारः।

नवीन-उत्तर भारतीय भाषाणां साहित्यिक-गतिविधि-इतिहासो गतशताब्दीनां चतुष्टयात् शताब्ददशकं यावदेव गच्छति . अस्मिन् दीर्घतमेऽपि काले-एकमपि दिनमेतादृशं नास्ति यदा किल संस्कृतेन आसां भाषाणां सुतीव्रा पिपासा शान्ता न कृता भवेत्।

इयमेव दशा कन्नड—तैलुगु-मलयालम् भाषाणामपि निः सन्देहं वर्तते। आसां भाषाणां विशालकोशदर्शनमात्रेणैव ज्ञातुं शक्यते यत्-एतेषु कोशेषु ७०% ८०% शब्दाः संस्कृतोत्पन्नाः। तमिलभाषायामपि ४०% तः ५० % शब्दाः संस्कृतस्यैव सन्ति। उदाहरणार्थं प्रसिद्धात् मद्रविश्वविद्यालयात् (Madras university) प्रकाशितात् पुस्तक सं० ६,१९३४ तः पृष्ठ सं. ३८७२ तः केचन शब्दाः प्रस्तूयन्ते विदुषां विनोदाय:- (जातिमासम्) मासः (जात्तियम्) (जात्यम्, यात्रा, (जातककर्त) जातककथा, (जातकपावम्) जातकभावः, (जातकी) जातकम्, (जातित्वेषम्) जातिद्वेषम् (जातितर्मम्) जातिधर्मम्, (जातिप्रष्टम्) जातिभ्रष्टः। (जातिपुष्पम्) जपापुष्पम्, (जाति मल्लकै) जातिमल्लिका, (जातिलक्षणम्) जातिलक्षणम्, (जातिलिङ्गम्) जातिलिङ्गम् जाति-ज्ञीवनम्, जातिमाङ्कर्यम्, जाति-स्वरम्।

संक्षेपतः—कथयितुं शक्यते, यत् संस्कृतम् पूर्वपश्चिमोत्तरदक्षिणभाषाभ्यो ऽसीमितां शब्दराशिं प्रयच्छति। वर्मा देशस्य नवीने सम्विधाने एकस्यां धारायां संस्कृतस्य प्रगतिस्तस्य राज्यस्य विषयरूपेण संस्थापिता वर्तते।

अत एव विचारशीलैर्भारतमहापुरुषैर्भारतीयसम्विधानेऽपि लिखितं यत्—निखिलभारतदेशस्य राष्ट्रभाषायाः हिन्द्याः शब्दावली संस्कृतशब्दैरे - वावश्यकरूपेण समृद्धिमाप्स्यति। यद्यपि भारतस्यान्यभाषाकृते न किमपि सम्विधाने लिखितं तथापि हिन्दीवदेव सर्वमपि तत्र स्वाभाविकरूपेण सर्वथा सिद्धमेव।

संस्कृतभाषायाः निर्माणात्मिका शक्तिः लातिनग्रीकः भाषाभ्यामप्यधिका नात्र कोऽपि सन्देहः । संस्कृतस्य धातूनां शतकेनापि लक्षशः शब्दा निर्मातुं शक्यन्ते इति सर्वथा विचित्रम् (1)।

कोशानां कार्यक्षेत्रम्

शब्दग्रहणं कृत्वा उतवा वाक्यग्रहणं कृत्व। कोशाः प्रवर्तन्ते । शब्दानाँ वाक्यानाञ्च विषये शुद्धज्ञानप्रदानकरणमेव कोशाणां लक्ष्य भूतम् । अर्थात्-अमुकवस्तु किमस्ति तस्य च नाम किमिति –एवं विधज्ञानप्रदानम् । वस्तूनां ज्ञानानुमारमेव शब्दप्रयोगाः भवन्ति (2)।

चराचरात्मकं निखिलमपि जगत् परिवर्तनशीलम् तद्वदेवेद कोशाणां कार्यँ कार्यक्षेत्रमपि च–अन्ततो नास्ति स्थिरमेकरूपम्बा । वद चिदादिकाले कोशाणां लक्ष्यादिक नामसंग्रहमात्रमपि - अभूत् ।

परमिदानीमाशब्दसग्रहात् प्राविध्रिक क्षेत्र यावत् षड्शताद्प्यधिकशाखापर्यन्तमस्य विस्तारो ऽभवत् (3)। दिनानुदिनञ्चास्य विस्तारो जायमान एवास्ते । शब्दानां तस्यामेव—अथवेतरभाषायां मुख्यरूपेण व्याख्यालेखनमपि तत्र भवति (4)। अथवा कस्या अपि भाषायास्तस्या अगविशेषस्य वा भिन्न २ शब्दानां वर्णक्रमोच्चारणादिकस्य, अर्थ प्रयोगनिरुक्ति वैय्याकरणरूपादीनां च वर्तमानकोशसाहित्ये समुल्लेखो भवति । विस्तृतकोशेषु शब्दविषयकज्ञानं सांहित्यिकोद्धरणैरपि साध्यते (5)।

---

(1) Comprehensive English Hindi Dictionary.
— By Dr. Raghuvira.

(2) Readers digest great encyclopaedic dictionary भूमिकारभे।

(3) The modern use of the term dectionary is not limited to a simple compilation but has been extended to technical and other subjects.
एन्साईक्लोपीडिया अमैरिकानां खं. ९ पृ. ८८

(4) A list of all or most of the words in a language, with explanation of their meanings pronunciation and origin of their equivalents.
नेल स स एन्साइक्लोपिडिया खं ३. पृ. २०८

(5) A book dealing with the indivisual words of language (or certain specified classes of them) so as to set for their orthography, pronunciation, signification, and use their synonyms, derivation and history or atleast some of these facts .... in larger dictionaries the information given is illustrated by quotations from literature.
ए न्यू इंग्लिश डिक्शनरी आन हिस्टोरिकल प्रिंसिपल्स ।

(1) यद्यपि कोशस्तु शब्दसंग्रह एव तथापि यथा स्थानमावश्यकसूचनासन्दोहमपि सो हि संकलयति । इयदेव नहि परमादर्शकोशेषु भाषाणामितिवृत्तम्, शब्दपर्यायाः, संक्षिप्तरूपम्, लोकोक्तयः, प्रसिद्धव्यक्तयः, अतारस्य तारसम्बन्धिचिन्हानि, मानतुलातालिका, प्रत्ययोपसर्गसंग्रहः, क्रिया-संग्रहादिकं सवमपि भवति (2) जीवनीकोशाः, भौगोलिककोशाः, विशिष्टचिन्हसंकेतादिकं, देश-विशेषाणां सम्विधानानि, व्यापारवाणिज्यशब्दावली (3) । इत्थमनेकविधकोशाः भवन्ति । कोशाणाञ्चेत्थ कार्यक्षेत्रस्य महीयान् विस्तारः । इममेवं विस्तारमखिलक्षीकृत्य कोशस्य लाक्षणिकोऽर्थः "ज्ञानभाण्डारः" अपि भवति (4, 5) । अधुनाऽब्दकोशनिर्माणमपि (Yearbook) प्रारब्धम् ।

संग्रह-प्रणालि :-

शब्दानां संग्रहप्रणालिरपि शनैः शनैः कालक्रमेणावश्यकतानुसारं च परिवर्तते । अधुनातने युगे कोशाः "सन्दर्भग्रन्थाः" इति प्रायेण मन्यते । अत एव केचनाकारादिक्रम-पद्धतिं परमावश्यकां विशुद्धां कथयन्ति स्वीकुर्वन्ति च (6) । केचन-अकारादिक्रमप्रणालीमेव एकमात्राम् मन्यन्ते (7) । इतरे चार्थोपयोगितां कोशाणां वर्गप्रणालीमपि वरेण्यां स्वीकुर्वन्ति ( ) । शब्दार्थबोधकानि चित्राण्यपि कोशेष्विदानीं द्रष्टुं शक्यन्ते (9) । तद्यथा—अश्वः—एकश्चतुष्पाद् जन्तुः । अस्यारोहणार्थं, युद्धेषु, घुड्कक्षेत्रेषु-अथवा यानेषु प्रयोगः क्रियते । नैतदेव, शब्दस्योपरि लघुलेखोऽपि प्रकाश्यते यस्मिन् पशोरस्य विषये सामान्यज्ञानं, तथात्र वैधानिक तथ्यं स्पष्टं भवति ।

कोशभेदाः

संसार-शब्दसागर-सन्तरणार्थं हि कोशाः सहायकास्तरणि-स्वरूपाः । अत एव कोशाणामनेके भेदोपभेदाः-भवन्ति ।

---

(1) हाट्र्फुस वाकेबुलरीज, भूमिका पृ. ७

(2) दि वेस्टमिनिस्टर डिक्शनरी पृ. ११४७-१२०३ ।

(3) वेब्स्टर्स ट्वेंटियथ सैंचुरी डिक्शनरी सप्लीमेन्ट पृ. १०१५७ ।

(4 5) ए न्यू इंग्लिश डिक्शनरी आन हिस्टोरिकल प्रिंसिपल्स खण्ड, ३, पृ-३३१ ।

(6) नेलसन्स एन्साइक्लोपिडिया खण्ड ३ पृ० २०८ ।

(7) एन्साइक्लोपिडिया अमेरिकाना खण्ड ६ पृ. ८७ ।

(8) डार्लिंग् बक्—ए डिक्शनरी आव् सिलेक्टेड सिनानिम्स इन दि प्रिंसिपल इण्डो यूरोपियन् लेंग्वेजेज, भूमिका पृ. १२ ।

(9) द इम्पीरियल डिक्शनरी John ogilvie, LL. D.
अमेरिकन डिक्शनरी 1841 Noah Webster LL. D.

१. निघण्टुः-

यद्यपि निघण्टौ केवलं वैदिकशब्दावलिमात्रमस्ति यस्य व्याख्या निरुक्ते विस्तारेण यास्केन कृता। अतः निघण्टुरपि कोशस्तद्वदिव निरुक्तोऽपि कोश एव-निघण्टुनिरुक्तयोः परस्परमविच्छेद्यभावात्। पाश्चात्याः विद्वांसोऽत्र निघण्टुं केवलं वैदिककोशमेवेति स्वीकुर्वन्ति (1)। परमुत्तरकालीनैः कोशविद्यापारंगतैर्निघण्टु-शब्दस्य प्रयोगः कोशाणां कृतेऽपि प्रायेण विहितोऽस्ति। वैद्यकशास्त्रस्यायुर्वेदस्य वा कोशास्तु प्रायेण निघण्टु-नाम्ना एव विख्याताः।

२. नामकोशाः (नामेन्क्लेचर)

नामकोशेषु मुख्यतः सञ्ज्ञावाचकशब्दानां जातिवाचकसञ्ज्ञानाम्बा प्राधान्यं भवति। एवं विधकोशेषु मुख्यसञ्ज्ञाशब्दास्तेषां पर्यायास्तदर्थबोधकशब्दसंग्रहो वा भवति। परमाधुनिककोशेषु व्यक्तिवाचकशब्दानां वैशिष्ट्यम् (2)।

३. पर्यायकोशाः (सिनानिमी)

पर्यायकोशेषु समानार्थकशब्दाः—भवन्ति। शब्दानामर्था-प्रयोगसम्बन्धि-पारस्परिकसूक्ष्मान्तर-विवेचना-अपि भवति। शब्दानामुचितानुचितविषयकं समीक्षणं चापि पर्यायक्यां क्रियते (3)।

४. शब्दावलिकोशाः (वाकेबुलरी)

शब्दावल्यां स एव कोशः समायाति यस्मिन् केनापि विषयविशेषेण सम्बद्धाः शब्दाः सीमितसंख्यायां सव्याख्याः अल्पव्याख्यायुक्ताः बा शब्दाः संकलिताः भवन्ति। परं तेषां सङ्कलनं क्रमपूर्वकं भवति (4)।

५. शब्दार्थकोशाः (ग्लोसेरी)

ते किल शब्दार्थकोशाः भवन्ति येषु कस्यापि कोशस्य, लेखकस्य; विभाषायाः कलायाः कस्याप्येकस्यांगस्य कठिनाः वैदेशिकाः, असाधारणाः, पारिभाषिकाः, गतप्रयोगाः वा शब्दाः—अर्थसहितं व्याख्याताः भवन्ति (5)।

---

(1) वैजयन्तीकोशस्यैषा उक्तिरस्ति :- यातयामो जीर्णे भक्तोच्छिष्टेऽपि च इति निघण्टौ। मैक्डानलोऽत्र टिप्पणिं कुर्वाणो लिखति-Not in yaskas Nighantu......।

(2) फ्रैबः इंगलिश सिनोनिम्स।

(3) रामचन्द्र वर्मा—शब्दसाधना, पृ. ७१।

(4) एन्साइक्लोपीडिया डिक्शनरी। खण्ड ३।पृ. ३२।

(5) चैम्बर्स एन्साइक्लोपीडिया, खन्ड ४. पृ. ४६६।

६. अनुसूचिकोशाः (कौंकर्डेन्स)

कस्यापि ग्रन्थस्य, लेखकस्य वा शब्दानां पूर्वप्रयुक्तस्थान संकेत सहितं सङ्कलनं संग्रहणम्वा अनुसूचीति नाम्ना कथ्यते। विशिष्टरचनानां वैदेशिकशब्दानामर्थसहितं क्रमपूर्वकञ्च संग्रहणमपि—अनुसूचिरित्युच्यते। एते शब्दाः पाठकानां भाषायामनूद्य संगृह्यन्ते। अकारादिक्रमेणान्येन वा केनापि क्रमेणसंग्रहणमेतेषां क्रियते (1)।

७. जीवनीकोशाः (ओटो वियोग्रफी)

एषु कोशेषु विभिन्नदेशीय लोकानां व्यवसायाः, चरित्राणि, वास्तविक-काल्पनिक-सामान्य-विशेष-प्रकारेण लिखिताः भवन्ति (2)।

८. भौगोलिककोशाः- (गजेटियर)

भौगोलिक-कोशेषु निखिलस्यापि विश्वस्य. महाद्वीपानां, विशिष्टदेशानां, भूखण्डानां, कस्यापि खण्डस्य, ग्रामस्य, अभ्रंलिहाट्टालिकानां, मन्दिर-मठ-नगर-पर्वत-नदीनां विषये समुल्लेखनीयं लिख्यते। समुन्नतदेशानां सर्वकारैः स्वयमेवं विध खण्ड-प्रखण्ड भौगोलिकयो निर्माप्यन्ते। एषु नगराणां ग्रामाणां मण्डलानाञ्च प्राचीन-इतिहासस्तत्तद् वास्तव्यजनानाञ्च व्यापार-जातं, जनसंख्यादिकं सर्वमपि परिचयात्मकं भवति (3)।

एतदतिरिक्तं दर्शन-विज्ञान-गणित-प्राकृतिकेतिहास-प्राणिशास्त्र वनस्पतिविज्ञान-पक्षि-वृक्ष-पुष्प-रसायनशास्त्र-भूगर्भशास्त्र-धातुविज्ञान—भवननिर्माणकला—रञ्जन-संगीत-भेषज— शल्य-चिकित्सा — शरीरविज्ञान — राजनीति — कूटनीति-विधि-सामाजिक—शास्त्र—कृषि-ग्रामीणार्थशास्त्र —औद्यानिकी-वाणिज्य-सिन्धु - विज्ञान-अश्वसम्बन्धिज्ञान-युद्धकलादिविभिन्नविषयाणां कोशाः-अद्य विभिन्नभाषासु मिलन्ति। प्राचीनविषयाणां कोशाः— अपि-सन्ति। इतिहासः, घटनानुक्रमः. तिथिः, वंशक्रमः, कूटनीतिशास्त्रम्. संक्षेपीकरणम्. दूषितपदार्थमिश्रणम्, एतेषु मुख्याः विषयाः (4)। इत्थमेव धातुकोशाः, लोकोक्तिकोशाः, वाक्यकोशाः-अपि-अद्य सुलभाः। विभिन्नकवीनां शब्दकोशा अप्यद्य निर्मीयन्ते। तद्यथा कालिदासकोशः।

---

(1) डा. अचलानन्द जखमोला। हिन्दीकोश साहित्य। भूमिका पृ. २०।

(2 एनसाइक्लोपीडिया ब्रिटानिका, ११ तमम् संस्करणम्। खण्डः ८।पृ. १८६।

(3) सेञ्चुरी डिक्शनरी (डिक्शनरी शब्दार्थेऽवलोकनीयः)।

(4) एन्साइक्लो पीडिया ब्रिटानिका (११ तमम् संस्करणम्) खण्ड ८।पृ. १८६।

९. पदावलिकोशाः (फिजियोलोजी)

कस्यापि विशिष्टवैज्ञानिकविषयस्य पारिभाषिकशब्दानां पदानाञ्च सूची एषु कोशेषु-भवति ; आवश्यकताऽनुसारमत्र व्याख्या अपि भवति विभिन्न—पदानां शब्दानाम्बा (1)।

१०. विश्वकोशः- (एन्साइक्लोपीडिया)

विश्वस्य निखिलज्ञानस्य कोशो विश्वकोशः अर्थात् यत् किमपि ज्ञान-जातं सर्वस्मिन् संसारे समुपलभ्यते तस्य वर्णनं विश्वकोशे भवति। विशिष्टविषयाणामुपरि लघुनिबन्धाः—अपि भवन्ति। इत्थं किल कोशेषु केवलं शब्द—विश्लेषणं भवति विश्वकोशे चोपकरणानां वर्णनं भवति (2) शब्दानां परिभाषा, वर्णपरिवर्तनम्, रूपभेदः, प्रयोगः, स्वीकरणमित्यादयः शब्दकोशविषयाः सन्ति। अन्यतश्च वस्तूनां प्रकृतिः; प्रगुणाः, निर्माणविधिः, प्रयोगविधिस्तथा शक्त्यादेः वर्णनं विश्वकोश—विषयाः सन्ति (3)। विश्वकोशे न केवलं कला—विज्ञानयोः प्रत्येकानामङ्गानां सामान्यपरिचय-एव भवति परं तयोः सूक्ष्मतम-प्राविधिक-प्रक्रियाणां परिज्ञान—प्रयासाः—अपि विधीयन्ते। शब्दकोशेष्वपि वस्तु-वर्णनं-भवति परन्तु एव विधवर्णनं केवलं सम्बन्धित-शब्दानां प्रयोगस्य सार्थकतायाश्च प्रतिपादनार्थमेव माध्यमस्वरूपम् (4)। विश्वकोशाणां शब्दावलिः प्रायेण सञ्ज्ञापर्यन्तमेव सीमिता भवति। वस्तूनां नामानि, विवरणम्, विधानं निर्माणप्रक्रिया चैव मुख्यमभिधेयं भवति। परमाधुनिककोशेषु न केवलं सञ्ज्ञैवापितु भाषायाः सर्वे प्रचलितशब्दभेदाः सङ्कलिताः भवन्ति। (न्यू इंग्लिश डिक्शनरी) नवीनांग्लकोशसदृशानपवादानपहाय (5) कोशनिर्माणमेकेनैव व्यक्ति-विशेषेणापि कर्तुं शक्यते। पर विश्वकोशनिर्माणस्याधुनिकप्रणालिरियं वर्तते यत् विश्वकोशसम्पादनार्थमेको दलो नियुज्यते। अयं दलो हि विशेषज्ञानां विदुषां भवति (6) यतोहि परमकठिनमिदं कार्यं विभिन्नविषयविदुषां सहयोग विना नैव सम्पादयितुं शक्यते। विश्वकोशनिर्माण—स्याधुनिकं प्राथमिकञ्चोद्देश्य वर्तते। तत्तत्कालीनज्ञानमेकत्रीकृत्यैकस्मिन् स्थाने तथा सस्थापनं यथा विशेषज्ञानां कृते मान्यं स्यात्। अथ च चित्रात्मकनिदर्शनं कलात्मकाकृतीनाञ्च प्रयोगोऽद्य रेखाचित्रसहितं प्राचीनकोशा-

---

(1) हिन्दीकोश साहित्य। डा. अचलानन्द जखमोला। भूमिका पृ. २१।

(2) एन्साइक्लोपीडिया अमेरिकाना खण्डः पृ. ३१६।

(3 चैम्वर्स एन्साइक्लोपीडिया खण्डः ४ पृ. ४९९।

(4) एन्साइक्लोपीडिक डिक्शनरी। खण्डः ३। पृ. ३२।

(5) ए न्यू इंग्लिश डिक्शनरी आन हिस्टोरिकल प्रिंसिपल्स, खण्डः १-२ भूमिका।

(6) क्रैव, इंग्लिश सिनानिम।

णामिव सीमितो नास्ति परं पर्याप्तरूपेण विस्तृतोऽस्ति सञ्जातः। अनेन सहैव परिष्कृतोऽपि विद्यते (1)।

अत्र संस्कृतकोशाणामध्ययनेन विभिन्नविश्वकोशाणाञ्च पठनेन मननेन च सर्वविधनवीनकोशबीजानि संस्कृतकोशवाङ्मये समुपलभ्यन्ते। विभिन्नपुराणेषु कोशवाङ्मयस्य न केवल बीजान्येवापितु विकासोऽपि विभिन्नशाखारूपेण द्रष्टुं शक्यते। पाश्चात्यलेखकैस्तेषां विभिन्नरूपेण नामाङ्कनमेव कृतम्।

कोशवाङ्मयस्य मौलिकत्वम्:

परम् विचारणीयोऽय विषयो यत् कोशनिर्माणं किमु मौलिकममौलिकम्वा? कस्यापि भाषायाः कोशः स्यात् तस्य का स्थितिरित्ययं जटिलः प्रश्नः। संस्कृतकोशेषु अमरसिंहस्यामरकोशोऽस्ति परमलोकप्रियः। परमस्य कोशस्यापि सङ्कलनं प्रतिज्ञा–श्लोकानुसारममरसिंहस्यान्येषां कोशकाराणां कोशान् समाहृत्य संक्षिप्य वर्गेषु विभाज्य च सञ्जातमस्ति तद्यथा "समाहृत्यान्यतन्त्राणि सक्षिप्तैः प्रतिसंस्कृतैः। सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्" अमरकोश १।१ २। इत्थं किल पूर्वकोशाणां समाहारं कृत्वा निर्मितोऽयममरकोशः सर्वथा सर्वप्रियः सञ्जातः। सर्वाञ्च पूर्वकोश-कारान् प्रति नितान्तमाभारमपि प्रकटितममरसिंहेन यथाहि—"मया, अन्येषां व्याड्यादीनां तन्त्राणि नामलिङ्गानुशासनानि, सिद्धान्तान् वा समाहृत्यैकीकृत्य, सगृह्य वा। नामान्याख्याः, लिङ्गानि च स्त्रीपुन्नपुंसकानि, अनुशिष्यन्ते विविच्य बोध्यन्तेऽस्मिन्ननेन वेति नामलिङ्गानुशासनम्। "करणाधिकरणयोश्च" (३।३।११७) इति ल्युट् सम्पूर्णंपूर्णत्वदोषरहितम्। उच्यते कीदृशम्-वर्गैः—प्रकरणैः युक्तम्। कीदृशैः—संक्षिप्तैः—स्वल्पशब्दैः। पुनः कीदृशैः—प्रतिसंस्कृतैः। प्रत्येकक्रमकथनेन कृतोत्कर्षैः। यद्वा असारांश रहितैः-शब्दरचना-विशेषवद्भिः। त्रिकाण्डोत्पलिन्यादीनि नाममात्रप्रतिपादकानि। वररुच्यादिकृतानि तु लिङ्गमात्रप्रतिपादकानि। अत्र तूभयार्थसंग्रहणादिदमेव सर्वैः पाठ्यमिति भावः। (भानुजिदीक्षितव्याख्यायाम्)" एवमेव किल सर्वानन्दीयव्याख्यापि समालोकनार्हाऽस्मिन्—विषये तद्यथाः—"अन्य तन्त्राणि व्याडिवररुचिप्रभृतीनां तन्त्राणि, समाहृत्य एकीकृत्य। अत एव सम्पूर्णमिदं यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्र तन्त्राणि, व्याड़िवररुच्यादिप्रणीतानि तु लिङ्गमात्रतन्त्राणि—(सर्वानन्दीय-अमरकोशटीकायां प्रथमो भागः पृ. २०४)।

इत्थं किल सर्वकोशकाराणामसौ कृतज्ञो ये तस्मात् पूर्वं बभूबुः। तथापि लोकाः-अमरसिंहस्योपरि चौर्यस्य दोषारोपणमकार्षुरेव (2) पर कोशाणाम् सूक्ष्मदृशाऽध्यय-नेनेदं सुस्पष्टं भवति यदमरकोशकारेणैव नहि परं सर्वैरपि कोशकारैः—उत्तरकालीनकोशाणां साहाय्य गृहीतम्। केषुचित् कोशेषु तु केवलं नामादि

(1) एनसाइक्लोपीडिया अमेरिकाना खण्डः १० पृ. ३१७।

(2) अमरसिंहस्तु पापीयान् सर्वं भाष्यमचूचुरत। लोकोक्तिः।

परिवर्तनमात्रमेव दृश्यते। प्रकारोऽयं न केवलं संस्कृतकोशेष्वेव द्रष्टुं शक्यते परं विश्वस्य कस्या अपि भाषाया कोशान् पश्यतां, सर्वत्रैवेदं दृश्यते। अत एव विद्वद्भिः प्रतिपादितं यत् — अन्योन्याश्रयणं भाषाविज्ञानस्य मौलिकः सिद्धान्तः[1]। कोशविषये त्वयं नियमो विशेषरूपेण संघटते।

इदं नु सत्यमस्ति यद्–येषामपि शब्दानां संग्रहणं कोशकाराः कुर्वन्ति न ते किल कोशकाराणां स्वरचिताः। ते मुख्यरूपेण-सङ्कलिताः भवन्ति। परं तथापि कोशकाराणां या शब्दनियोजनप्रणालिर्भवति सा नूनमेव तेषां स्वीया[2]। अत्रायमाशयोऽस्ति यन्न कोशाः काव्यनाटकोपन्यासादिवत्—मौलिकास्तथापि कोशनिर्माणे निर्माता स्वविवेकं बुद्धिकौशलञ्च सम्यक्तया प्रदर्शयितुं शक्नोति नात्र कोऽपि संशीतिलेशः। इत्थ किल संग्रहरूपा अपि कोशाः-मौलिका एव।

कोशसंरचना किं कला विज्ञानम्वा।

आधुनिकं विद्याक्षेत्रं कलाविज्ञानयोः क्षेत्रद्वय्यां विभक्तमस्ति। अतोऽत्रेदं विचारणीयमस्ति यत् कोश-संरचना कला वर्तते विज्ञानम्वा? कला शिल्पादिकं भवति[3]। विज्ञानञ्च विशिष्ट ज्ञानम्[4]। अन्यत्रापि संस्कृतविद्वांस :–कलां शिल्पमेव कथयन्ति[5]। सहैव च चतुः षष्टिकला अपि भवन्ति। संस्कृतांग्लकोश-काराः—अपि तथैवानयोः शब्दयोर्नियोजनं कुर्वन्ति[6]। केचनांग्लकोशकाराः कलां

---

1. Inter dependence is of course the keynote of Phylology without it little could be done......"
   रावर्ट कालिन्सः डिक्शनरीज आव् फारेनलैंग्वेजिज्, भूमिका पृ. १६।

2. "The words and meanings of the words of a dictionary can scarcely be proved by its compilers to belong exclusively to themselves. It is not the mere aggregation of words and meanings but the method of dealing with them, which gives a dictionary the best right to be called an original production."
   मोनियर विलियम्सः–संस्कृत इंग्लिश डिक्शनरी भूमिका पृ. ५।

3. "कला स्यत्—अंशशिल्पयोः" । इति हैमः।

4. "वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि" । इत्यमरः।
   श्लो. ४ पृ. ५०६।

5. कलान्शिल्पादौ शब्दार्थचिन्तामणि पृ. ५२३।
   शैव तन्त्रोक्ताश्चतुः षष्ठिकला-शब्द र्थ चिन्तामणिः पृ. ५२३।

6. Art – कला पृ. २६। Science-विज्ञानम् पृ. ७१४ English, Sanskrit Dictionary, Sir M. Monior Williams.

मानवस्य तां विशेषप्रतिभ माहुर्या हि प्रकृतिवदेवापरां सृष्टिं करोति [1.] । केचन विज्ञानं विद्यायास्तां शाखामाहुर्यया सत्यान्वेषणे साहाय्यं क्रियते । एवमेव च सत्यान्वेषणार्थम्वा नवीनसाधनप्रयोगाः क्रियन्ते येन तद् विज्ञानम् [2.] ।

पाश्चात्या कोशकारा अपि शैवतन्त्रोक्तमेव कलाशब्दार्थमतिसंक्षेपेण स्वीकुर्वन्ति [3.] । इत्थं किल कलाशब्दार्थस्तु समुत्कृष्टकलाभिरेव सम्बद्धः । अत्र अल्पकलावैशिष्ट्य भवति । कलां विषयगता स्वल्पा विषयीगता चाधिका भवति । विषयीगतत्वमेव च महत्वपूर्णमस्या भवति । यतोहि-अस्य एव परिणामस्वरूपं विशिष्टानां कलाकृतीनामुद्भावनाऽभूत् [4.] । वैज्ञानिकविधिश्चास्या विपरीता भवति । इयं हि प्रयोगात्मिकाऽस्ति । पुनश्चेयं प्रयोगपर्यवेक्षण-विश्लेषण-सश्लेषणां शिवकल्पना-निष्कर्ष तुलना वर्गीकरणादिषु समाधारिता भवति । विकासात्मक-गणनात्मक-निगमनागमनशैलीषु वैज्ञानिकमध्ययनमाधारितं भवति [5.] ।

उल्लिखित-विचारानुसारमेकार्थका अनेकार्थकाश्च कोशा स्तेषां रचनाशैलीमधीत्य कलात्मका एव मुख्यतरा भवन्ति । संस्कृतकोशाश्च प्रायेण काव्यमयाः एव भवन्ति । अत एव हिन्दीकोशविद्यायाः—विद्वान् श्री रामचन्द्र वर्मा कोशनिर्माण कलामेवाह [6] । परं डा० हेमचन्द्रो जोशी, डा० हरदेवबाहरी च (हिन्दी कोशान्) वैज्ञानिकाधारनिर्मितानेव कथयतः । प्रायेण चांग्लकोशा वैज्ञानिका एव ।

---

1. Art-Human skill as opposite to nature.
   The Readers Digest great Ency clopaedic Dictionary volume I. Page 59.
2. Science :- A branch of study which is concerned strated truths or with observed facts systematically classified and more or less colligated by being brought under general laws, and which includes truth worthy methods for the discovery of new truth-in its own domain. Shorter oxford English Dictionary vol. II Page 1806 Col. 2.
3. Art: the applicatioc of skill to subjects of taste as poetry, music etc. skill applisd to the arts of immitation and design painting. architecture etc.
   Shorter exford English Dictionary V. I.
4. एन्साइक्लोपीडिया अमेरिकाना, खण्ड पृ. ३३६, व ४४२ ।
5. एन्साइक्लोपीडिया ब्रिटानिका, १४ तम संस्करणं खण्ड २० पृ. १२५-१३१ दि साइंटिफिक मेथड्स ।
6. रामचन्द्र वर्मा-कोश-कला (न. नि.) पृ. ३ ।

सर्वस्याप्याशयोऽयं यत् संस्कृतस्य प्राचीनकोशाः कलामयाः कलापूर्णा वा काव्यस्वरूपाः। नवीन-कोशाश्च संस्कृतस्य वैज्ञानिकाधारनिर्मिताः। एवं सत्यपि कलाविज्ञानयोरत्र संस्कृतकोशवाङ्मयनिर्माणे समानमेव महत्वम्। इदानीमपि काव्यकलापूर्णाः संस्कृतकोशा निर्मीयन्त एव। पं श्री मुकन्दस्य मुकुन्दकोशो विश्वकोशोऽपि सन् काव्यकौशलसंयुतोऽत्र मदीयां विचारधारां सम्यक्तया परिपोषयति। तत्र किल कलाविज्ञानयोर्मधुरं सम्मिश्रणम् विद्वद्भि—विशेषतश्च कोशविद्या प्रकाण्डपण्डितै द्रष्टुं शक्यते।

कोशविद्या विभिन्नशास्त्राणि च

यथा किल कोशः—धनागारः, धनस्य—आगारो भवति तद्वदिव कोशः शब्दागारः शब्दभाण्डारः। सर्वाण्यपि च शास्त्राणि शब्दभाण्डाराधीनानि नात्र कोऽपि सन्देहः। तथाप्यत्र संक्षेपेण किञ्चित्स्वल्पं समीक्ष्यते।

इतिहासशास्त्रं सार्वकालिकं सर्वविधं सर्वेणापि च वस्तुजातेन सहसम्बद्धम् भवति। अतो हि सर्वप्रथमं कोश—इतिहासयोर्मिथोऽस्ति नूनमेव सम्बन्धः। इतिहासः कीदृशोऽपि स्यात् सामाजिकः राजनैतिकः—धार्मिको वा सर्वोऽपि इतिहासः कोशेण सम्बद्धो भवति-एव। कोषाणामध्ययनेन सम्यङ्ज्ञातुं शक्यन्ते—ऐतिहासिकतथ्यानि। तत्र सामाजिकं यथा—पुरुषस्य कृते प्रथमं कदाचिदस्माकमितिहासे विधुरत्वं नाम न किमप्यासीत्। असौ पुनर्विवाहं कर्तुं शक्त—आसीत्। तदानीं स्त्रिया कृते पुनर्विवाहस्य च प्रतिषेधमासीत्। अत एव तत्कालीन कोशेषु—अमरादिष्वपि विधवा शब्दो दृश्यते न च विधुर शब्दः। विगतो धवः पतिर्यस्या सा। एवमेव ज्योतिषशास्त्रे ताजिकशास्त्रीययोगनामानि इक्कवालः, ईसराफः, तम्बीर - एते शब्दाः—यवनैः साकमस्माकं यथास्यात्तथा पारस्परिकव्यवहारं प्रयोगेण साधयन्ति। अत्रेदं राजनैतिकपक्षीयमुदाहरणम् — ज्ञेयम्। इत्थमेवाधुनिककोशेषु—यथा किल ज्योतिः शास्त्रकोशाध्ययनानन्तरमस्माभि र्भाग्ते यवनप्रभावो द्रष्टुं शक्यते तद्वदेवांग्लानां भारते स्थितिः सुस्पष्टा भवति। नैतद्देवापित् द्वितीयविश्वयुद्धानन्तरमांग्लकोशेष्वपि सम्यक्—द्रष्टुं शक्यते यत् तिमिरः (Blackout) शून्यीकरणम् (Evacuation) पञ्चमार्गिणः (Fifth columnists) (1) अपगन्धीकरणम् (Deodorization अवरोही प्रक्रमः (Descending Process) इत्यादिशब्दानां संकलनं न दृश्यते। एवमेव विभिन्नक्षेत्रेषु या प्रगतिः बभूव गतवर्षेषु तन्नामांकनं नास्ति–आंग्लकोषेष्वपि प्राचीनेषु। अनेन कोशेतिहासयोर्मिथः सम्बन्धोऽस्ति पूर्णः।

एवमेव समाजशास्त्रमपि कोशेन पूर्णतया सम्बद्धम्। यतोहि कोशकारो सामाजिकसंस्थानां, विचार-परिपाटीनां, धारणानां, सम्यक्तया ज्ञानं विना

(1) डा. पाल, सी, बर्गः 'ए डिक्शनरी आवन्यूवर्डस भू. पृ. ११।

सफलो न भवति। विभिन्नसमाजेषु विभिन्नजातिषु च विभिन्नाः शब्दाः प्रयुज्यन्ते। अतः कोशविद्यापि विभिन्नसमाजेन सह सम्बद्धत्वात् समाजशास्त्रेणापि नूनमेव सम्बद्धा।

मनोविज्ञानस्यापि शब्दानामुपरि पर्याप्तप्रभावो निष्पतति। शब्दानाञ्च कलात्मकरूपेण नियोजनादिकं सर्वमपि मनोविज्ञानाधीनम्। कोशेषु शब्दानां नियोजनं मनोवैज्ञानिकाधारे स्यादेतदर्थं मनोविज्ञानकोशयोर्मिथः सन्निकटतमः सम्बन्धः :

इत्थमेव काव्य-कोशयोः स्थितिः। लक्षण-ग्रन्थकाराः— मम्मटादयः—अर्थसहितं शब्दमेव काव्यमिति समाचचक्षिरे (1)। शब्दानां तथा च तेषां विभिन्नार्थज्ञानाय कोशाणामुपादेयता निर्विवादा।

संस्कृतस्यानेके कोशाः कवीनां सौविध्याय एव निर्मिताः बभूवुः। अनेकार्थ-कोशाणां पर्यायकोशाणाञ्च मुख्यो ध्येयः श्लेषोपमालंकारप्रियकाव्यकर्तॄणां साहाय्योत्पादनमासीत्। एतेषां कोशाणाञ्च शब्दावली काव्येषु प्रचलितप्राया एव। मुख्यकोशकारास्तु स्वयमपि कवयः आसन्।

कोशभाषाविज्ञानादिविषये तु पूर्वमपि प्रारम्भकाल एव संक्षेपेण संकेतितम्। कस्यापि भाषाया विकास-क्रमस्य समुचितज्ञानाय तस्या भाषायाः विशालस्य शब्द-समुदायस्योपरि विभिन्नदृष्ट्या विचारणीयं भवति' शब्द-रूपेण कदा ? केन प्रकारेण किं परिवर्तनमभूत्-इति समालोचनीयं भवति। तदैव शब्दानां रूपपरिवर्तने यानि नियमानि तानि स्पष्टी भवन्ति। ऐतिहासिकक्रमेण निर्मितानां कोशाणामत्र मूल्यवानु-पयोगः। पुनश्च कस्या अपि भाषायाः शब्दकोशस्य अर्थस्य शब्दप्रयोगस्य च दृशाऽध्य-यनमपि भाषाविज्ञानान्तर्गतमेव। भाषोद्गमस्य प्रस्तुतीकरणमपि कोशायत्तम्। शब्दोत्पत्तिप्रदर्शनं विना तेषां शब्दानाञ्च रूपात्मकः प्राविधिकश्च प्रयोगस्तेन च रूपपरिवर्तनमिति एवं विषसाङ्गोपाङ्गविवेचनमकृत्वैव कश्चिदपि शब्दकोशः स्वकर्तव्यस्योचितं परिपालनं कर्तुं नैव शक्नोति। अनेन प्रकारेण भाषाविज्ञानं कोशविज्ञानञ्च मिथो घृतशर्करावत् सम्मिलिते स्तः।

कोश—व्याकरणशास्त्रयोरनादिसम्बन्धः। एतयोः सम्बन्धविषयेऽपि पूर्वमारम्भकाल एव किञ्चित् स्वल्परूपेण लिखितम्। भारतीयशिक्षापद्धतौ कोशव्याकरणयोरध्ययनं सहैव भवति स्म। अमर-कोशलघुसिद्धान्त कौमुदी—

---

(1) तददोषौ शब्दार्थौ —सगुणावनलंकृती पुनः क्वापि मम्मटः, काव्यप्रकाशः।

शब्दार्थौ सहितौ काव्यम् भामहः काव्यालंकारः।

अध्ययनपरम्पराभारतीयजनसमाजे सम्यक्तया श्रोता प्रोताचेति को नाम न भारतीय-समाजपरम्पराविज्ञो भारतीयसंस्कृतिरसिकश्च जानाति।

अतः सुस्पष्टमिदं यन्न केवलमुल्लिखितसंक्षिप्तशास्त्रैः सह एव कोशसम्बन्धोऽपितु न किमपि तादृशं'शास्त्रं यस्य सम्बन्धः कोशेन सह न स्यात्। तत्ववेत्तारः (Metaphisycians) तथ्यमिदमेकमतेन स्वीकुर्वन्ति यन्न कापि बौद्धिकीक्रिया शब्दं विना सम्पन्ना भवति। अत एव ज्ञानस्य प्रत्येकशाखायाः क्षेत्रे कोशाणां योगदानमसन्दिग्धम्[1]।

संस्कृतभाषायां कोषप्रामाण्यं महत्वपूर्णम्। यस्य शब्दस्य कथमपि शब्दशास्त्रा-नुसारं सिद्धिर्न भवेत् तस्य साधुत्वं कोशाधारं मत्वा स्वीक्रियते। यथा—मरुत्। कस्यापि व्याकरणस्यगणादिसूत्रैरस्य सिद्धिर्न भवति। परमय साधुशब्देष्वेवगण्यते यतोहि—अस्य पाठो विक्रमादित्यकोशे ऽनेन प्रकारण वर्तते—"मरुतः स्पर्शन प्राणः समीरो मारुतो मरुत्।" यावदस्य कोशवचनस्य ज्ञानं नासोत्तदानीमयं शब्दोऽसाधुरेव मन्यते स्म[2]।

कोशाणां महत्वम्:

उपोद्घातस्यारम्भ एव शब्दस्य साक्षात् ब्रह्मत्वं संकेतितम्। शब्दरूपेऽथवाऽनाहतनादरूपे प्राणिभिर्ब्रह्मस्य साक्षात्कारो विहितः। ऋग्वेदे शब्दतत्वो विष्णु नाम्ना प्रदर्शितः। सो हि सहस्रधारावान्। ताभिः सहस्र धाराभिस्तस्य सेचनं भवति। स हि वाक्तत्वं पवित्रयति[3]। यजुर्वेदे वाक्तत्वस्य विभिन्नगुणेषु प्रकाशः पातितः। अस्यानुसारं वाक्तत्वः समुद्रोऽस्ति—अर्थात् समुद्रवत्—अक्षयभाण्डार स्वरूपः, अगाधो दुर्बोधश्चास्ति। स हि सर्वव्यापकोऽनादिः अक्षरवान् चास्ति। स हि ऐन्द्र—अर्थात्—इन्द्रशक्तिसम्पन्नो भवति[4]। अस्य वाक्तत्वस्याश्रयेणैव सर्वोऽपि लोकः मननं करोति[5]। एवं विधस्य सर्वशक्तिमतो वाक्तत्वस्यार्थात् शब्दानां

(1) पी. एम. राजेटः—दि इण्टरनेशनल थेसारस भूमिका—पृ. ६।

(2) रामशंकर भट्टाचार्य—सस्कृत भाषामें कोष प्रामाण्य, हिन्दी-अनुशीलन पौष–फाल्गुण २०१०) पृ. २१—२६।

(3) सहस्रधारः परिषिच्यते हरि पुनानो-ऋग्वेदः ९-८६-३३।

(4) समुद्रोऽसि विश्वव्यचा अजोऽस्त्येक पद हि रसि बुध्न्यो वागस्येन्द्रमसि सदोऽस्यृतस्य द्वारौ। यजुर्वेदः ५-३३।

(5) 'वाग्वै मतिः। वाचाहीदं सर्वं मनुते।' शतपथे ८-१-२७।

ज्ञानं कोशै रेव भवति। कोशा एवास्य ज्ञानस्य एकमात्रसाधनानि (1)।

कस्यापि भाषायाः शब्दकोशस्तस्या साहित्यस्य सर्वाङ्गीणसमुन्नत्याः—मुख्यकारणभूताः। कश्चिदांग्लो विद्वान् स्वविचारान् प्रकटयन्नाह यत्—विश्वव्यापकयुद्धानां कारणं शब्दानामर्थस्याशुद्धज्ञानमेव (2)। राजेटोऽपि शब्दानामज्ञानवशादेव मानवानां कृते भयङ्करष्परिणामोपभोगमाह (3)। एतस्य सर्वस्यापि भयस्य—यदि भयम् नूनमेवानेनैव कारणेनास्ति—अथवा युद्धानाञ्चेत्— कारणमिदमेव भवति—निराकरणं कोशसाहायेनैव सम्भवम्। एवं सति किं कोशाणां महत्वं स्वल्पम्? न कदापि। अनेनैव सुस्पष्टमेव कोशाणां महत्वं मूल्यञ्च कियदस्ति-इति विस्पष्टं भवति।

कोशाः—विचारशक्तिं संकुचितसीमातो निष्कास्य विकसमाने विस्तीर्णधरातले ऽवस्थापयन्ति। विशेषतो द्विभाषीय—बहुभाषीयकोशैरत्रात्यन्तं महत्वपूर्णं कार्यं विहितम्। अत एव कोशाण स्थितिरद्य स्थानिका, प्रान्तीया, एकदेशीया च नास्ति अपितु-अन्तर्राष्ट्रिया वर्तते। अनेनैव कोशाणां महत्वं सुस्पष्टं भवति यदद्य ज्ञानस्य सर्वस्यापि शाखासमूहस्य पृथक् २ कोशाः निर्मिताः निर्माणाधीनाश्च सन्ति।

---

(1) A dictionary is thought of a vocabulary builder. Actually it is a tool on indispersable tool of the persoon who needs to know an exact word and its meanings. डा. एस. टेलरः हाट्म्पिस वाकेबुलेरी भूमिका पृ. ७।

(2) आगडन और रिचाड्सः "द मीनिंग आव् मीनिंग", भूमिका।

(3) A mis applied or mis apprehended term is sufficient to give rise to fierce and interminable disputes; a misnomer has turned the tide of popular opinion: a verble sophism has decided a party question, an artfull watch word, thrown among combustible materials has kindled the flame of deadly warefare and changed the distiny of an empire.

डा. पी. एम. राजेटः, पाकेट थेसारस १९५२ ई० पृ. ६।

पालिप्रकृतापभ्रंशदेशीकोशाः

अस्मिन् ग्रन्थे नूनमेव केवलं संस्कृतकोशाणामेव विषये निवेद्यमस्ति विशेषतस्तथापि पालिप्राकृतापभ्रंशभाषाः संस्कृतेन सहानिवार्यरूपेण सम्बद्धाः । तदिदञ्च विभिन्न ग्रन्थकृद्भिरपि समर्थितम् । यथा

(१) "शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा ।
संस्कृतं प्राकृतञ्चान्यदपभ्रंश इति त्रिधा ॥

अन्यच्च

(२) तदेतत् वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।
अपभ्रंशस्तु मिश्रञ्चेत्याहुरार्याश्चतुर्विधम् ॥

(३) तद्भवस्तत्समो देशी—इत्ययं प्राकृतः क्रमः ।

(४) शब्दार्थौ ते शरीरं संस्कृतं मुखं प्राकृतं बाहुः
जघनमपभ्रंशः पैशाचं पादौ उरो मिश्रम् ।

(५) संस्कृतं प्राकृतञ्चैव शौरसेनी च मागधी ।
पैशाचिकी चापभ्रंशः षड्भाषा परिकीर्तिताः ॥

अत एव आसां कोशा अपि संस्कृतकोशैः सहैव संक्षेपतो विन्यस्ताः । देशीनाममालाया निर्माणं आचार्यहेमचन्द्रेण बालानामुपकाराय एव विहितमासीदिदमपि विस्पष्टम् । यथा—

(६) "निःशेषदेशीशास्त्राणां परिमलेन, परिशीलनेन पल्लवितं प्रादुर्भूतं क्वचिदर्थासमर्पकत्वेन क्वचित्द्वर्णानुपूर्वी निश्चयाभावेन क्वचित् पूर्वदेशी विसम्वादेन क्वचित् गतानुगतिकता निबद्धशब्दार्थतया यत्कुतूहलं तेन यदाकुलितात्मा कथमयमपभ्रष्टशब्दपङ्क—मग्नो जनः समुद्धरणीय इति परोपचिकीर्षरभसस्तेन हेतुना देशीरूपाणां शब्दानां सङ्ग्रहो विरच्यते ।

तदेतस्यापि समावेशोऽत्र विहितो वर्तते । इत्थमेव हिन्दीकोशेषु डा० श्री रघुवीरविरचितस्य विशालशब्दकोशस्यापि विषयेऽत्रैव विवेचितं यतोहि कोशोऽयं संस्कृताधारे विनिर्मितोऽस्ति संस्कृतस्य गौरवमनेन भवति—एव विस्पष्टमतोनाप्रासङ्गिकम् । तदिदञ्च सर्वं विद्वद्भिः परिशिष्टरूपमेव ज्ञेयमितिशम् ।

---

(१) काव्यालंकारः १।१६।२८ ।
(२) काव्यादर्शः १।३२ ।
(३) काव्यादर्शः १।३३ ।
(४) काव्यमीमांसा ३।६ ।
(५) काव्यकल्पलता वृत्तिः पृ, ८ ।
(६) देशीनाममाला १-२-वृत्तिः

संस्कृतकोशाः

(अ)

अगस्त्य निघण्टुः
अजयः
अमर चन्द्रिका
अर्धमागधी कोशः
अनेकार्थ मञ्जरी
अनेकार्थ ध्वनि मञ्जरी
अनेकार्थ पद मञ्जरी
अनेकार्थ तिलकम्
अनेकार्थ संग्रहा
अनेकार्थ कोशः
अन्तादि कोशः
अनेकार्थ कोषः
अनेकार्थ माधवी
अनेकार्थ शतकम्
अभिधान चिन्तामणिः
अभिधान रत्नमाला
अभिधान कोशः
अभिधान रत्नाकरः
अभिधान रत्नसारः
अभिधान दीपिका कोशः
अमर कोशोद्घाटनम्
अभिधान राजेन्द्र कोशः
अभिधान चूड़ामणिः
अभिधान तन्त्रम्
अमरकोशः
अमर सारः
अमरदत्त कोशः
अमर चन्द्रकोशः
अमर सिंह कोशः
अमर पीयूषम्
अमर पञ्चिका
अनेकार्थ समुच्चयः
अमर कोश पञ्चिका
अमर माला
अरुण कोशः
अलंकार संग्रहः
अव्यय संग्रह निघण्टुः

अशोक कोशः
असालति प्रकाशः
आरण्यात चन्द्रिका नाम क्रिया कोशः
आख्यानक मणि कोशः
आङ्गल सस्कृत कोशः
आदर्श हिन्दी–संस्कृत कोशः
आर्ष कोशः
इन्दु कोशः
उणादि कोशः
उत्पलिनी
उत्पलः
उणादि निघण्टुः
उपनिषद् महावाक्य कोशः
उष्मविवेकः
एकाक्षर नाममाला
द्व्यक्षरनाममाला कोशः
एकार्थ नाममाला
एकवर्ण संग्रहः
एकाक्षर रत्नमाला
एकाक्षर निघण्टुः
एकाक्षर कोशः
एकाक्षरी कोशः
एटिमोलोजिचेस्वर्टर बुचदेर संस्कृत स्पेंच
ऐन्द्र निघण्टुः
ककारादि कृष्ण सहस्रनाम
कल्पद्रु कोशः
कल्पतरुः
कविकल्पद्रुमः
कवि सञ्जीवनी निघण्टुः
कल्पद्रुमः
कलिङ्ग कोशः

कविजन शेवधिः
कविजीवन निघण्टुः
कविदर्पण निघण्टुः
कविदर्पण कोश संग्रहः
कविदीपिका
कविरहस्यम्
कवि मञ्जरी
कवि कल्पलता
काटेलोगोरस् काटेलोगोरम
कात्य कोशः
कात्यायन लिङ्गानुशासनम्
कामधेनुः
कालिदास कोशः
कालिकासाहस्रनाम
काशकृत्स्न शब्द कल्पधातु पाठः
क्रिया पद निघण्टुः
क्रिया कलापः
केशव लिङ्गानुशासनम्
केसर मालिका
कैय्यदेव निघण्टुः
कोमलकोशसंग्रहः
गंगाधर कोशः
गणमञ्जरी
गणितीय कोशः
गणित नाममाला
ग्रहाभिधानम्
गायत्री सहस्रनाम
गीर्वाण भाषा मञ्जरी
गीर्वाण भाषा भूषणम्
गुणरत्न माला
गणशसहस्रनामावलिः
गोपाल कोशः
गोपाल सहस्रनाम

संस्कृतकोशाः

गोवर्धन कोशः
गो ज्ञान कोशः
चन्द्रगोमी लिङ्गानुशासनम्
चन्द्रकोशः
चन्दननन्दन कोशः
चरक कोशः
चीनीय बौद्धशब्दानां संस्कृताङ्गल-पर्यायकोशः
छन्दः सूत्रम्
छात्रीय नवीन संस्कृत कोशः
छात्रीय प्रायोगिक कोशः
जकार भेदः
जेज्झट कोशः
जैमिनी निघण्टुः
डल्लण कोशः
तर्क शास्त्र पारिभाषिक शब्दावलिः
तारापाल कोशः
दण्डी कोशः
द्व्यक्षरी नाममाला
दशदीप निघण्टुः
दामोदर कोशः
द्रायिडार्थ दीपिका
द्विरूप कोश
दुर्ग लिङ्गानुशासनम्
दुर्ग कोशः
देशी नाममाला
देशी कोशः
देश्य निघण्टुः
देशी सहस्र नामावली
धनञ्जय कोशः
धनञ्जय नाममाला
धनपाल कोशः
धन्वन्तरि कोशः
धन्वन्तरि निघण्टुः
धर्मशास्त्र कोशः
धर्मदास कोशः
धर्म कोशः
धरणी कोशः
धातुरूप कोशः
धर्मराज निघण्टुः
धर्मिष्ठ कोशः
नन्द कोशः
न्याय कोशः
न्याय प्रपञ्चः
नक्षत्राभिधानम्
नाट्यरत्न कोशः
नानार्थ रत्न समुच्चयः
नानार्थार्णव संक्षेपः
नानार्थ मञ्जरी
नानार्थ संग्रहः
नानार्थ समुच्चयः
नान्यदेव कोशः
नानार्थ रत्नमाला
नानाविध निघण्टु वचनम्
नानार्थ कोशः
नानादेशीय कोशः
नानार्थपद संग्रह निघण्टुः
नानार्थ तिलकम्
नानार्थ शब्दानुशासनम्
नानार्थ पद संग्रहः
नानार्थ ध्वनि मञ्जरी
नानार्थ संग्रह कोशः
नामनिधानम्
नामावली
नाममाला शेषः
नामगुण माला
नामलिङ्गानुशासनम्
नामसंग्रह माला

नाममाला
नाममातृका, निघण्टुः
नामसंग्रह निघण्टुः
नाममालिका
नाममञ्जरी
निगम कोशः
निघण्टु रत्नाकरः
निघण्टु शेषः
निघण्टु संग्रहः
निरुक्त समुच्चयः
निरुक्तम्
निरुक्त टीका
नैघन्टुकाध्यायः
नृत्य रत्नकोशः
पङ्कज भट्ट कोशः
पञ्चतत्व प्रकाशः
प्रत्यक्ष शरीरम्
प्रतापः
पद चन्द्रिका
परमविवेक
पद्म कोशः
पद्मचन्द्र कोशः
पदविवृत्तिः
पदमञ्जरी
पदमणि मञ्जरी
पद संग्रह निघण्टुः
पद रत्नावली
प्रबन्ध कोशः
प्रमाण नाममाला
पर्याय रत्नमाला
पर्याय मुक्तावली
पर्यायावली
प्रयुक्त पद मञ्जरी
परिशिष्टम्
पायलिच्छनाममाला
प्रायोगिक आङ्ग्ल संस्कृत कोशः
बाल कोशः

पाणिनी लिङ्गानुशासनम्
पुद्गल कोशः
पुरुषोत्तम लिङ्गानुशासनम्
पुरुषोत्तम सहस्रनाम
पूर्ण वैदिक भाषा कोशः
पूर्ण ध्वनि शास्त्र कोशः
पौराणिक कोशः
बटुकः
बलशर्म कोशः
बृहद् हारावली
बागभट्टाचार्य कोशः
बाचस्पति कोशः
बालबोधिनी
बालप्रबोधिका कोशः
बीज कोशः
बुध मनोहरा
बोपदेव कोशः
बोपालित कोशः
भद्र मल्ल
भरतमाला
भरतमुनि कोशः
भरत कोशः
भव कोशः
भवानी सहस्र नाम
भागुरि कोशः
भारतीय राजनीति कोशः
भारतस्य शास्त्रीय कोशः
भारतवर्षीय प्राचीन चरित कोशः
भावीनाम माला
भावप्रकाश निघण्टुः
भाव प्रकाशः
भावगुण नाम माला
भावगुण रत्न माला
भुग्न कोशः
भुवन कोशः

संस्कृतकोशाः

नूगोलेतिहास साहित्य कोशः
भैरव सहस्र नाम
भोगिन्द्र कोशः
मंकल कोशः
मंख कोशः
मदनपाल कोशः
मदनपाल निघण्टुः
मल्ल कोशः
महाभाष्य कोशः
महाखण्डन कोशः
महाभारत कोशः
महीप कोशः
महाभाष्य शब्दानु क्रमणिकाः
मार्तण्ड कोशः
मातृका निघण्टुः
माधव कोशः
मानस शब्द सागरः
मीमांसा कोशः
मुक्तावलिः
मुकुन्द कोशः
मुकुटः
मुक्तक कोशः
मुरारि निघण्टुः
मुनि कोशः
मेदिनी कोशः
युगल कोशः
रत्न कोशः
रत्न माला
रन्ति देव कोशः
रभस पाल कोशः
रभस कोशः
रस शब्द सरणि निघण्टुः
राजवल्लभ निघण्टुः
राजदेव कोशः
राजशेखर कोशः
राजकोश निघण्टुः
राज निघण्टुः
राजतरंगिणी कोशः
राजकोश निघण्टुः
राजमुकुट कोशः
राममुकुट पद चन्द्रिका
राम कोशः
रामगुलाम कोशः
रामनाथ कोशः
रामसहस्र नाम
रुद्र कोशः
रूप नारायण कोशः
रूप मञ्जरी
रूप रत्नाकरः
रूप मञ्जरी नाम माला
लघु निघण्टु सारः
लघु नाम माला
लघु संस्कृताङ्गल कोशः
ललिता सहस्रनाम
लक्ष्मी निवासः
लिङ्ग प्रकाशः
लिङ्गानुशासन वर्गः
लोक प्रकाशः
लोक भाषा व्याख्या
लोमन कोशः
वकार भेदः
वर्ग निघण्टुः
वर्ण प्रकाशः
वर्ण देशनम्
वर्णाभिधानम्
वर्णदीपिका
वर्ण बीज प्रकाशः
वृत्त कोशः
वृत्त रत्नाकरः
व्याडी कोशः
व्याख्या सुधा (रामाश्रमी)
व्याख्या प्रदीपः

वररुचि लिङ्गानुशासनम्
वररुचि कोशः
वस्तुरत्न कोशः
वृहद्हारावलिः
शब्दमयार्णवः
वाचस्पत्यभिधानम्
वाचस्पत्यम्
वात्स्यायनम्
वामनलिङ्गानुशासनम्
विक्रमादित्य कोशः
विट्ठलकृष्ण भट्ट कोशः
विश्व प्रकाशः
विक्रम निघण्टुः
विश्व निघण्टुः
विश्व लोचन कोशः
विश्व रूप प्रकोशः
विशेषामृतम्
विश्वलोचन कोशस्य
शब्दानुक्रमणिका
विश्व रूपः
विष्णु कोशः
विष्णु सहस्रनाम
विविध रूप कोशः
वैजयन्ती कोशः
वैदिक कोशः
वैदिक शब्दार्थ पारिजातः
वैदिक इण्डेक्स
वैदिक पदानुक्रम कोशः
वैद्यक शब्द सिन्धुः
वैष्णवाभिधानम्
षण्मुखवृत्ति निघण्टुः
षडर्थ निर्णयः
शतकम्
शब्दार्थ चिन्तामणिः
शब्द तरंगिणी
शब्द भेदः

शब्दार्थ कल्पतरुः
शब्द निर्णयः
शब्द स्तोम महानिधिः
शब्ददीपिका
शब्द चन्द्रिका
शब्द सागरः
शब्दार्थ निर्णयः
शब्दरत्नावली
शब्द चिन्तामणि निघण्टुः
शब्दार्णवः
शब्द भेद प्रकाशः
शब्द रत्नाकरः
शब्द रत्नमाला
शब्द संग्रह निघण्टुः
शब्द रत्नप्रदीपः
शब्द प्रभेदः
शब्द रत्नम्
शब्द रत्न समन्वयः
शब्द भेद निर्देशः
शब्द सार निघण्टुः
शब्द समन्वय कोशः
शब्द सागरः
शब्दार्थ संग्रह कोशः
शब्दार्थ भानु कोशः
शब्द कल्पद्रुम कोशः
शब्द रत्सावली
श्लेषार्थ पद संग्रहः
शाकटायन कोशः
शाब्दिमण्डनम्
शाब्दि विद्वत्कविप्रमोदकः
शारदालघु नाम माला
शारदीय निघान माला
शारदीयाख्यान नाम माला
शारदी नाम माला
शाश्वत कोशः

संस्कृतकोशाः

शिलोच्छ
शिव प्रकाशः
शिव कोशः
शिव सहस्रनाम
शीघ्रबोधिनी नाममाला
शुभाङ्कः
सकार भेदः
सकलग्रन्थ दीपिका
संगीत रत्नकारः
सज्जन कोशः
सञ्जीवनी कोशः
संयमि नाममाला
संयमि नाममालिका
सरस शब्द सरणिः
सर्वधर कोशः
सर्वार्थ साधनी
सर्व संग्रह निघण्टुः
संसारावर्तः
संस्कृत शब्द कौस्तुभः
संस्कृताङ्गल कोशः
संस्कृताङ्गल लघुतम कोशः
सस्कृत धातु कोशः
संस्कृत वर्टर बुच
संस्कृत साहित्य कोशः
संस्कृत प्रमाण कोशः
साध्य शब्दार्थः
सारेश्वर लिङ्गानुशासनम्
साहसाङ्कः
सारस्वती भिधानम्
सिद्ध मन्त्र कोषः
सुप्रसिद्ध पद मञ्जरी
सुभाषित रत्नभाण्डागारः
सूक्ति मुक्तावली
सर्यकोशः

सानन्दी कोशः
सोम प्रकाशः
हरिः
हरकोशः
हरिकोशः
हृदयदीपकः
हारावली
हिन्दी संस्कृत शब्दकोशः
हिन्दू धर्म शास्त्रस्य शास्त्रीय कोशः
हेम चन्द्र लिङ्गानुशासनम्
हेमचन्द्रीयम्
हेमनाममाला
त्रिकाण्ड शेष कोशः
त्रिरूप कोशः
श्री कोशः
टीकासर्वस्वम्
त्रिकाण्ड विवेकः
सारसुन्दरी टीका
त्रिकाण्ड चिन्तामणिः
शब्द प्रदीपिका निघण्टुः
शंकर भारतीय निघण्टुः



संस्कृतकोशाणामितिवृत्तम्

कठिनमसिधारा व्रतम् :-

संस्कृतभाषा, संस्कृतवाङ्मयञ्च परमप्राचीनपरम्पराऽऽधारितमस्ति । न जानेऽनया भाषया समयस्य कियन्ति परिवर्तनान्यवलोकितानि, कतिधा अस्याः शब्दोद्याने वसन्तः समायातः कतिवारं च शिशिरम् । एतदप्यनुमातुं न शक्यते यत् कतिवारमियं राजभाषाऽभूत्—अथवानन्तरं कतिधा राजप्रासादात् दूरे निक्षिप्ता समुपेक्षिता च बभूव । परमिदमपि तथ्यमस्ति यदस्या अमरभारतीत्वमद्यापि विभिन्न युगानां, अनेक परिस्थितीनां, अगणनीयपरिवर्तनानाञ्चातिविकटसंहारक-प्रहारैरपि नैव प्रणष्टम् । इयमद्यापि—अमरभारती । एतस्य च कारणं वर्तते यदियं सर्वदापि जनसाधारण-सम्पर्कं न तत्याज । सा चेयं वैदिकात्—लौकिकसंस्कृत-रूपे, पालि—प्राकृत—अपभ्रंशरूपे वाऽथवाऽद्य विविधप्रान्तीयभाषारूपे, यथा कथमपि स्यात्, परन्तु स्वीयं रूपं संरक्षन्ती मौलिकतया विभिन्नशाखासु प्रवर्धमाना एव द्रष्टुं शक्यते । नास्याः परिवारशाखाः— भारत एवापितु सर्वत्रविश्वस्मिन् विश्वे विशेषतश्च वृहत्तर भारते यत्र तत्र प्रसृताः सन्ति ।

इत्थमति प्राचीनत्वात् विश्वव्यापित्वाच्चास्याः कस्या अपि शाखायाः शास्त्रस्य विद्याया वा—इतिहाससमन्वेषणमतीवकठिनं कार्यम् । न च केवलं कठिनमेवापितु दुष्करमसम्भवमपि वा कथयितुं शक्यते । अत एव संस्कृतवाङ्मयेति वृत्तं प्राचीनत्वात्—विस्पष्टं नास्ति तथापि विभिन्नसंस्कृत—साहित्येतिहासान् समालोड्य, अनेकानेकग्रन्थागारपुस्तककोशान्—समालोच्य, सहैव विशिष्टविविधशोधपत्रपत्रिकाः सन्निरीक्ष्याग्रे सरामि । विभिन्न कोशास्तेषां टीकाटिप्पण्यश्चाप्यत्र स्वकीयानुसन्धानेन सहैव सहायकाः सन्ति । परं कठिनमसिधाराव्रतमिवकठिनमिदं कार्यम्—नात्र संशयः ।

संस्कृतकोशवाङ्मयमूलम् :—

वेदा :-

अस्माकं सर्वविधज्ञानस्य लिखितरूपेणारम्भो वैदिककालत एव भवति । वेदा न केवल भारतीयज्ञानस्यापितु विश्वज्ञान—विज्ञानयोः कोशभूताः । तदिद वैदिकवाङ्मयं चतुर्षु खण्डेषु विभक्तमस्ति । तद्यथा—(१) संहिताः, (२) ब्राह्मणानि, (३) आरण्यकानि, (४) उपनिषदश्च । संहितासु केवलं मन्त्रसंग्रहः ब्राह्मणेषु मन्त्राणां याज्ञिकप्रयोगाः, आरण्यकेषु चोपनिशत्सुचदर्शनिक भावजोदभवोऽस्ति । विश्वविद्वांसः ऋग्वेदग्रन्थं विश्वस्य सर्वप्रथम लिखितग्रन्थ स्वीकुर्वन्ति (1)। अतो वेदा एव संस्कृतकोशाणामुदयभूमयोऽपि सन्ति

निघण्टु :-

इत्थं प्राचीनतमोऽयं वैदिककोशः निघण्टुरिति कथ्यते । निघण्टुषु वैदिकानि नामाख्यातानि संगृह्यन्ते । यदा किल संहिताज्ञाने समाजोऽस्मदीयः काठिन्यमनुभूतवान् तदेवात्र सौविध्यमुत्पादनाय निघण्टवः प्रवृत्ताः । निघण्टुर्हि वैदिकज्ञान प्राप्तिसाधनम् । भाषा विज्ञानस्य प्रकाण्डपण्डिताः, गवेषकाश्च गवेषणानन्तरमिदं सुस्थिरं चक्रूर्यत्—निघण्टु—संरचना कोशरचनाया—अधुना यावत् ज्ञातेषु सर्वेष्वेव प्रयासेषु प्रथमतमः (2)। साहित्ये यत्र तत्र विकीर्णानां शब्दानां सौन्दर्येण संकलनमाकलन तस्मिन् प्राचीनतमे युगेऽतीव दुष्करं कार्यमासीत् । इदं कार्यं तदा नवीनमप्यासीत् । निघण्टुर्हि पूर्णवेदकोशो नास्ति । तथापि तत्कालीनावश्यकतानुरूप कोशोऽयं पर्याप्तः कथयितुं शक्यते ।

---

(1) Rigveda is the oldest book in the library of the world.
— Max muller.

(2) The Nighantu and the Nirukta. डा. लक्ष्मण स्वरूप ।

पञ्चाध्यायात्मक :-

निघण्टुरयं पञ्चाध्यायात्मकः। अस्योपरि यास्केन भाष्यं लिखितम्। आद्य-मध्यायत्रयं नैघण्टुककाण्डमित्युच्यते। एते शब्दा—यास्केन निरुक्तस्य द्वितीये तृतीये चाध्याये व्याख्याताः। एष्वध्यायेषु निघण्टोः १३४१ शब्दाः परिगणिताः। एषु च यास्केन केवल २३० शब्दानामेव व्याख्या कृता। एतेषु १३४१ शब्देष्वपि पर्यायवाचिनः शब्दाः संगृहीताः। यथा पृथिव्याः २१ पर्यायाः। ११ दहनशब्दपर्यायाः। १२ बहुशब्दपर्यायाः। निघण्टोश्चतुर्थाध्याये खण्डत्रयमुपलभ्यते। अत्र .२, ८४, तथा च १३२ पदानि सन्ति। एवमत्रैतेषां पदानां योगः २७८ भवति। सर्वेऽप्येते शब्दाः स्वतन्त्राः। अस्य खण्डत्रयात्मकस्य निघण्टोः चतुर्थाध्यायस्य व्याख्या यास्केन निरुक्तस्य चतुर्थपञ्चमषष्ठाध्यायेषु विहिता। इदमेव नैगमकाण्डमथवा—ऐक पदिक काण्डमित्यप्युच्यते। अस्य काण्डस्य शब्दाः सदिग्धाः—कठिनाश्च विद्यन्ते। अत एवात्र व्याख्यां कुर्वाणो यास्कः स्वयं लिखति–'अथ यान्यनेकार्थानि एकशब्दानि, तान्यतोऽनुक्रमिष्यामः अनवगत संस्कारान् च निगमान्। तदेकपदिकमित्याचक्षते (1)। निघण्टोः पञ्चमोऽन्तिमश्चाध्यायो दैवतकाण्डमित्युच्यते। अस्य षट्सु खण्डेषु ३, १३, ३६, ३२. ३६, एवञ्च ३१ पदानि सन्ति। एतानि भिन्न भिन्न देवता-नामानि। नैतानिनि च पर्यायभूतान्यपितु स्वतन्त्राणि। आभिः सञ्ज्ञाभिः- देवानां स्तवनं प्राधान्येन विधीयते (2)। एकस्मिन्-एकस्मिन् पृथक्-पृथक अध्याये एतेषां खण्डानां व्याख्याऽभूत्। अत्र हि-यास्केन देवतानां विषये पर्याप्तप्रकाशो निपातितः। यद्यपि निघण्टोर्व्याख्या द्वादशाध्यायेषु समाप्तिमेति—

परिशिष्टम् :-

पर केनचिदुत्तरकालीन—लेखकेन पुन रत्राध्यायद्वय नियोजितम् परिशिष्ट-रूपेण। अतोऽत्र द्वादशाध्यायमात्रे निरुक्ते पुनरध्यायसख्या चतुर्दशत्वमाप्नोति। दवतकाण्डस्य परिशिष्टेऽस्मिन् देवानां यज्ञानाञ्च विषये लिखितम्। प्रसङ्गतः कतिपयदार्शनिक-विषयाणामप्यत्रोल्लेखः प्राप्यते। अय प्रकारश्च निरुक्तेन साकं मिलति। अनेन निरुक्तश्चतुर्दशभिरयार्यैनिबद्धो भवति।

संस्कृतेरितिहास :-

अस्य दैवतकाण्डस्योपरि—एव वैदिकधर्मस्य वैदिकसस्कृतेश्चेतिहासः पूर्णरूपेणाधारितो वर्तते। यतोहि वैदिकदेवता व प्रका...

---

(1) नि. ४.१। यास्कः।

(2) "तत् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते।"

— यास्क-निरुक्तम् ७-१।

कोऽयमेव निरुक्त ग्रन्थः—प्रथमतमः। इतः प्रथमं न केनापि विषयस्यास्य स्पर्शनं कृतम्। कस्या अपि जातेः स्वधर्मविषये चिन्तनस्य प्रथमकिरणानामत्रैव दर्शनं भवति।

यास्केन निरुक्ते निघण्टोः सर्वेषां शब्दानां व्याख्या न कृता। पर्यायवाचिशब्दाध्यायेषु तु कस्याप्येकस्यैकस्य शब्दस्य व्याख्यां स विहितवान्। ततोऽपि सत्यमिदमस्ति यत्तेन केवलं निघण्टु शब्दानामेव व्याख्या न कृतापितु प्रसङ्गतः समायाताः शब्दाः अपि व्याख्याताः। डा० सिद्धेश्वर वर्मणोऽनुसारं निरुक्ते केवलं १२९८ निर्वचनानि सन्ति। यस्मात् स्थानात् नैघण्टुकानां शब्दानां व्याख्या प्रारभते ततः पूर्वं स्वशास्त्रे प्रवेशार्थिनां कृते यास्केन विस्तृतैका भूमिका लिखिता। द्वितीयाध्यायस्य द्वितीयपादतो निरुक्ते निघण्टोः प्रथमगोशब्दस्य व्याख्यानमारभते। ततः पूर्वं पूर्णोऽपि प्रथमाध्यायो द्वितीयाध्यायस्य च प्रथमपादं यावत् सर्वमिदं भूमिकामात्रं वर्तते। अस्यां पदभेदाः शब्दानां धातुजसिद्धान्तः (1)। निरुक्तोपयोगित्वं, निर्वचननियमाः, इत्थं विभिन्नोपयोगिविषयव्याख्यानमत्राभूत्। इयमेवावस्था दैवतकाण्डस्य वर्तते। वैदिकदेवानां नामव्याख्यानात् पूर्वं यास्कः सप्तमाध्यायभूमिकायां देवानां स्वरूपम्, भेदान्, स्वभावञ्च स्पष्टयति। भाष्यभूमिकालेखनस्यायमेव प्रकारः— महाभाष्ये पतञ्जलिनापि समनुकृतः।

निरुक्तीशैली :-

निरुक्तस्य व्याख्याशैलीमादाय किमपि विचारणीयमस्ति निघण्टोः कमपि शब्दं गृहीत्वा यास्कस्तत्क्षणं तस्य व्याख्यां कुरुते। यथा-नद्यः कस्मात्? नदनाः—भवन्ति - शब्दवत्यः। कदाचिदसौ केवलं समुद्धरणदानपूर्वकमर्थं विवेचयति। कदाचिच्च भूमिकां संस्थापयन्-इतिहासाश्रयणपूर्वकं ऋचमुदाहरति। यथा वृत्रः, अश्विन्–अनयोः स्वरूपविवेचनाकाले ऐतिहासिकस्यान्यमतानाञ्च सुन्दरः समुल्लेखोपलभ्यते (2)। कदाचिच्च केवलं निर्वचनमेव क्रियते। कदाचित्: सन्देहपूर्णविषयेष्वयं भारतीयदार्शनिक-परम्परानुरूपं पूर्वपक्ष संस्थापन पुरः सरं सशक्ताभिस्तीव्रयुक्तिभिश्च पूर्वपक्षं खण्डयन्–उत्तरपक्षसंस्थापनां करोति। स्वसिद्धान्तस्थापनाकालेऽसौ – अन्येषामपि तच्छास्त्रविज्ञानां मतसंस्थापनां कुरुते। भवन्तु ते विचारा यास्कप्रतिकूला अपि। एवं किलासौ पूर्णवैज्ञानिकविचारक आसीदिति स्वीकर्तुं शक्यते निरुक्तशैलीमालोक्य।

---

(1) सर्वं धातुजमाह निरुक्ते।

(2) निरुक्तम् २।६।२। १२।१।

निरुक्तस्य महनीयता :—

यास्ककृत निरुक्तं यद्यपि निघण्टोर्व्याख्याभूतमेव ततोऽपि—एकमत्यन्तोपयोगि-भाषाशास्त्रीय—देवताविषयक-सामग्र्या मण्डितं वेदार्थमीमांसाकारकं—अनुपमग्रन्थ-रत्नमस्ति। अस्मिन् वेदार्थविषयका पूर्वधारणा, कल्पना, व्याख्या च स्थाने स्थाने विवेचिता। वैदिक-पदानां मौलिका व्युत्पत्तिस्तत्रोपलब्धा भवति। नेदं च केवलं व्युत्पत्तिशास्त्रमात्रमेवापितु भाषाविज्ञानस्यापि—अपूर्वं सम्पत्। शब्दानां धातुजत्वम् वैदिकमन्त्राणां सार्थकता च सर्वमिदं निरुक्तेनैव समुद्घोषितम्। अनेन प्रकारेण यास्काचार्येण वैज्ञानिककोशशास्त्रस्य कोश-कलायाश्चाधारशिलां संस्थापिता। अस्य सत्यस्य सम्मुखे विश्वस्य वैज्ञानिकाः सर्वथा नतमस्तकाः सन्ति (1)।

निघण्टुकालो निघण्टुकारश्च-

यद्यपि निघण्टवोऽनेके—आसन् सर्वेषु च वैदिककोशः - आसीत्तथाप्यत्र मतविभेदः। उपलब्धस्त्वेक एव निघण्टुरिदानीमस्ति। अत्र केचन निघण्टुनिरुक्तयोः कर्तारं यास्कमेवाहुः। परमत्राधिकाः विद्वांसो निघण्टुकारं यास्कात् पूर्वकालीनमेव निर्धारयन्ति। महाभारतानुसारञ्च निघण्टुकर्ता प्रजापतिकश्यपो ऽस्ति (2)। महाभारते वाक्यमिदमुपलभ्यते :—

वृषो हि भगवानधर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्मात्—वृषाकपि प्राह कश्यपो मां प्रजापतिः (3)॥

एवं किल प्राचीन परम्परानुशीलनेन यास्कस्तु निघण्टुकारो नैव सिद्ध्यति ऋग्वेद—निघण्टुभाष्यकारौ सायण-देवराजयज्वानौ—एवाधुना सर्व-प्राचीनौ। देवराज यज्वा चाचार्यसायणात् प्राक्तनः। विभिन्नमतमतान्तरान्वेषणानुसन्धानानन्तरं देवराजयज्वनः समयोऽनुमानतः ११७५—१२६५ शतकेषु क्वचिदपि भवितुं शक्नोति। एवं सत्यपि समुपलब्धनिघण्टुकर्तुः समयादिक निश्चित रूपेण—एकादश-शतकात् निःसन्देहमेव पूर्वं कथाचित् निर्धारयितुमुचितम्।

---

(1) डाक्टर हेमचन्द्रजोशी "सरस्वती", अक्टूबर १६२०, पृ० २३१।

(2) डा, बलदेव उपाध्याय "संस्कृतशास्त्रों का इतिहास" पृ. ३२१।

(3) महाभारत, मोक्ष धर्मपर्व अ० ३४२ श्लो. ८६—८७।

निघण्टव :-

समुपलब्धनिघण्टुं विहाय यास्कः स्वयमप्येकस्यापरस्य निघण्टोः समुल्लेखं कुरुते । स हि निघण्टुविषयमित्थमाह:— १—एतावन्तः समानकर्माणो धातवः (अर्थात् समानार्थकधातुसंग्रहः। २—एतावन्त्यस्य सत्वस्य नामधेयानि। अर्थात् समानार्थकभिन्नशब्दसंग्रहः) ३ — एतावतामर्थानामिदमभिधानम् (अर्थात्—अनेकार्थशब्दानां सङ्ग्रहः) ४—नैघण्टुकमिदं देवतानाम, प्राधान्येन—इदम्, तदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत्, (अर्थात् देवानां प्रधानगौणनाम्नां सङ्ग्रहः) एतच्चतुष्टयं यस्मिन् भवति तन्निघण्टुरिति । प्रस्तुतनिघण्टौ प्रा० राजवाडेऽनुसारं तृतीयं लक्षणं न घटते। अतस्तस्येदमनुमानमस्ति यदेभिर्लक्षणै-र्युक्तः कश्चिदपरो निघण्टुरासीत् वस्तुतस्तु ऐकपदिककाण्डे ऽनेकार्थ शब्दानामुल्लेखो-ऽस्ति, केचन व्याकरणदृशाऽज्ञात संस्काराः शब्दा अपि तत्र परिगणिताः । उभयो-र्मिश्रणं निघण्टौ नोचितम् । वर्तमाननिघण्टौ केवलं खण्डत्रयी वर्ततेऽस्याश्च चतुर्लक्षण्या सह सामञ्जस्यसंस्थापनायाः प्रयासो विहितः श्री दुर्गाचार्येण स्वकीय-निरुक्तवृत्तौ। ऐकपदिककाण्डस्यानवगतसंस्काराः शब्दाः अस्यां चतुर्लक्षण्यां नैव समायान्ति । अतोऽवश्यमेवापरेऽपि निघण्ठवः—एभिर्लक्षणैः सम्पन्नाः स्युर्येषु—अव्याप्त्यतिव्याप्त्यादयो दोषा न भवेयुः। पुनस्तान्यप्येके समामनन्ति [1]। अर्थात् केचन-आचार्याः स्वनिघण्टुषु देवानामेवविधां नामगणनामकुर्वन्—इत्याशयः । अनेन तावत्स्पष्टं सिद्ध्यति यदनेके निघण्टवः—आसन् । सम्भाव्यते यद्याकेन निरुक्तारम्भे निघण्टुशब्दस्य बहुवचनप्रयोग :—एतदर्थमेव कृतो भवेत् । स हि शब्दानाँ भागचतुष्टयम् करोति । तद्यथा—"नामाख्यातोपसर्गनिपाताः" प्रस्तुतनिघण्टौ केवलम् नामाख्याते स्तः। अंत उपसर्गनिपातयोरप्यपरः कश्चिन्निघण्टुरासीत् ? वैदिकवाङ्मयस्येतिहासे निघण्टूनां बहुत्वं सप्रमाणं संसाधितम् [2]।

निरुक्तकारो निरुक्तकालश्च :-

निघण्टुकालादनन्तरं निरुक्तकालः समागच्छति । दुर्गाचार्यानुसारं निरुक्तानां संख्या १४ अस्ति [3]। समुपलब्धे यास्कस्य निरुक्ते द्वादशनिरुक्तकाराणां नामोल्लेखो मिलति। अक्षरक्रमेण एतेषाँ नामानि निम्नप्रकारेण सन्ति :—

(१) आग्रायणः, (२) औपमन्यवः, (३) औदुम्बरायणः, (४) और्णवाभ; (५) कात्थक्यः, (६) क्रौष्टुकिः, (७) गार्ग्यः, (८) गालवः, (९) तैटीकिः, (१०) वार्ष्यायणिः, (११) शाकपूणिः, (१२) स्थौलाष्ठीविः, त्रयोदशस्तु स्वयं यास्काचार्यो विद्यते। अस्यातिरिक्तं चतुर्दशतमो निरुक्तकारः क आसीत् ? इत्ययं

(1) नि. ७-१५ ।

(2) वैदिक वाङ्मयका इतिहास भाग १ खण्ड २ ।

(3) निरुक्तं चतुर्दश प्रभेदम् । दुर्गवृत्तिः १-१३ ।

प्रश्नोऽधुनापि समाधानं समीहते । उल्लिखितनिरुक्तकाराणां विशिष्टमतज्ञानं निरुक्तस्यानुशीलनेन सुस्पष्टतया जायते [1]। निरुक्ते शाकपूणेर्मतस्याधिक्येन प्रयोगो दृश्यते। बृहद्देवतायामप्यस्य मतनिर्देशोऽस्ति विहितः। बृहद्देवतायां पुराणेषु च शाकपूणिरयं रथीतरशाकपूणि-नाम्ना स्मर्यते। अयञ्च यास्कमतविरोधिरासीत्।

यास्कस्य प्राचीनता निर्विवादा। पाणिनितोऽपि पूर्वंकालीनोऽयम्। महाभारते यास्को निरुक्तकाररूपेण स्पष्टतया निर्दिष्टोऽस्ति। यथा :—

यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान्।
शिपिविष्ट इति ह्यासीद् गुह्यनामधरोऽस्म्यहम् ॥७२॥

स्तुत्वा मां शिपिविष्टेति यास्कः ऋषिरुदारधीः।
यत्प्रसादादधो नष्टं निरुक्तमभिजग्मिवान् ॥७३॥ [2]

अस्योल्लेखस्य परिणामस्वरूपं विक्रमात् सप्ताष्टशतवर्षाणि पूर्वं निरुक्तकारस्य समयो निर्धारयितुं शक्यते। केचन विद्वांसश्च बुद्धात् पूर्वं महाभारतनिर्माणं स्वीकुर्वन्ति। बुद्धस्य जन्म च ते ईशवीयशतकस्यारम्भात्, १९०० वर्षाणि पूर्वं मन्यन्ते [3]। अस्य मतस्यानुसारम् ३,८७४ वर्षाणि पूर्वं निरुक्तकारसमयोऽनुमानतः सम्भवितुं शक्यते। पूर्वोक्तमतानुसारञ्च २,८३१ वर्षाणि पूर्वं निरुक्तकालः। केचन संस्कृतकोशारम्भकालं २,६०० वर्षेभ्योऽपि पूर्वं स्वीकुर्वन्ति [4]। परं निघण्टुकालस्तु नेदानीं यावदपि—सुनोर्णीतः। यद्यपि निघण्टुः पूर्णकोशो नास्ति तथापि परवर्तिभिः कोशकारैः अपि—अस्यानुकरण विहितम्। अत एव निघण्टुर्हि संस्कृतकोशसाहित्यस्य समारम्भबिन्दुरिति निश्चप्रचम् [5]।

निरुक्तटोकाकारा :-

एतत्—मया पूर्वमेव प्रतिपादितं यत् निरुक्तं निघण्टु—भाष्यभूतम्। अष्टाध्यायी वैय्याकरणग्रन्थेषु लोकप्रियः। अस्याध्ययनेन स्पष्टं ज्ञायते यद्विक्रमादपि बहूनि वर्षाणि पूर्वं विदुषां ध्यानं निरुक्तस्य व्याख्याकरणं प्रति समाकृष्टमभूत्। इयमष्टा-

---

(1) वैदिक वाङ्मयका इतिहास (१-२) पृ० १६६-१८०।

(2) महाभारत। शान्तिपर्वः। अ० ३४२।

(3) संस्कृतसाहित्यकोशः। डा० राजवंश सहाय 'हीरा'। पृ० ३६५।

(4) डाक्टर हेमचन्द्र जोशीः सरस्वती, अक्टूबर, १९६० पृ० २३१।

(5) डा० बलदेव उपाध्यायः "संस्कृत में कोशविद्याका इतिहास, हिन्दुस्तानी अप्रैल-जून, १९६० पृ० ५७।

ध्यायी पतञ्जलिना व्याख्याता। महाभाष्ये अष्टाध्याय्याः ४-३-६६ वार्तिकस्य भाष्यं कुर्वता पतञ्जलिनाऽस्पष्टंलिखितं शब्दग्रन्थेषु चैषा प्रसृततरा गतिर्भवति। निरुक्तं व्याख्यायते"। इति अनेन पतञ्जलितोऽयं निसंशयं प्राचीनतमो निरुक्तकारः। पतञ्जलिकृतस्य महाभाष्यस्य रचनाकालोऽनुमानतः १५० वर्षाणि ईशवीयाब्दात् पूर्वं निर्धारितं विद्वद्भिः।

आचार्यदुर्ग :-

निरुक्तस्योपरि परिपूर्णा विस्तृता चटीका—आचार्य-दुर्गस्य वर्तते। परमियं नादिमा टीका एतत् सुनिश्चितम्। निरुक्तस्य दुर्गवृत्ति—अध्ययनेन स्पष्टं ज्ञायते यत् दुर्गादपि प्राचीनाः—निरुक्तटीककाराः—आसन्। निरुक्तवार्तिकस्यापि प्रसङ्गस्तत्रोपलभ्यते। अस्याष्टीकायाः समालोचनेन प्रतीयते यदयं वेदानां महीयान् पण्डितः- आसीत्। सहैव 'भवन्ति नम्रास्तरव फलोदगमे" इत्येषा सदुक्तिरप्यस्मिन् परिपूर्णतया चरितार्था भवति। प्रकाण्डपण्डितोऽपि सन्नयं परमनम्रः—आसीत्। निरुक्तस्य व्याख्याकरणकालेऽयं स्वकाठिन्यविस्मयः स्वीकृतवान्। यथा—ईदृशेषु शब्दार्थन्यायसकटेषु मन्त्रार्थघटने दुःखबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते। वयं त्वेतावदत्र विदमह इति।" ७-३१।

दुर्गाचार्येण दुरूहमपि निरुक्तभाष्यकरणकार्यं सम्पादितमिति सौभाग्यं नः। निरुक्तस्य दुर्गटीका चेदुपलब्धा नाभविष्यतु कठिनतामपि कार्यमिदं निरुक्तज्ञानं नाम कथमस्माकम् कृते सुकरमभविष्यत्? अनेन सहैवेद किल दुःखकारणम् यदस्य टीकाकर्तुरपि एतिहासिकज्ञानमस्माकम् पार्श्वे प्रमाणसहितम् नास्ति सुलभम्। ४-१४ निरुक्तेऽयं स्वात्मानं कापिष्ठलशाखाध्यायिनं वसिष्ठगोत्रीयम् लिलेख। अध्यायानाञ्चावसाने वृत्तिपुष्पिकेत्थं वर्तते :—"इति जम्बुमार्गाश्रमवासिन :—आचार्यभगवद् दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ...ऽध्यायः समाप्तः" एनं केचन पुष्पिकानुसारम् जम्बूमार्गाश्रमवासिनम् अर्थात् वर्तमान जम्बूप्रान्तान्तर्गत स्वीकुर्वन्ति, अपरे च गुर्जर प्रान्तीयम्। किमपि स्यादत्र विशिष्टप्रमाणोपलब्धिर्न भवति। दुर्गवृतेः प्राचीनतमा पाण्डुलिपिः १४४४ सम्वत्सरस्योपलभ्यते। अतो हिन्दूर्गोऽस्मात् कालात् प्राचीनतमस्त्वासीद नात्र कस्यापि विमतिः। श्रीभगवद्दतः ऋग्वेदस्य भाष्यकारः उद्गीथः—दुर्गाचार्येण परिचितः—आसीदिति सप्रमाण लिलेख [1]। अतो दुर्गस्य कालो विक्रमस्य सप्तमशतकात् प्राचीनः [2]।

---

(1) वैदिक वाङ्मयका इतिहास।

(2) संस्कृत शास्त्रों का इतिहास। डा० बलदेव उपाध्याय पृ. ३२७।

स्कन्दस्वामी—

निरुक्तस्यान्यटीकाकृत्सु स्कन्धमहेश्वरस्य टीका लवपुरतः प्रकाशिताभूत् । इयं टीकापि विद्वत्तापूर्णा प्रामाणिका च । अयंम् स्कन्ध स्वामी ऋग्वेदस्य भाष्यकारोऽपि सनिश्चयमेव दुर्गाचार्यादुत्तरकालीनः ।

बर्बर स्वामी:

अस्य निरुक्तभाष्यं दुर्गादपि प्राचीनं परं तत्र प्रामाणिकं तथ्यं गवेषणानन्तरमप्यधुना यावन्नलभ्यते कालादि विषये । तथाप्ययं दुर्गात् प्राचीनः । स्कन्घ स्वामी अस्योल्लेखम् स्वटीकायां दुर्गात् पूर्वं करोति (1) । 'निरुक्तस्य टीकाभिरेभिरस्माभिरनेकज्ञातव्यविषयाणां ज्ञाने साहाय्य प्राप्यते । निरुक्ते तस्य टीकासु च यत्संकेतितम्-तदाधारं संगृहय् मध्यकालीनाः-भाष्यकाराः- वेदभाष्यकरणे समर्था बभूवुः ।

इत्थं निघण्टुः निरुक्तञ्च संस्कृतकोशवाङ्मयस्यारम्भिककोशरूपेण लिखितावस्थायां प्राप्तौ भवतः ।

भास्करराय-वैदिककोश:—

भास्करराय: स्वसमयस्य प्रसिद्धस्तान्त्रिकः- आसीत् । अयं दक्षिणतः काशीमध्ययनार्थं समायातः । "ललितासहस्रनामभाष्यात् - ज्ञायते यदयंम् विश्वामित्रगोत्रीयो गम्भीररायस्य पुत्रः आसीत् । अस्य मातुर्नाम कोणाम्बा गुरोर्नाम, च नरसिंह :– आसीत् । अयं किल 'ललितासहस्रनाम - उपरि-प्रख्यातम् परमप्रौढञ्च भाष्यं लिलेख । अनेनास्य भाष्यस्य रचना १७६३ ईशव्याभ् कृता । नागेशभट्टस्य सप्तशती टीकायाः खण्डमनेन स्वगुप्तवती नामिकायां टीकायां विहितम् । वैदिक-कोशस्यास्य रचनाकालः १७७५ ईशवीयाब्दो वर्तते । अतः भास्कररायस्य समयः १८ शतकस्योत्तरार्धं मानयितुं शक्यते । अनेन वैदिककोशस्य रचनाकोशाधारे कृता । वैदिकशब्दास्त्वस्मिन् त एव सन्ति ये किल निघण्टौ वर्तन्ते । तेषां शब्दानामेवार्थाः अनुष्टुप् छन्दःसु कोशेऽस्मिन् प्रदत्ताः सन्ति । अमरकोशाधारे निर्मितोऽयं कोशः छात्राणां कृते सुविधाजनकः ।

लौकिककोशा:

कोशाः किल संस्कृत साहित्ये व्यावहारिक साहित्यस्य एकं महत्वपूर्णमङ्गमस्ति । एनामेवोपादेयतामाधारी कृत्य संस्कृते कोशाणां प्रणयनमभूत् (2) । परं यथा वैदिककोशाणां प्राचीनतमनिर्मातॄणां नामधामादिकम् वैदिककोशसंख्यादिकञ्च पूर्णतो नोपलभ्यते तदिव लौकिक संस्कृतकोशा अपि नोपलभ्यन्ते परिपूर्णतया । संस्कृतस्य कति कोशकारा एवं विधाः सन्ति येषां नामधामादिकं नोपलभ्यते न चैव कोशसाहित्यम् प्रश्नोऽयं विकटः । तथापि कश्चिन्निश्चयो निर्णयश्चास्माभिर्विधेय एव । नात्रापि च कश्चित्सन्देहो यत् प्राचीनकालीनाज्ञानगुहायां संस्कृतस्य वैदिकं लौकिकञ्च प्रभूतं कोशसाहित्यम् प्रणष्टम् ।

---

(1) तस्य पूर्वं टीकाकारैर्बर्बर स्वामि भगवद् दुर्ग प्रभृतिभिर्विस्तरेण व्याख्यातस्य ।

(2) डा० मधुकर मगेशकर: "A History of Sanskrit Lexicography." भूमिका ।

अस्तु नाम तदिदम्। प्राचीनपाण्डुलिपीनां, ग्रन्थानां ग्रन्थटीकानाञ्चाध्ययनेन येषां कोशकाराणां नामादिकमुपलभ्यते नूनमेव तत्सर्वं तेषामस्तित्वसाधनाय सुदृढ़प्रमाणभूतम्। एवं विधानुसन्धानानुरूपम् प्राचीनकोशकाराणां नामादिकस्य सूचित्रयमुपलब्धम्। पुरुषोत्तमदेवस्य हारावलिकोशान्ते पद्यमेक मिलति। अस्मिन् त्रयः प्राचीन—कोशकारा निर्दिष्टाः। तद्यथा :—

शब्दार्णव उत्पलिनी संसारावर्त इत्यपि।
कोषा वाचस्पति-व्याडि-विक्रमादित्यनिर्मिताः॥

एतस्य श्लोकस्यानुसारम् वाचस्पतिः—शब्दार्णवस्य, व्याडिरुत्पलिन्या विक्रमादित्यश्च संसारावर्तस्य कर्तारः सिद्ध्यन्ति। इयं प्राचीनकोशकाराणामिति संक्षिप्ता प्रथमा सूची।

एवमेव कल्पद्रुकोशनिर्माता केशवः स्वकीये कोशे (१-२) तद्युगीनविख्यात-कोशकाराणां नामनिर्देशं निम्नरूपेण अकरोत् :-

कात्य वाचस्पति-व्याडि-भागुर्यमरमङ्गलाः।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमाः॥

इयं किल द्वितीया नामसूची कात्य—वाचस्पति-व्याडि-भागुरि-अमर-मङ्गल-साहसांक-महेश हेमचन्द्रादीनां नवनामान्यत्र निर्दिशति। अस्यां प्रथमसूच्याः-वाचस्पति-व्याडिनामयोरुल्लेखोऽस्ति।

तृतीयसूच्यनुसारं संस्कृतस्याष्टादशकोशाः परमप्रसिद्धाः। एतेषां विषये ऽमरकोशस्यैकस्मिन् हस्तलेखे निम्नांकितं पद्यद्वयं मिलति (1)

विश्वो विश्वप्रकाशश्च धरणिर्मेदिनी तथा।
रत्नकोशो रन्तिदेवः शाश्वतश्च हलायुधः॥
व्याडिर्वररुचिश्चैव रुद्रकात्यानावुभौ।
रभसो वैजयन्ती च तथा शब्दार्णवाजयौ॥
वाचस्पतिर्हेमचन्द्रः कोशा अष्टादशैव तु।

एनां सूचीमालोक्य स्पष्टं प्रतीयते यत् विश्वः, विश्वप्रकाशश्चेति पृथक् कोशौ। अत्र पूर्वमियं धारणाऽऽसीत् यदेक एव कोशः—विश्वाऽथवा विश्वप्रकाशः। अर्थात् एकस्येव नामद्वयीयम् परं नैतत्। मुकुन्दकोशकारस्य विख्यातकोशशास्त्रपण्डितस्यापि इदमेव मतम्। यथाऽसौ स्पष्टयति एकस्मिन् स्थाने कोशनामावल्यां :-

विश्वप्रकाशः पदचन्द्रिका च।२। पञ्चमपद्ये च पृथक् रूपेण विश्वस्योल्लेख-स्तद्यथा —

---

(1) संस्कृत शास्त्रों का इतिहास। तृ. प.। डा. बलदेव-उपाध्याय। पृ. ३२८।

"विश्व-प्रतापो-त्पलिनी सकार-"(1) इत्यादिः। एवमेवात्रान्यदपि भ्रमोत्पादक-विचार एको विद्वत्सु प्रचालतः आसाद्यत् वररुचिः— कात्यायनश्च-एकस्यैव नामद्वयमस्ति परमिदमपि निर्णीतमेव भवति। यतोहि पूर्वोक्तामरपाण्डुलिपि-प्राप्तेषु श्लोकेषु वररुचिः, कात्यायनश्चेमौ द्वौ स्वतन्त्रौ नु कोशकारौ। एनमेव मतम् मुकुन्ददैवज्ञोऽपि समर्थयते। लिङ्गानुशासनप्रणेतुर्नामतो येषां कोशाणां नामधेयानि निर्मितानि तेषां सूचीमसौ निम्नप्रकारेण निर्माति :-

कात्यायनो वररुचिः केशवः पुरुषोत्तमः(2)। एव किल प्राचीनकोशाणां यत्सूची-त्रयम् प्राप्यते तदनुसार कोशाणां कोशकर्तॄणाञ्चाकारादिक्रमेण नामधेयानि-अधस्तात् सस्थाप्यन्ते।

१. अजयः	८. महेशः	१५. वाचस्पतिः	२२. साहसाङ्कः
२. अमरः	९. मेदिनी	१६. विक्रमादित्यः	२३. हलायुधः
३. कात्यः	१०. रत्नकोशः	१७. विश्वः	२४. हेमचन्द्रः
४. कात्यायनः	११. रन्तिदेव	१८. विश्व प्रकाशः	
५. धारणिः	१२. रभसः	१९. वैजयन्ती	
६. भागुरिः	१३. रुद्रः	२०. व्याडिः	
७. मङ्गलम्	१४. वररुचिः	२१. शाश्वतः	

अथ संस्कृतस्य विशेषतश्च लौकिकसंस्कृतकोशाणाभितिहासः सुस्पष्टतया संस्थाप्येत-एतदर्थं ननु-अमरकोशो मणिविन्दुरिव संस्कृतकोशेतिहासलेखनाय स्वीकार्यः। यतोहि कोशोऽयम् भारतीयजनसमाजे ऽतितरामादर प्रतिष्ठाञ्च रक्षति। अद्यापि ग्रामे, ग्रामे नगरे, नगरे च सस्कृताध्ययनारम्भकालेऽमरकोशलघुसिद्धान्त-कौमुदी-अध्ययनमेवारभ्यते। इयमेव परम्परा निखिलेऽपि भारते येन केनापि रूपेण प्रचलितास्ते। अत एवामरस्य महत्वं स्वीकुर्वद्भिरस्माभिरपि—अस्यैव कोशरत्नस्याधारं संगृह्य चतुर्षु कालेषु संस्कृतस्य लौकिककोश-इतिहासविभाजनम् विधीयते। १. अमर-पूर्वकालः २. अमरकालः, ३. अमर-पश्चात् कालः, ४. वर्तमानकाल-श्चेति।

अमरात्-पूर्वकालीनाः—कोशकाराः

ये ऽमरात्-पूर्वकालीनाः कोशकाराः सन्ति तेषां नामसंकेतं वयं-अमरस्य टीकाकाराणामुल्लेखैरेव प्राप्नुमः। केवलं कोशमेकमपहायापरकोशाणामुपलब्धिरपि न जायते। अमर-पूर्वकालीनकोशकाराणां सामान्येतिह्यमधस्तात्संस्थाप्यते।

---

(1) ज्योतिष्मती। सं० २०१५। सं० १ कार्तिकः। पृ. ८२। श्लोक ५।

(2) " " " " ८३ श्लोक ३८।

१. व्याडि:

व्याडिर्हि संस्कृतस्य प्रख्यातः कोशकारः। अस्य नामोल्लेखः प्रथमे सूचित्रिकेऽपि त्रिधैव सञ्जातः। अमरमिवैव व्याडि-कोशोऽपि समानार्थकशब्द प्रधान एवासीत्। एकस्मिन् परिच्छेदे च नानार्थशब्दसंग्रहोऽप्यासीत्। अभिधानचिन्तामणिटीकायां हेमचन्द्रेणापि ग्रन्थादेतस्मात् दीर्घान्युद्धरणानि प्रदत्तानि। तेषामुद्धरणानामध्ययनेन च प्रतीयते यन्न केवलमस्मिन् कोशे शब्दार्थविवास्तामपितु विशिष्टज्ञातव्यविषया अप्यत्र संकलिताः वभूबुः। व्याडिर्हि बौद्धस्तु नासीत्तथाप्यसौ बौद्धधर्मसम्बन्धिविशिष्टतथ्यानामनुवर्णनं विदधाति। अनेन प्रतीयते यदयं बौद्धधर्मेण सुपरिचितः-आसीत्। व्युत्पत्यर्थानुसन्धानप्रक्रियामप्ययं प्रचारितवान्। यथा—"अर्थान् निघण्टयत्यस्मात् निघण्टुः परिकीर्तितः"। गुह्यक शब्दस्य व्याख्यां कुर्वन्नय कोशकारो लिखति :—"निधिं रक्षन्ति ये यक्षा स्तेस्युर्गुह्यक सञ्ज्ञकाः [1]।" अस्य कोशकारस्य प्रसिद्धकोशनाम उत्पलिनीत्यासीत् [2] उत्पलिनीतः पदचन्द्रिकायां बहूनि मतान्युद्धृतानि। हेमचन्द्रानुसारं व्याडिकोशे चतुर्विंशतिबौद्धजातकानां नामान्युल्लिखितान्यासन् [3]।

अनेन प्रतीयते यदयं कोशकारः- बुद्धात्—शतकानन्तरमेवाभूत्—यदा बुद्धधर्मस्य सम्यक् प्रचारः प्रसारश्चाभूत्। मीमांसकमहोदयो व्याडिकालं विक्रमसमीपं स्वीकुरुते [4]। इत्थमयं कोशकारो व्याडिरेव प्रख्यातवैय्याकरणोऽपि भवितुं शक्नोति। चेदयम् कोशकारो व्याडिः—व्याकरण—शास्त्रपण्डिताद् व्याडेः पृथगपि स्यात्तथापि बुद्धादुत्तरकालीनस्तु निःसंशयमस्त्येव नात्र संशयः।

दाक्षायणो व्याडिः

व्याकरणशास्त्रेतिहासप्रसङ्गे पाणिनिः कात्यायनयोर्मध्ये योऽस्ति कालखण्डस्तस्य प्रकाशनम् व्याकरणेन केन कृतमिति कथनमतीव कठिनम्। तथापि व्याडिनाम तु-अत्रायाति—एव। अनेन लक्ष-ग्रन्थात्मको ग्रन्थः कश्चिन्निर्मित आसीत्। अस्य नाम "संग्रहः" आसीत्। अयम् संग्रहात्मको ग्रन्थः संग्रह् नामकः। शताब्दान्यावत् स्वप्रभावं विकीर्य ईशवीयाब्दारम्भात् शतकद्वयपूर्वमेवास्तंगतविग्रहोऽभूत्। तथाप्यस्य किञ्चित्ज्ञानमेवान्तरकालीनै वैय्याकरणैः स्वेषु स्वेषु ग्रन्थेषु टीकाकारैश्च स्वटीकासु सुरक्षितमिति हर्षास्पदं नः।

---

(1) पदचन्द्रिका पृ. २२।

(2) शब्दार्णव उत्पलिनी संसारावर्त इत्यपि, कोषा वाचस्पति-व्याडि-विक्रमादित्य-निर्मिताः।

(3) अभिधानचिन्तामणि, देवकाण्ड, श्लो. १४७ टीका पृ. १००-१०१।

(4) संस्कृत व्याकरण का इतिहास, पृ. २०८। युधिष्ठिर मीमासकः।

अस्य संग्रहनाम्नो ग्रन्थस्य विषये वयं सर्वप्रथमं महाभाष्यात् किञ्चिद् जानीमः। यथा—"संग्रहे तावदत्र प्राधान्येन परीक्षितम् नित्यो वा स्यात् कार्यो वा स्यादिति। संग्रहे तावत् कार्ये प्रतिद्वन्द्विभावात् मन्यामहे नित्यपर्यायवाचिनो ग्रहणम् (1)।" तदनन्तरमेतद् ग्रन्थविषये भर्तृहरिणापि विशेषतोऽत्र प्रकाशो विनिपातितः। वाक्यपदीयस्य स्वोपज्ञटीकायां स कानिचिदुद्धरणानि संग्रहग्रन्थतः सस्थापयति। उद्धरणानां समीक्षया प्रतीयते यत् संग्रहेण शब्दार्थयोर्विषये विचारितम्। "संग्रहे तावत् प्राधान्येन परीक्षितम्" अस्य व्याख्यां कुर्वाणो भर्तृहरिः कथयति यत् संग्रहे चतुर्दश सहस्र वस्तूनां परीक्षणम् कृतमभूत्। तथा—"चतुर्दशसहस्राणि वस्तूनि-अस्मिन् ग्रन्थे (परीक्षितानि) (2)"। अस्य ग्रन्थस्य कियत्परिमाणमासीदत्राह पुण्यराजः "इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं लक्षग्रन्थ-परिमाणं संग्रहाभिधानं निबन्धमासीत् (3)" अस्यैव मतस्य परिपोषणं "नवाह्निकभाष्यस्य प्रदीपोद्योते" नागेशः करोति यथा—संग्रहो व्याडिकृतो लक्षश्लोकसंख्यो ग्रन्थ इति प्रसिद्धिः" (4)। अस्य महतो ग्रन्थस्य लोपकारणं भर्तृहरिः श्लोकाभ्यामाभ्यां प्रतिपादयति :—

"प्रायेण संक्षेपरुचीनल्पविद्या परिग्रहान्।
सम्प्राप्य वैय्याकरणान् संग्रहेऽस्तमुपागते।

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने (5)।।"

सम्भाव्यते यत् यदाऽयं संग्रहग्रन्थ :- लक्षग्रन्थमय आसीत् निःसंशयं उत्पलिनी कोशोऽप्यस्यैव विशालसंग्रहस्य एकांशो भवेत्। शब्दार्थौ च कोशस्यापि विषयभूतौ न केवलं व्याकरणस्यैव।

किमपि स्यात्तथापि महाभाष्यरचनातोऽर्थात् ईशवीयाब्दस्यारम्भात् शतकद्वय-पूर्वमेवास्य महतो ग्रन्थस्य लोपोऽभवदिति पूर्वमपि प्रतिपादितम् (6)। अनेन व्याडिकालविषयकमस्माकं मतमेव पुष्टं भवति।

---

(1) पस्पशाह्निकम्।
(2) महाभाष्यम्।
(3) वाक्यपदीय टीका।
(4) प्रदीपोद्योतः, पस्पशाह्निकम्।
(5) वाक्यपदीयम्। भर्तृहरिः। द्वितीयः काण्डः श्लोकौ ४८४-४८५।
(6) संस्कृत शास्त्रों का इतिहासः। चतुर्थपरिच्छेदः। पृ. ४३५।

व्यडपुत्रो व्याडिः

एकस्यान्यस्य मतस्यानुसारं व्याडिर्हि व्यडस्य पुत्रः। यतोहि तद्धितान्तोऽयं शब्दः। व्याडिकालो हि भारतयुद्धात् २००-३०० वर्षाणां मध्ये क्वचिद् विद्यते। व्याडेः कोशस्योद्धरणानि विभिन्नकोशटीकासु प्राप्यन्ते। परमयं कोशोऽर्वाचीन व्याडेः वर्तते (1)।

अयं मतोऽप्यस्माकं व्याडिकाल-विषयकं मतं पोषयति। पुरुषोत्तमदेवादिभिरस्य "विन्ध्यस्थः" इति विशेषणमपि प्रदत्ताम्। अनेन प्रतीयते यदयं कदाचित् विन्ध्येऽपि निवासमकरोत् (2)।

---

२. कात्यः

वररुचेर्भिन्नोऽयं कोशकारः। क्षीरस्वामिहेमचन्द्रादिकोशकारैः कोशप्रसङ्गे कात्यस्यैवोल्लेखो विहितः। 'अमरकोश' वदेव कात्यस्यापि पूर्णः कोशग्रन्थः-आसीत्। क्वचित् क्वचिदस्मिन्—अर्थस्य वर्णनात्मक परिचयोऽपि निर्दिष्टः- आसीत्। यथा तितउ शब्दः। तितउ चालनं भवति येन सक्त्वादिकं चाल्यते संशोध्यते च। अमरेऽर्थं परकनिर्देश एवोपलभ्यते यथा—

चालनी तितउ पुमान्(3)। परन्तु कात्यस्तु वर्णनपूर्वकमर्थोपन्यासं कुरुते। यथा-क्षुद्रछिद्र-समोपेतम् चालनं तितउ पुमान्। कात्यस्य कोशनामासीत् नाममाला। इत्थमियं 'नाममाला' समानार्थकाऽनेकार्थका चासीत्। पुरुषोत्तमदेवस्य "त्रिकाण्ड-शेष" कोशेऽस्यैव नाम कात्यायनोऽपि दर्शितः (4)। एकस्मिन्-अन्यपुस्तकेऽप्यस्यैव मतस्य पोषणं मिलति 5.। कात्यस्य कात्यायनस्य वा देशविशेषविषये सप्रमाणं न क्वापि किमपि ससाधितं मिलति। तस्य देशादिनिर्णयार्थं केवलं महाभाष्यस्यैषा एवोक्तिः प्रमाणभूता स्वीकर्तुं शक्यते यत् "तद्धितप्रियाः हि दाक्षिणात्याः" अस्यानुसारं कात्यायनो दाक्षिणात्यः आसीदिति वक्तुं शक्यते। अस्य कालोऽनुमानतः ई० पू० पञ्चमशतके इतिहासविदामनुसारं विद्यते (6)।

---

(1) आयुर्वेद का इतिहास। अ. १६-पृ. २७६। क. रा. सूरमचन्द्रः।
(2) ,, ,, ,, ,,
(3) अमरकोशः २-९-२६।
(4) संस्कृत साहित्य का इतिहासः पृ. ६३५। गैरोला।
(5) A History of Indian Literature, Vol. III, Part II Page 455 M. Winternitz.
(6) संस्कृत शास्त्रों का इतिहास। पृ. ४४८। डा. बलदेव उपाध्याय।

३. भागुरिः

भागुरि विनिर्मितः कोशः "त्रिकाण्डः" आसीत् । अयं त्रिकाण्डयुक्तादमरात्पृथक्—कोशोऽवर्तत । भागुरिणा शब्दानां लिङ्गनिर्देशनं नैव विहितम् । स केवलं समानार्थकशब्दानेव संकलयामास । भागुरिमतनिर्देशस्तथा तद्ग्रन्थोद्धरणानि—अनेक-ग्रन्थेषूपलभ्यन्ते । वर्षाभूशब्दस्य स्वरूपविषये विद्वत्सु मतवैभिन्यमुपस्थितम् । सायणः स्व-' माधवोया धातुवृत्ति"—पुस्तके लिखति यद् भागुरिः 'वर्षाभू' शब्दं ह्रस्वोकारान्तमेव स्वीकरोति । अस्मिन् प्रसङ्गे तेन भागुरि—कृतप्राचीनमेकं पद्यं समुद्धृतम् यथा—"तथा भागुरि रपि ह्रस्वातं मन्यते (1)। यथः—

भार्या भेकस्य वर्षाभ्वी, शृंगी स्याद्—मद्गुरस्य तु ।

शिली गण्डपदस्यापि कच्छपस्य डुलिः स्मृता । अयं श्लोको भागुरिकोशेणैव सम्बद्धोऽस्ति । अमरस्य टीकायामपि भागुरिकृतकोशस्योद्धरणानि प्राप्यन्ते । हैम—'अभिधानचिन्तामणि'—स्वोपज्ञटीकायां भागुरि-कोशग्रन्थस्य—उद्धरणानि मिलन्ति सायणाचार्यस्य धातुवृत्तौ भागुरिकोशस्य श्लोकः समुद्धृतोऽस्ति । अयमेवश्लोकः—अमरटीकासर्वस्वेऽपि प्रदत्तोऽस्ति । पुरुषोत्तम देवस्यभाषावृत्याः सृष्टिधरस्य भाषावृत्तिटीकायाः—एवमेव च प्रभावृत्याः प्रतीयते यद् भागुरिकोशस्य नाम त्रिकाण्ड एवासीत् । एतेषां प्रमाणानामतिरिक्तं (2) । अमरस्य सर्वानन्दटीकासर्वस्वेऽपि भागुरिकृत—'त्रिकाण्डस्यानेकानि' वचनानि समुद्धृतानि । व्याकरणशास्त्रप्रसङ्ग पाणिनितः पूर्वकालीनो भागुरिः । गृहपतिशौनकेन वृहद्देवतायां'-आचार्य भागुरि मतस्यानेकेषु स्थलेषु समुल्लेखो विहितः । अनेन प्रतीयते यत्—त्रिकाण्डातिरिक्त कश्चिदनुक्रमणिका विषयकः दैवत ग्रन्थोऽप्यनेनालेखि (3)। अनुष्टुप् छन्दसि निवद्धोऽय त्रिकाण्ड कोशः ।

सायणस्य "माधवीयां धातुवृत्तिम्" आधारी कृत्य भागुरि कालविषये किञ्चिद् विचार्यते । सायणस्य समयः १४ तमे ईशवीयाब्दे तत्रापि च तस्य मध्यभाग मन्यते । परिणामस्वरूपं भागुरिः—अस्मात् प्राचीनः । नानार्थार्णव" संक्षेपे केशवस्वामिना १२०० ईशव्यां भागुरिमतनिर्देशो विहितः । येनास्य कालः १३ तमशतकात्—

(1) संस्कृत शास्त्रों का इतिहास । डा० बलदेव उपाध्याय पृ० ३३०-३२ ।

(2) संस्कृत साहित्यका इतिहास । गैरोला । पृ० ७७७

(3) बृहद्देवता ३-१०; ५-४०, ६-९६-१०७ ।

अर्वाचीन: कथमपि न भवितुं शक्नोति । केचन भागुरि कालं ३१०० वर्षाणि वि. पू. कथयन्ति (1)।

४. रत्नकोश:

अस्य कोशस्य रचयितुर्नामधामादिकं न किमपि ज्ञायते । सर्वानन्दस्यानुसारं—अस्य परिच्छेदानां वर्गीकरणं लिङ्गाधारे आसीत् 2. । अस्मिन् समानार्थक-शब्दानां चयनमासीत् 3. ।

सर्वानन्दो हि—अमरकोशस्य प्रख्यातष्टीकाकार: । अस्य काल: ११५९ ईशवीयाब्द: । अनेनास्य कालोऽपि ११५९ ईशवीयाब्दात्—आर्वाचीनस्तु न कथमपि भवितुं शक्नोति प्राचीनस्तु नूनमेवायमासीदेव । अस्य कर्तुर्नामधामादिकं यद्यपि विशिष्टसंस्कृतसाहित्येतिहासेषु तु न लभ्तते परं प्रख्यात: कोशकलाविद् श्री मुकुन्द: स्वविरचितायां कोशनामावल्यामस्य द्वौ कर्तारावविति स्पष्टयति । यथा :—"भास्करोऽथ पृथ्वीधर—नृसिंहमुनी रत्नकोशकारौ । अत्र भास्कर शब्दोऽस्ति पूर्वश्लोकेन सम्बद्ध:। अतोऽस्य कोशस्य कर्तारौ मुकुन्दपण्डितानुसारं पृथ्वीधर-नृसिंहमुनी सञ्ज्ञकाविति ।

५. अमरदत्त:

प्राचीनकोशेषु मालातोऽमरमालातश्च बहून्युद्धरणानि प्राप्यन्ते । परमेकैवायं कोश:- भवितुं शक्नोति । सर्वानन्दोऽपि स्वकीयामरटीकायां ३० तोऽप्यधिकोद्धरण-दानमकरोदमरमालात: । सम्भवतोऽस्य कोशस्य निर्माता अमरदत्त:—आसीत् यो हि अमरसिंहात् प्राचानकालीन: । अस्यैव कोशस्य च नाम अमरदत्तकोशोऽपि वर्तते । परं माला नाम्नैवायं प्रसिद्ध: । अस्यैव कोशस्य नाम—नाममालापि विद्यते । हलायुधश्च कोशमेनं स्वकोशस्याधारमेव स्वीचकार । अतएवेनं सोपजीव्यग्रन्थमेव मनुते । नाममालाया अमरदत्तकोशस्य वा स अशुद्धिवर्णनमपि स्वकोशे कृतवान् ।

६. वाचस्पति:

अनेन विदुषा "शब्दार्णव" नामक कोशो विनिर्मित: । अयं हि समानार्थक-शब्दानामेको विशालकोश:—आसीत् । अनुष्टुप्-छन्दसि-अस्य निर्माणमासीत्

---

(1) (2) (क) वैदिक वाङ्मयका इतिहास । भगवद्दत्त: । व्या. शा. इतिहास: । मीमांसक: । "व्योकारोऽयस्करो" ऽयस्कारो लोहकार: स्यात् (रत्नकोश: भानुदीक्षित-टीकात:) ।

(ख) चक्षुष्या कुम्भकारी च कुलल्यौ तु कुलत्थिका-अमर भा. दी० टीका पृ. ५६५ काण्ड २ ।

(3) अटा पर्यटनं भ्रम: । (रत्नकोश:) भानुदीक्षित टीकात: ।

जातम् । अस्य वैशिष्ट्यमिदमासीद्यत्- अयं कोशः एकस्य शब्दस्य विभिन्नरूपाणां वर्तिन्याश्चोल्लेखं करोति । हेमचन्द्रश्च स्वकोशे शब्दप्रपञ्चमस्यैव साहाय्येनाकरोत् । यथा —

"प्रपञ्चस्तु वाचस्पति-प्रभृतेरिह लक्ष्यताम्" । शब्दार्णवे एकनाम्नोऽनेक रूपाणां प्रदानस्य वैशिष्ट्यमासीद्यथा पूर्वमेवोक्तं मया । यथामरकोशस्य भानु-दीक्षित टीकायाम्—"गवलं माहिषं शृगं-अभ्रकं गिरिजामले" अस्य श्लोकस्य व्याख्या प्रसंगे:- "गिरिज, गिरिजा बीजममलं गवलध्वजम्"-(वाचस्पतिः)[1] । रायमुकुटेनापि-अमरकोशस्य पदचन्द्रिका — व्याख्यायां - समुद्धरणानि प्रदत्तानि वाचस्पतेः । यथा "विरिञ्च" शब्दकृते विरिञ्चः, द्रुहिणः, द्रुघणः, नारायणः, नरायणः, एवमेव च श्री वत्सलाञ्छनकृते श्रीवत्सः । "शंकरस्य धनुषः कृतेऽजगव शब्दः प्रसिद्धः बोपालितः- नाममालादयश्चाकाराधारेऽपि आजगवशब्दोऽपि-शुद्धइति-स्वीकरोति । परं शब्दार्णवस्यात्र पृथगेव निर्णयः । असौ हि - आजकव, आजकाव-मपि च-अजगवस्यैव विशिष्टं रूपं मनुते [2] । चन्द्रमा शब्दस्य कृते प्रायेण चन्द्र शब्दः प्रयोगः सर्वविदितः परमत्रैव शब्दार्णवमतानुमारं तु चन्दशब्दोऽपि शुद्ध एव । यथा:-"हिमांशुश्चन्द्रमा चन्द्रः शशी चन्दो हिमद्युतिः" [3] । एवमेव पदचन्द्रिकायामेव चन्द्रिका शब्दस्य कृते चन्द्रिमा शब्दोऽपि शुद्धः [4] । अगस्त्यस्तथागस्तिशब्दौ कोऽशेस्मिन् समानार्थौ । स्यागस्तिशब्दस्य प्रयोगमपि चकार यथा - "अगस्तिनाध्यासि-तविन्ध्यशृगम्" [5] । एवमेव मार्तण्डः - मार्तण्डश्चेमावुभावपि शब्दावस्मिन् स्वीकृतौ स्ताः एवमेव नारायणस्य कृते नरायण शब्दोऽप्यत्र द्रष्टुं शक्यते यथा-"अथ नारायणो विष्णु रूर्ध्वं कर्मा नरायणः ।" शब्दार्णवः ।

७ धन्वन्तरिः

आयुर्वेदमपि वेदा इव प्राचीनम् । आयुर्वेदस्य च कोशेषु धन्वन्तरिनिघण्टुः सर्व प्राचीनः समुपलब्धनिघण्टुषु । तद्वदिव यथा वैदिक निघण्टुरिति । अमरकोशस्य सुप्रसिद्धव्याख्याकारः श्री क्षीरस्वामी स्पष्टयति यत् धन्वन्तरि—निघण्टुसकाशादे वामरसिंहेन स्वकोशस्य वनौषधिवर्ग निर्माणार्थं सामग्री गृहीता । क्षीरस्वामिनोऽनु-सारमेव बाजपत्रम् खदिरस्य पर्यायः एवम् धन्वन्तरिणा प्रतिपादितम् । परन्तु अमरसिंह

(1) अमरकोश द्वितीय काण्डम् । वैश्यवर्गः । पृ–२६४

(2) संस्कृत शास्त्रों का इतिहास । डा० बलदेव उपाध्याय । पृ. ३३२ ।

(3) पदचन्द्रिका प्रथम भागः पृ० १०७ ।

(4) पद चन्द्रिका प्रथम भागः पृ. १०९ ।

(5) संस्कृत शास्त्रों का इतिहास । डा० बलदेवः -३३०

अस्य बालपत्रस्य स्थाने वाल-पुत्रमिति मत्वा बालतनयशब्दं खदिरस्य पर्यायं दर्शितवान्। इदञ्चाशुद्धमित्याह क्षीरस्वामी। यथा—"बालपत्रोय वासः खदिरश्चेति द्वचर्थेषु धन्वन्तरिपाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद् बालतनयमाह—बालतनयो खदिरो दन्तधावनः (1)।

धन्वन्तरि—अयस्य चर्चा विभिन्न संस्कृतसाहित्यइतिहासेषूपलभ्यते। प्रथमो धन्वन्तरिः, द्वितीयो धन्वन्तरिः, तृतीयो धन्वन्तरिश्च। अनेन प्रकारेणोल्लेखोऽस्मिन्-विषये मिलति। किमपि स्यादुत्तरकालीन एवायं धन्वन्तरिः। कुत्र चिदस्य काल-विषये पूर्णतोऽज्ञता प्रकाशिता (2)।

तथापि धन्वन्तरिनिघण्टुरासीदेव परं तात्र सनिश्चयं किमपि कथयितुं शक्यते यदयमुत्तरकालीनस्य पूर्वकालीनस्य विक्रमकालिकस्य वा धन्वन्तरेः वर्तते—इति केषांचिन्मतम् (3)। धन्वन्तरिनिघण्टु प्रकाशनमपीदानीं सञ्जातम्। अस्य हस्तलिखितप्रतयो निम्न-पुस्तकालयेषु सन्ति। वांकानेर—(राजस्थाने) शास्त्र भाण्डारे सं. १३९२। इण्डिया-आफिसे सं. २७३६ स. २७३७। आक्स फोर्ड सूचिपत्रे ४५१। मद्रास पुस्तकागारे सं. १३२८३. १३२९४। वड़ौदा पुस्तकालये सं. ३५५४।

महाक्षपणक :-

अनेन रचितो निघण्टु कोशो वा नामद्वयेन हस्तलेखेषु निर्दिष्टे मिलति। अनेकार्थमञ्जरी अनेकार्थध्वानमञ्जरी वा। एकस्यैव ग्रन्थस्येदं नामद्वयम्। अस्य महाक्षपणकस्यापि समयनिर्णय इदानीं यावन्न बभूव। विदुषां मतेन क्षपणको महा-क्षपणकश्चेति-उभेऽपि—एकस्येव नामनि। ग्रन्थरचनाया कालस्यानुमानन्तु कर्तुं शक्यते। कश्मीरदेशीयः- टीकाकारो बल्लभदेवः—रघुवंशस्य टीकां लिलेख। अस्य ग्रन्थस्य प्राचीना पाण्डुलिपिरेषा। अस्यामनेनानेकार्थमञ्जरीतोऽवतरणमेकं समुद्धृतम्। महाक्षपणकोऽपि कश्मीरदेशीय एवासीत्। परिणामस्वरूप कश्मीरोद्भवेन श्री बल्लभदेवेन प्रख्यातकोशकारस्य ग्रन्थस्य निर्देशश्चेत्कृतस्त्विद सुसंगतमेव। वल्ल-भदेवस्य पौत्रः कैय्यटः (चन्द्रादित्यस्य पुत्रः) आनन्दवर्धनस्य देवी शतकस्य व्याख्यां ६७७—६७८ ईशव्यां कश्मीर नरेशस्य भीमगुप्तस्य (९७७—९८२ ई.) राज्यकाले लिलेख। एतस्य प्रमाणस्यानुसारं बल्लभदेवस्य कालः ८२५ ईशवीयाब्दस्य समीपवर्ती। इयं तु पश्चिमावधिर्वर्तते महाक्षपणकस्य। इदानीं यावत्तस्य कोशः सम्यक् प्रकारेण सर्वत्र विद्वत्सु प्रसृतो भवेत्। अस्य जन्मादिकालस्तु ३५० ईशव्याः

(1) अमरः २-४-४९।

(2) संस्कृत साहित्यका इतिहास। पृ. ७३१। गैरोला।

(3) आयुर्वेद का इतिहास पृ. १६९. कविराज सुरमचन्द्रः।

समीपे मानयितुं शक्यते। चन्द्रगुप्त विक्रमस्य राज्यकाल: ४०१ ईशवीमाब्दः । अयं महाक्षपणकश्चास्य राज्यकाले नवरत्नेष्वन्यतमः—आसीत्। "धन्वन्तरि क्षपणकामरसिंह शकुः" इत्यादि—प्रमाणैरपि सिद्ध्यति (1) ।

यैः किल संस्कृतगवेषकैः कोशविद्येतिहासान्वेषणकर्मणि परिश्रमो विहितस्तेषामनुसारं उल्लिखिताः कोशकाराः अमरात् सनिश्चयमेव पूर्वकालीनाः । एतेषां प्रामाणिकेतिहासान्वेषणेऽतिशयपरिश्रमानन्तरमपि न किमपि विशेषतो विज्ञायते । उल्लिखिताष्ट कोशकाराणामतिरिक्तं आपिशलिः, शाकटायनः, विक्रमादित्यश्चापि कोशकाराः अमरात् पूर्वकालीना आसन् । पतञ्जलेविभिन्ननामानि महाभाष्ये मिलन्ति। यथा–शेषः, वासुकिः भोगीन्द्रः फणिपतिः, अहिपतिः, इत्यादयः । अहिपत्यादयश्च क्वचित् कोशकारेषु मिलन्ति । अतः स्पष्टमस्ति यत् पतञ्जलिरपि कोशकारः आसीत्।

येषाञ्च कोशकाराणां नामादिकमुपरि लिखित तेषां स्थानसमयादिकस्य सुनिश्चितिर्नापिस्यात्तथापि—उत्तरकालीन कोशविद्याविदां कृते तेषां साहाय्य सदैव संस्मरणीयमस्ति। तच्च नो दुर्भाग्य यत्तेषां कृतयोऽद्य सुदुर्लभाः सन्ति सञ्जाता ।

प्रसङ्गतोऽत्र वेबरपाण्डुलिपिविषयेऽपि किञ्चिल्लेख्यमेव । संस्कृतस्य-विदेशीयलेखकैः श्री विण्टरनित्स कीट्स (2) आदिभिर्वेवरहस्तलेखस्य चर्चा विहिता । तदनुसार मस्मिन्—पाण्डुलिपि संग्रहे एकस्य कोशस्याष्टसंख्यकानि पत्राणि लब्धानि। कोशोऽयमपि प्राचीनतमो भवितु मर्हति । अस्य प्राप्ति र्लद्दाखस्य लेह नगरे जाता। एफ. वेबरश्चास्य पाण्डुलिपिसंग्रहस्य क्रयमकरोत् (3)। परमस्य लेखकादिविषये न किमपि ज्ञायते ।

अत्रैवागस्त्यनिघण्टोश्चर्चाप्यसंगता न भवेत् । अस्यागस्त्यनिघण्टोर्नव पत्राणि समुपलभ्यन्ते । ताड़पत्रकेषु लिखितोऽयं कोशः । पत्राणामाकारः- द्व्यङ्गलेषु

---

(1) Studies in Indian Literary History. Vol I.
PP. for-109-111 (Bombay 1953)

(2) संस्कृत साहित्यका इतिहास, पृ, ५१९ हिन्दी संस्करण, मंगलदेव शास्त्री मू. ले. कीट्स ।

(3) They are so-called because this bundle of manuscript fragments was purchased by the Missionary F. Weber in Lah in Ladakh.
Hoernle JASB 62, 1893. JXII. 1. 26 ff.

(in inches) 16¼×1¼ वर्तते। अस्य कोशस्य लिपिश्च तेलुगुरस्ति। कोशस्यास्यारम्भो निम्नश्लोकेन भवति :—

सारस्वत प्रपञ्चस्य निदानं यस्य वाणकम्।
तस्य शिम्भोः प्रसादेन क्रियते नाम सङ्ग्रहः॥

पुष्पिका चास्याधस्ताद् दीयते :—

"इत्यगस्त्य व्याकरणोक्त शब्दसङ्ग्रह निघण्टुः समाप्तः"। प्रारम्भिकश्लोकस्यास्य समीक्षया प्रतीयते यदयं कोशकारः शैवोऽभूत्। पुष्पिकाया अध्ययनेन च स्पष्टम् प्रतीयते यदेष निघण्टु नं—अगस्त्य प्रोक्तः परमगस्त्यव्याकरणाधारे निर्मितः।

अमरकोशः

धर्मार्थकाममोक्षरूपस्य वर्गचतुष्टयस्य पुरुषार्थ-चतुष्टयस्य वा प्राप्तिर्हि सर्वाभीप्सिता। सा च विभिन्नशास्त्रविद्यादिज्ञानाधीना। तद्—ज्ञानञ्च तदन्तर्गतवाक्यार्थज्ञानाश्रितम्। तत्तत्पदार्थज्ञानञ्च तत्तत्पदशक्तिग्रहाधीनम्। तत्तत्पदशक्तिग्रहे च

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः॥

अत्र शिष्टोक्तिप्रदर्शितेष शक्तिग्रहोपायेषु कोशस्यैव मुख्यता। अमरात् प्राकालीनाः संस्कृतकोशाः केवलमेकां प्रणालिमेवाश्रित्य बिरचिता आसन्। कतिपयकोशा नाममात्रतन्त्रभूता (Synonymous) अपरे च लिङ्गमात्रतन्त्रभूताः (Homonymous) आसन्। एषामेव पूर्वकोशाणामाधारं गृहीत्वाऽमरसिंहः "नामलिङ्गानुशासनम्" नाम संस्कृतकोशं विरचयामास। अस्यैव नाम अमरकोशोऽस्ति। अमरकोशः परमो लोकप्रियः। अतोऽयममरकोशः- अमरभाषासाहित्यस्यामरः कोष इचेदिदं कथ्येत नु प्रियं सुसंगतञ्च स्यात्। प्राचीनस्य शैलीद्वयस्य प्रयोगं कुर्वता महदुपकृतम् समाजस्य। पुं-नपुंसकस्त्री—अस्त्री-आदिशब्दानां प्रयोगश्चापि संस्कृतनामलिंगप्रदर्शनार्थं सौन्दर्य-पूर्वकमभूत्। त्रिकाण्डेषु विभक्तोऽयं "त्रिकाण्ड"—नाम्नापि कथ्यते। प्रतिकाण्डमनेके वर्गाः सन्ति। प्रथमे काण्डे नववर्गाः सन्ति। स्वर-व्योम-दिक्-कालधी - शब्दादि - नाट्य-पाताल - नरकाः। सक्षेपेणात्र प्रथमकाण्डे स्वर्ग - देव - वायु - मण्डल – तारागण – समय - शब्द-भाषा संगीत-नृत्य–अधोलोक - सर्प - सिन्धु - जल - द्वीप - पोत - नदी - जलजन्तु - जलक्षुपादीनां पर्यायाः सन्ति। एवमेव द्वितीय काण्डे पृथ्वी - पुर – शल - वनौषधि - सिंहादि - नृ-ब्राह्मण - क्षत्रिय - विट् - शूद्राः दशवर्गाः सन्ति। अर्थादस्मिन् द्वितीय - काण्डे भूमि-नगरपर्वत-वन-वृक्ष-क्षुप पशु-मानव-स्त्री–सम्बन्ध व्याधि-शरीर भाग-विभिन्न परिधान-

भूषण-वर्णचतुष्टय-तत्कर्मादीनां पर्याया: प्राप्यन्ते। एवञ्च तृतीयकाण्डे विशेष्यनिघ्न सकीर्ण-नानार्थ-अव्यय-लिङ्गादिसङ्ग्रहाश्चैते पञ्चवर्गा: सन्ति। अर्थादत्र विशेषण-समस्तशब्दा:, अव्यया:, सञ्ज्ञानांम लिङ्गा:—एतत्सर्वं विद्यते। अस्मिन् कोशे १५३३ अनुष्टुप्श्लोका:- विद्यन्ते। ६२५ श्लोकेषु नानार्थं - वर्णनं विद्यते। अवशिष्टभागे च समानार्था: शब्दा: सन्ति।

अमरसिंह:

क्षीरस्वामी - सर्वानन्दश्चेमावुभावपि - अमरकोशटीका-कारौ-अमरसिंहो बौद्ध आसीदिति प्रमाणयत:। इदमपि लोक-प्रसिद्धं यदयं विक्रमादित्यस्य नवरत्नेष्वन्यतमो बभूव। परम् विक्रमस्यापि कालस्तु सुनिश्चितो नैव। एतावत्तु सुनिश्चितमेव तथापि यदमरकोशस्यानुवादश्चीनीयभाषायां षष्ठशतके ईशवीये ऽभूत्। अतोऽयं ग्रन्थोऽस्मात् कालात् बहुप्राचीनो भवितुं शक्नोति। अस्मात् कोशात् च प्राचीनतम उद्धरणन्यासो जिनेन्द्र बुद्धे—"न्यासे" मिलति। यथा "तन्त्रप्रधाने सिद्धान्ते" (1) समुद्धृतोऽस्ति न्यासस्य रचनाष्टमशतके सञ्जाता। कोशवाङ्मयेऽमरसिंहस्य रचनेयं परमसुन्दरा समुपयोगिनी च यदस्या भारते वर्षे बहिश्चापि विदेशेषु या लोकप्रियता प्रतिष्ठा च विद्यते सा नाश्चर्यंकरी। अस्य टीकाबाहुल्यं, यस्य विषयेऽग्रे विवेचयिष्यामस्तथा च भारतीयविविधभाषाकोशसाहित्येऽस्य प्रभाव: सर्वमप्यदमस्य महत्वं प्रकटयति।

अस्य टीकाकृद्भिरमरस्य प्रत्येकस्यापि शब्दस्य परिपुष्टा व्युत्पत्ति: प्रदर्शिता सहैव विभिन्नकोशप्रमाणैश्चापि - अमरस्यार्थाणां प्रामाणिकत्वं संसाधितम्।

अमर सिंहो बौद्ध आसीदिति न केवलमनुश्रुत्याधारितमेवापितु अमरकोशस्य मङ्गलाचरणश्लोकेषु टीका-काराणामनुसारम्-सुस्पष्टा स्तुतिरिति। क्षीरस्वामिना मांगलिक श्लोकस्य (2) सर्वसुन्दरा व्याख्या विहिता। अक्षय - शब्देन च स "अक्षोभ्य;" बुद्ध एवायमिति संकेतितम् संसाधितञ्च। स हि द्वितीयश्लोकस्य व्याख्यारम्भे स्पष्टतो विलिखति:—"इत्थं ग्रन्थारम्भे ऽभीप्सितसिद्धिहेतुं जिनमनुस्मृत्य श्रोतृ - प्रोत्साहनार्थम्" अनेन तस्य विचारज्ञाने न कापि विचिकित्सा शंका वा भवितुमर्हति। सर्वानन्दोऽपि क्षीरस्वामिन एव कथनस्य पुष्टिम् करोति (3)। रायमुकुटोऽपि स्व पदचन्द्रिकायामिदमेव लिखति। नैतावदेवापितु अमरकोशस्य

---

(1) अमरकोश: ३-३-१८६।

(2) यस्य ज्ञानदयासिन्धोरगाधस्यानघागुणा:।
सेव्यतामक्षयो धीरा: स श्रिये चामृताय च॥ अमरकोश: १।१।

(3) अत्र चानुक्तोऽपि शाक्यलक्षणोऽर्थो ज्ञानदयादिभि: स्पष्टा प्रतीयते।
अमरकोश १।१ टीका।

स्वर्गवर्गे स्वयं कोशकारो दैत्यनामनिर्देशानन्तरमादिदेवरूपे बुद्धस्यैव समुल्लेखं १३-१५ श्लोकेषु करोति। अतोऽस्य बुद्धमतावलम्बित्वमशंकनीयतामेवैति (1)।

बौद्धत्वादेव नानार्थवर्गे "धर्मराजौ जिनयमौ", इति श्लोके जिनशब्दस्य पूर्वनिपातेन निर्देशोऽमरसिंहेन कृतः। तथाहि 'जिनयमौ" इत्यत्र "तापसपर्वतौ" इत्यादाविव "अल्पाचतरम्" (2) इत्यादिसूत्राणां प्राप्त्या "अभ्यर्हितञ्च"(3) इति वार्तिकेन जिनशब्दस्य पूर्वनिपातः- अभ्यर्हितत्वं च पूज्यत्वम्। तच्च बौद्धानां मते बुद्धापरपर्यायस्य जिनस्य देवविशेषत्वात् - स्पष्टमेव। यद्यमरसिंहो बौद्धो न स्यात्. वेदानुसारी स्यात्तदा वैदिकमते जिनापेक्षया यमस्यैव—अभ्यर्हितत्वात्–छन्दो भङ्गाद्यभावाच्च 'यमजिनौ' इत्येव वदेत्।

किञ्च देवसामान्यनामानि - उक्त्वा देवविशेष-नामारम्भे बुद्धनामोल्लेखनेन, "अमर सिंहो हि पापीयान् सर्वं भाष्यमचूचुरत्" इति प्राचीनानामभियुक्त्या चास्य बौद्धत्वं सुस्पष्टमेव।

किञ्चास्य बौद्धत्वे बहवः प्राचीना अमरकोश टीका ग्रन्थाः- अपि-आनुकूल्यं भजन्ते। तथाहि - यस्य ज्ञानदयासिन्धोः (4)। अत्रानुक्तोऽपि वाक्ये लक्ष्यार्थो ज्ञानदयादिभिः स्फुट प्रतीयते। यथा—"अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनाली बालमन्दारपुष्पम् "इत्यादौ अनुक्तोऽपि सूर्यः- उदयादिना पद्ममुद्राभञ्जनादिना च लक्ष्यते।

अन्ये तु क्वचिद् विशेषणमपि विशिष्य प्रतिपत्तिकरम्—यथा "निधानगर्भामिव सागराम्बराम्" (5)। इतिवदेवज्ञानदयासिन्ध्वादि विशेषणं विशेष्यप्रतिपत्तिकरमित्यदोषः- इत्याहुः।

यत्तूक्तं भानुदीक्षितेन "स्वामी (क्षीरस्वामी) तु "जिनमनुस्मृत्य" इति स्मरणलक्षणं मङ्गलमाह, तन्न। जिनवाचकपदस्यात्रादर्शनात्। सामान्यशब्दानां जिनलक्षण-

---

(1) डा. बलदेव उपाध्याय संस्कृत शास्त्रों का इतिहास पृ. ३३४।

(2) पा. सू. २-२-३४।

(3) का. वा. १४१२।

(4) अमरकोश का. १. श्लोक १।

(5) रघुवंशः ३।

विशेषपरत्वेन व्याख्यानस्य वैदिकानामनुचितत्वात्ः नामलिङ्गानुशासन कर्तुरमरसिंहस्य जैनत्वे प्रमाणाभावाच्च (1) इति तन्न रमणीयम् जिनवाचकपदानुपन्यासे कारणस्य प्राचीनैरुक्तस्योपदर्शितत्वात् । सामान्यशब्दानां जिनलक्षण-विशेषपरत्वेन व्याख्यानस्य वौद्धग्रन्थव्याख्याने प्रवृत्तानां वैदिकानामपि - उचितत्वात् । प्रकृतग्रन्थकर्तुर्जैनत्वे प्रमाणाभावस्य प्रागुपपादितत्वाच्च ।

यद्यपि केनचित्कविना कोशपरिगणनावसरे ऽमरोऽयं सनातनः-इत्युक्तम् यथा—

"मेदिन्यमरमाला च त्रिकाण्डो रत्नमालिका ।
रन्तिदेवो भागुरिश्च व्याडिः शब्दार्णवस्तथा ॥
द्विरूपश्च कलिङ्गश्च रभसः पुरुषोत्तमः ।
दुर्गो विधानमाला च संसारावर्त-शाश्वतौ ॥
विश्वो वोपालितश्चैव वाचस्पति—हलायुधौ ।
हारावली साहसाङ्को विक्रमादित्य एव च ॥
हेमचन्द्रश्च रुद्रश्चाप्यमरोऽयं सनातनः ।
एते कोषाः समाख्याता संख्या षड्विंशतिस्मृता ॥

अत्र "सनातनः" इत्यस्य विश्व हेमचन्द्राद्यपेक्षया प्राचीनः न तु व्याडि भागुर्याद्यपेक्षया प्राचीनः-इत्यर्थः । प्रकृतकोशापेक्षया पूर्वं बहूनां विद्यमानत्वात् - अमरसिंहेन स्वयं स्पष्टीकृतत्वाच्च (2) ।

अमरसिंहकालः

१—अयं कदा बभूवेति जिज्ञासायां केचिदेनं विक्रमसमकालीनं वदन्ति । प्रमाणस्वरूपञ्च ज्योतिर्विदाभरणस्थं श्लोकं समुदाहरन्ति (3) ।

२—केचनेतरे ऽमरसिंहं पाणिनिऽसमन्तभद्रयोरन्तरालभवमेनं ब्रूवते तत्रापि श्लोकमेकञ्च प्रमाणत्वेन संस्थापयन्ति (4) ।

---

(1) भानु दी० व्याख्या ।

(2) अमरकोशः- "समाहृत्यान्यतन्त्राणि" काण्डः १ श्लोकः २ ।

(3) धन्वन्तरिः क्षपणकामरसिंहशंकू वेतालभट्टघटखर कालिदासाः ।
ख्यातो वराहमिहरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रम ॥

(4) इन्द्रश्चन्द्रः काशकृत्स्नापिशाली शाकटायनः ।
पाणिन्यमर जैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः ॥

३—अस्तीदानीं नेपालदेशे कान्तिर्नाम राजधानी । एनामद्य जनाः काष्टमण्डपम् (काठमाण्डू) इति वदन्ति । तस्या एतस्याः पूर्वतः वाङ्मती—मणिभद्रानद्योः संगमादारभ्य वृद्धमीलकण्ठपर्यन्तं विशालनगरीति प्रसिद्धं पञ्चयोजनायतं विक्रमात् द्वादशशतकात्पूर्वमासीत् पत्तनमेकम् । त्रयोदशशतकारम्भे प्रायः समग्रमेव पत्तनमग्निना कवलितमिति प्राचीनवंशावलितो ज्ञायते । तत्रेदानीं सस्यक्षेत्राणि सन्ति । समुत्खननेन लब्धानि मन्दिरशकलानि अन्यानि च बहूनि-उपकरणानि सत्यमेतत्रावगमयन्ति वृत्तान्तम् । तामेव पुराम् जन्मना भूषतवान्—अयमिति केषाञ्चिद् विश्वासः । एतेन द्वादशशतकात् पूर्वमेवास्य जन्म सिद्धयति । इदानीमपि काष्ठमण्डपात् पूर्वतः कोशपादमिते इच्छित (टुकुचा) इत्याख्याया क्षुद्रनद्याः प्राक्कूले श्री नील सरस्वत्याप्रासादो वर्तते । इमामेव सरस्वतीमाराध्य अमरसिंहो विद्वद्वरेण्यः सञ्जातः । श्री नीलसरस्वत्या अग्रतस्तत्रैकस्मिन् शिलाखण्डे लिखिता तनैव रचिता स्तुतिर्वर्तते परं सुदीर्घकालवशात्—इदानीं वर्णानामस्पष्टतया एकोऽपि श्लोकः समीचीनतया पठितुं न शक्यते । केवलमवशिष्टांशादनुमीयत एव । तस्यानतिदूर एवास्ति बौद्धविहारः । अस्मिन्नेव बौद्धबिहारे अमरसिंहः कालम् यापितवानिति तत्र जनश्रुतिः ।

यदा श्रुतिमार्गोद्धार-तत्पराः श्रीमच्छङ्कराचार्याः श्री मद्भगवतो महेशस्य पशुपते दर्शनार्थमत्र प्राप्तास्तदा प्रासादस्य द्वारं नियन्त्रितमासीत् । तदवलोक्य श्री शंकराचार्यपादैः श्लोकोऽयं पठितः ।

ऐश्वर्यमदमत्तोऽसि मामनादृत्य वर्तसे ।
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः ॥

ततः पशुपतीश्वरोः स्वयमेव दर्शनं दत्तवन्तः । ततः पशुपतेः सकाशात् परावृत्य श्रीशंकराचार्याः—अमरसिंहेन सह वादं कृतवन्तः । तस्मिन् विवादकाले ऽमरसिंहस्तु जवनिकाभ्यन्तरे स्थितः श्री शंकराचार्यश्च बहिरेव स्थिता आसन् । इत्थमयं वादः सप्ताहं यावच्चलितः । न कोऽपि परं पराजयते स्म । ततोऽमरसिंह मवलोकयितु श्री शंकराचार्या जवनिकामनावृत्याभ्यन्तर मवलोकयामासुः । तत्र किल घटे समावस्थिता सर्वशास्त्रस्वामिनी सरस्वती स्वयं शास्त्रार्थं कुर्वाणा तैः संदृष्टा । तद्दृष्ट्वा च श्री शंकरपादैरुक्तम् —"भगवति ? किमिति माँ त्यक्त्वा बौद्धापसदं स्वीकरोषि ? इत्युक्ता सरस्वती वाग्देवी तिरोहिता बभूव । ततोऽनन्तर श्री शंकराचार्यैर्जितः स ह्या प्रपीड़ितोऽभूत् । ततः श्री शंकरपादाः सर्वेषामतीवोपकारकममरकोशं दृष्टवन्तः प्रशशंसुश्च ।

इत्येषा किम्वदन्ती सर्वेषां नेपालस्थितानां बौद्धभिक्षूणां मुखात्—एकयैव रीत्या निर्गच्छति ।

यद्यपि शंकर-दिग्विजयकाव्ये श्रीशंकरपादानां नेपालागमनं नावलोक्यते, तथापि प्राचीन–नयपाल-नृपालवंशावलिवर्णनाधारेण पशुपतिनाथस्थितानां प्राचीनशिलापात्रताम्रपात्रादीनाञ्च लेखैः श्रीशंकराचार्याणां तत्र गमनम् निश्चितमेव । अतः शंकरपादानां काले पञ्चाशदधिकाष्टशतविक्रमवर्षेऽमरसिंहो भुवमलञ्चकारेति प्रतीयते ।

४-अत्रैवेदमपि वक्तुमुचितं प्रतीयते यदयममरसिंहः ख्रीष्टाब्दात् प्रागेवासीत् । अत्रामरकोशप्रमाणेनावगम्यते यदमरकाले वत्सरारम्भो मार्गशीर्षे भवति स्म न च चैत्रे मासि (1) । क्षीरस्वामिना समादृतः पाठः (2) बहुभिर्वाक्यैर्विरुद्धत्वादनादरणीय एव (3) । अनेनैव क्षीरस्वामिना "तस्मिन्नेवाग्रहायणी" इत्यस्य व्याख्यानावसरे अग्रे हायनो यस्या आग्रहायणी - मार्गशीर्षादारभ्य सम्बत्सरप्रवृत्तेः—इत्युक्तम् । गीतायामपि—"मासानां मार्गशीर्षोऽहमित्युल्लेखोऽत्राप्यते (4) । अतः सम्बत्सरारम्भः कदाचिन्मार्गशीर्षे समभूत् । तादृशश्च कालः सहस्रचतुष्टयहायनपरिमितात् कालात् प्राचीनः स्यादिति ज्योतिर्विदाम् मतम् (5) ।

अत्रोल्लिखिते प्रथमनिर्णये विदुषामिदं मतं यद्यस्य ग्रन्थस्योदाहरणं तत्रोपन्यस्यते ग्रन्थोऽसौ केनचिन्नवीन कालिदासेन लिखितोऽतोऽस्य प्रमाणत्वं न सिद्ध्यति । द्वितीयमतविषये विद्वांसः कथयन्ति यन्न नात्र क्रमपूर्वकं शाब्दिकानां नामोल्लेखः । तृतीयमतविषये चापि विश्वासार्हता नास्ति । यतोहि—इतिहासोऽयं केवलं किम्वदन्ती—समाश्रितोऽस्ति । पुष्टप्रमाणानामप्यत्राभावोऽस्ति । सहैवाधुनिकेतिहास पण्डितैर्निर्धारितः शंकरपादानां कालोऽप्यधुना यावन्न सुनिश्चितः । अतोऽत्र चतुर्थ-मत-स्थापनाऽप्यपूर्णा एव । पञ्चमोऽपि मतश्च विदुषां कृतेऽमान्य एव स्यात् (6) ।

इत्थं किलामरस्य देश-जन्म-कालादिविषये सुस्पष्टतया न किमपि ज्ञातुं शक्यते । तथापीदं सुनिश्चितमस्ति यदमरः पूर्वंप्रतिपादितकोशकारेभ्यो नूनमेवार्वाचीनः । अतोऽनुमानाधारेऽमरस्य समयादिविषये किञ्चिन्निर्धारणीयमेव । षष्ठशतके उज्जयिन्या निवासी गुणरातोऽमरकोशस्यानुवादं चीनीयभाषायाञ्चकार । अतो हि सुनिश्चयमेवायं षष्ठशतकात् प्राचीनतम एव । इदमपि निश्चितं भवति यदयममरः

---

(1) मार्गशीर्षे सहामार्ग आग्रहायणिकश्च सः । अ. का. १ श्लोक १४ ।

(2) द्वौ द्वौ माघादिमासौ स्यात्–क्षीरस्वामी । अ. ।

(3) षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।
मार्गशीर्षो मृगशिरस् तस्मिन्नेवाग्रहायणिः ।अ.

(4) श्रीमद्भगवद्गीता अ० १० ।

(5) ज्योतिर्निबन्धावलिः पृ: ४०—४१ ले० पं०श्री चन्द्रपाण्डेयः ।

(6) श्री गजानन शास्त्री मुसलगाँवकरः । दिव्यज्योतिः (सं. मा.) अं. ६, मार्च १९५ ।

चन्द्रगोमितः पूर्वकालीनः। अमरकोशे प्रगतजानु-कृते प्रज्ञुः' ऊर्ध्वजानुकृते ऊर्ध्वज्ञुः, संहतजानुकृते च सञ्ज्ञुः, शब्दः सुनिश्चितः। एतेषां त्रयाणामेव शब्दानां सिद्धिः पाणिनीयव्याकरणसूत्राभ्याम्—"प्रसंभ्यां जानुनोर्ज्ञुः (५।४।१२९) 'ऊर्ध्वाद् विभाषा" (५।४।१३०) आभ्यामेव जायते। चान्द्रव्याकरणानुसारञ्च त्रयाणामेषाँ रूपाणि क्रमशः प्रज्ञ-ऊर्ध्वज्ञ—सञ्ज्ञ—(४।४।१२६-१३, चान्द्रव्याकरणम्) मयानि भवन्ति। यदि अमरसिंहः एभिः रूपैः परिचितोऽभविष्यत्तु तेन सनिश्चयमेव तेषामुल्लेखः श्लोकेऽस्मिन् विहितोऽभविष्यत्। अतोऽमरसिंहश्चन्द्रगोमितः पूर्वकालीन एव सिद्ध्यति (1)। अमरः पाणिनेः सूत्राणां स्पष्टनिर्देशं करोति (2)। चान्द्रव्याकरणं पाणिनितोऽतीव सुगमं तथापि कोशकारोऽस्य प्रयोगं न कुरुते। अतश्चान्द्रव्याकरणस्य रचयितुः पूर्वकालीनोऽयम् विद्यते। अमरसिंहः सांख्यदर्शनस्य गूढतमज्ञानं धारयति प्रमाणस्वरूपमत्र गन्धर्वशब्दो विद्वद्भिः समुदाहृतः। यथाह अमरः:—

"अन्तराभव सत्वेऽश्वे गन्धर्वो दिव्यगायने।" गन्धर्वशब्दस्यार्थः :—अन्तराभव सत्वो भवति। अन्तरा मरणजन्मनोर्मध्ये भवं सत्वं यातना शरीरम्। प्राचीनाः सांख्यमनुयायिनो मतमिदं स्वीचक्रुः। एतस्य विपरीतं विन्ध्यवासिन आचार्यस्य विशिष्टमतमासीत्। यस्योल्लेखः-कुमारिलः (3) भोजराजः (4) मेधातिथिः (5) आद्याचार्यश्चक्रुः। यथा

अन्तराभवदेहस्तु नेष्यते विन्ध्यवासिना।
तदस्तित्वे प्रमाणं हि न किञ्चिदवगम्यते॥ (श्लोकवार्तिकः)

विन्ध्यवासी प्राचीनानां मतं नैव स्वीकरोति। अस्य मत-खण्डनार्थं वसुबन्धुना परमार्थसप्तति—रचना विहिता। फलतः — विन्ध्यवासिसमयः २५० ई० ३२० ईशवीयाब्दमध्ये तिष्ठति। अमरश्च विन्ध्यवासिना परिचितो नाभूत्। अत एवास्य समयः २२५ ईशवीयाब्दनिकटः क्वचिदनुमानतो भवितुं शक्यते। अथवा क्षपणकस्य समसामयिकः।

---

(1) खुरणाः स्यात् खुरणसः प्रज्ञुः प्रगतजानुकः।
ऊर्ध्वज्ञुरुर्ध्वजानुः स्यात् संज्ञुः संहत जानुकः॥ अमरः २।६।४७।

(2) शालार्थापि परा राजाऽमनुष्यार्थादराजकात् अमरः ३।५।२७।
(सभाराजामनुष्यपूर्वा २।४।२३) पाणिनिसूत्राधारः नतु 'ईश्वरार्था दराज्ञः सभा, अस्य चान्द्रव्याकरणस्याधारे)

(3) श्लोक वर्तिक पृ. ३९३-७०४।

(4) भोजवृत्तिः ४।२२।

(5) मनुभाष्य १।५५।

अमरस्य टीकाकाराः

अमरकोशोपरि ५० टीकानामुल्लेखोपलभ्यते (1)। श्रीमुकुन्द-दैवज्ञः कोशस्यास्य टीकाकाराणां नामावलीमधस्तन-प्रकारेण निर्दिशति ।

गोवर्द्धनः सर्वंधरश्च हट्ट—
चन्द्रो जयादित्य—महेश्वरौ च ।
भगीरथो द्राविड़—मल्लिनाथौ
तथा च नारायण चक्रवर्ती ॥
रमेश्वरो भानुजदीक्षितोऽपि
तथा कलिङ्गारुणराजदेवाः ।
रामप्रसादो मथुरेश-काशि-
नाथावथो कोङ्कट-कोहलौ च ॥
नारायणौ लिङ्गमसूरि-नील—
कण्ठाच्युता माधव - लोकनाथौ ।
तथाभिनन्दो रघुनाथ-चक्र-
वर्ती रमानाथ सुभूतिरामाः ॥
सर्वानन्दो रामकृष्णः शबरस्वामि सौगतौ ।
हरदत्तो रामनाथस्तथा भरतमल्लिकः ॥
क्षीरस्वामी महादेवः परमानन्दमैथिलः ।
मुकुटो नयनानन्दः कौचिदन्यौ मनीषिणौ ॥
अमरसिंहस्य कोषस्य टीकाकारा इमे स्मृताः(2) ॥

अर्थात्—निम्नलिखितैर्महानुभावैः कोशस्योपरि विभिन्नाष्टीका लिखिताः । १. गोवर्द्धनः, २. सर्वंधरः, ३. हट्टचन्द्रः, ४. जयादित्यः, ५. महेश्वरः, ६. भगीरथः, ७. द्राविडः, ८. मल्लिनाथः, ९, नारायण चक्रवर्ती, १०. रमेश्वरः, ११. भानुजदीक्षितः, १२. कलिङ्गः, १३. अरुणः, १४. राजदेवः, १५. रामप्रसादः १६. मथुरेशः, १७. काशिनाथः १८. कोङ्कटः, १९. कोहलः, २०. नारायणः, २१. लिङ्गम्ः, २२. सूरिः, २३. नीलकण्ठः, २४. अच्युतः, २५. माधवः, २६. लोकनाथः, २७. अभिनन्दः, २८. रघुनाथः, चक्रवर्ती, २९, रमानाथः.

---

(1) "There are not less than 50 known commentaries in the AMARAKOSHA".
A History of Indian Literature vol. III. Part II. M. Winternitz,

(2) कोशनामावली, श्रीमुकुन्ददैवज्ञरचिता ।

३०. सुभूतिः ३१. रामः ३२. सर्वानन्दः ३३. रामकृष्णः, ३४. शबरस्वामी, ३५. सौगतः, ३६. हरदत्तः, ३७. रामनाथः, ३८. भरतमल्लिकः ३९. क्षीरस्वामी ४०, महादेवः, ४१. परमानन्द मैथिलः, ४२. मुकुटः, ४३. नयनानन्दः, ४४. कश्चिदन्यः ४५ कश्चिदपरः ।

अस्मिन्—विषये श्री एम. विन्टरनित्सः कोशस्यास्य पञ्चाशत्—टीकानामुल्लेखं करोति यस्य प्रतिपादनमस्माभिः पूर्वमेव विहितम् । डा० आफ्रेशश्च (केटालागस केटालागम्) नामक—स्वकीये ग्रन्थसूचिपुस्तके चत्वारिंशत् टीकानामुल्लेखं करोति । इयञ्च मुकुन्ददैवज्ञस्य अमरकोशटीकाकाराणां नामावली पञ्चचत्वारिंशन्मितान् अमरटीकाकारान् कथयति । तत्रापि चान्तिमौ द्वौ टीकाकारौ कावास्तामिति न तेन प्रदर्शितम् "कौचिदन्यौ-मनीषिणा" वितिमात्रमेवासौ विलिखति । तथापि - सुस्पष्ट-मिदमुल्लिखितोदाहरणेन यदस्य टीकाकारास्त्रिचत्वारिंशत्संख्यकास्तु सन्त्येव । यतोहि, एतेषां नामोल्लेखः सुस्पष्ट एव । अस्य कोशस्य-एतावतीभिष्टीकाभिर्लोकप्रियता सुनिश्चिता एव । अतो निर्विवादमिव कथयितुं शक्यते यदयं कोशः संस्कृतसाहित्यकोशवाङ्मये सर्वप्रियः, सर्वजनाभिनन्दितश्च । एता व्याख्याः पूर्णरूपेणोपलब्धा न सन्ति । तथापि विभिन्न-ग्रन्थाध्ययनेन सततपरीश्रमेण च गवेषकैष्टीकाकृन्नामान्वेषणं विहितमेव । एतेषां विशिष्टमैतिह्यं टीकोपलब्ध्यभावान्न लभ्यते । अमरस्य प्राचीनतमो व्याख्याता श्रीक्षीरस्वामी । स हि उपाध्याय, गौड़—श्रीभोजादीनामपि नामानि - अमरकोशटीकाकारेषु परिगणयति परमेतेषामपि टीकाग्रन्थानां प्राप्तिर्न भवति । अतः सर्वप्रथमाऽमरकोशटीका समुपलब्धटीकासु क्षीरस्वामिन एव । अस्या नाम अमरकोशोद्घाटनमित्यस्ति सुप्रसिद्धम् ।

१ क्षीरस्वामी

'अमरकोशोद्घाटनम्' विदुषां मते कोशस्यास्येयं सर्वप्राचीनोपलब्धटीका । स्वामिनोऽस्य क्षीरतरङ्गिण्या अध्ययनेन परिज्ञायते यदस्य पितुर्नाम ईश्वरस्वामीति-आसीत् । एते कश्मीरनिवासिन आसन् । अत्र विदुषामनुमानं वर्तते यदमरव्याख्यारम्भे शिवस्य प्रशस्ता स्तुतिर्वर्तते । अस्य क्षीरतरङ्गिणीग्रन्थस्यान्तिमभागाध्ययनेन प्रतीयते यदस्य प्रतिलिपि र्जयसिंहस्य कश्मीराधिपस्य समये कृताऽभूत् । यज्धातोर्व्याख्याकाले च "यजुः काठकम्" इति लिलेख । अनेन विद्वांसो गवेषकाः कथयन्ति यदयं कठशाखाप्रियोऽभूत् । अतोऽयं कठशाखां प्रति स्वीयमनुरागं प्रदर्शयामास । अस्याश्च याजुष-शाखाया मुख्यक्षेत्रम् कश्मीर एव । अतः क्षीरस्वामी कश्मीरदेशीय आसीदिति अनुमानम् ।

यथा किलास्य जन्मस्थानविषयकः परिचयोऽनुमानाधारितस्तदिव जन्मकालादिनिर्णयोऽपि—अनुमानाधारित एव । ग्रन्थारम्भे चतुर्थश्लोकस्य व्याख्यावसरेऽनेन

भोजस्य व्याख्याया उद्धरणं प्रदत्तम्। अनेनानुमीयते यद् भोजोऽपि-अमरव्याख्यां लिलेख। परमस्य भोजस्य टीकाऽद्यापि न लभ्यते। वर्धमानः स्वग्रन्थे "गणरत्नमहोदधौ" क्षीरस्वामिन उल्लेख चकार। अस्य ग्रन्थस्य रचनाकालः ११९७ विक्रमाब्दः ११४० ईशवीयाब्दश्च। अनुमानत एव भोजस्य मृत्युः १०६५ ईशवीयेऽब्दे वर्धमानस्य च ११४० ईशवीये। अतोऽस्य कालः ईशवीयाब्दानाम्-एकादशशत कस्यान्तिमो भागो-द्वादशशतकस्य चारम्भिको भागस्तिष्ठति। अर्थात् १०८० ईशवीयाब्दतः ११३० ईशवीयाब्द यावत्[1]। अनेन षड्ग्रन्थाः लिखिताः स्युरिति अमर-व्याख्या लेखनकालेऽयं निर्दिशति[2]। (१) अमरस्य टीका "अमरकोशोद्घाटनम्", (२) क्षीरतरङ्गिणी पाणीनीयधातूनां विशदा व्याख्या, (३) निपाताव्ययोपसर्गवृत्तिः, अप्रकाशिता, (४) गणवृत्तिः, सम्भवतो गणपाठ-व्याख्या। (५) अमृततरङ्गिणी, (६) षष्ठो वृत्तिर्न ज्ञायते। एवमपि कथ्यते यदयं क्षीरस्वामी चिङ्गलेपट मण्डलस्य उत्तिरामेरु-स्थानस्य निवासी-आसीत्। (ए, डी.) एकादशशतकेऽभूत्[3]।

अमरकोशोद्घाटनम्

अस्यां व्याख्यायाम् क्षीरस्वामिनाऽमरस्य प्रत्येकशब्दानाम् मार्मिकविवेचनम् विहितम्। शब्दानाम् व्याकरणसम्मता व्युत्पत्तिरपि प्रदर्शिता। परं रामाश्रमीवत् प्रत्येकस्य शब्दस्य व्युत्पत्ते राग्रहोऽत्र नास्ति। एतदतिरिक्तम् शब्दस्वरूपविवेचनम् तत्पोषणार्थञ्चान्यप्राचीनकोशकाराणामुल्लेखोऽपि विहितः। तेषामुद्धरणान्यपि न्यस्तानि। तन्त्रशास्त्रस्याप्ययम् विख्यातो विद्वान् प्रतीयते। वैष्णवसंहितास्योऽसौ विशिष्टवचनोद्धरणानि ददाति। यथा अमरे श्लोकोऽयं समायाति —

शङ्खो लक्ष्मीपतेः पाञ्चजन्यः चक्रं सुदर्शनः।
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः॥

अमरः श्लो. २८।

अत्र भगवतो विष्णोर्गदाया नाम कौमोदकी वर्तते। यतोहि भगवान् विष्णुर्हि स्वयं कुमोदकः। यथाह दुर्गः- "विष्णुः कुमोदकः शौरिः" इति। अस्मिन् प्रसङ्गे ीरस्वामि-मतानुसारं संहितासु विष्णोर्गदाया नाम कौपोदकी विद्यते यतोहि गदेयं

---

(1) संस्कृत शास्त्रों का इतिहास। डा. बलदेव उपाध्याय पृ. ३३७।

(2) न्याय्ये वर्त्मनि वर्तनाय भवता षड्वृत्तयः कल्पिताः। अमरटीका श्लो. ८।

(3) A Descriptive catalogue of the Sanskrit Manuscripts. T. M. S. S. M. L. Tanjore 1930.

कूपोदकात् समुद्भूता मन्यते । सूर्यसम्बन्धिसौरतन्त्रेणाप्यसौ सुपरिचितो लगति । अत एव सूर्यस्य षोडषपरिचारकाणां नामोल्लेखमसौ सौरतन्त्रात् करोति (1)। आयुर्वेदस्याप्यसौ प्रकाण्डपण्डितोऽभूत् । अस्य ज्ञानं तस्य वनौषधिवर्गस्य टीकाध्ययनेन कश्चिदपि कर्तुं शक्नोति । अत्रासौ - अमरस्य त्रुटीनां परिचमपि ददाति ।

अमरेण खदिरस्य कृते बालतनयशब्दस्य प्रयोगो विहितः । धन्वन्तरिणा स्वकीये धन्वन्तरिनिघण्टौ बालपत्रस्य प्रयोगः कृतः । परमत्रामरेण बालपुत्र-भ्रान्त्याः स्वकोशे बालतनय शब्दः प्रयुक्तः (2)। यथाह क्षीरस्वामी–"द्व्यर्थेषु धन्वन्तरिपाठमदृष्ट्वा बालपुत्रभ्रान्त्या ग्रन्थकृद्-बालतनयमाह (3) ।

एवमेव दन्ती शब्दस्य कृते उपचित्रा शब्दस्यापि प्रयोगः अमरस्य भ्रान्तिपूर्ण एव । क्षीरस्वामी अत्र विवेचयति । "द्व्यर्थे उपचित्रा दन्ती पृश्निपर्णी चेति, दन्त्यां द्रवन्ती भ्रान्त्या ग्रन्थकृदुपचित्रामाह (4)। इत्थमेव पुष्करमूलस्य कृतेऽमरः शब्दत्रयं दत्तवान् । एषु पद्मपत्रमपि-एकः शब्दोऽस्ति । अत्रापि शुद्धशब्दः पद्मवर्णः, न तु पद्मपत्रम् । अथ च क्षीरस्वामिनोऽनुसारमेवापराजिताया लतायै कोशकारेण वातक-शीतल शब्दयोः प्रयोगो विहितः । यथा—

"स्याद् वातकः शीतलोऽपराजिता शणपर्ण्यपि" २-४-१५० शीतलवातकः- इत्येका सञ्ज्ञा । यद् धन्वन्तरिः शीतपर्णी शीतलवाहक इत्याह । द्व्यर्थेऽपराजिता शीतलवातको गिरिकणिका च (5) ।

यथा पूर्वमेव प्रतिपादितं यदेषा क्षीरस्वामिनष्टीका सर्वप्राचीना वर्तते । अस्याष्टोकाया अपेक्षया प्राचीना व्याख्या अपि - अमरस्य आसन् इति क्षीरस्वामी स्वयमेवाह । स हि चतुर्णां टीकाकाराणामुल्लेखं चकार । उपाध्यायः गौड़ः श्रीभोजः नारायणश्च । परमेताः- अद्य सर्वा अपि प्रणष्टप्रायाः । एतेषामपि विदुषां टीकामेलनेन सह टीकाकाराणां संख्या पञ्चाशत् समीपं प्राप्ता भवति ।

---

(1) द्रष्टव्यम् - अमरटीकाव्योमवर्गे माठरशब्दस्य वृत्तिः ।

(2) कण्टकी बालपत्रश्च जिह्मशल्यः क्षितिक्षमः । धन्व. नि. १–१२५ ।

(3) क्षीरस्वामी व्याख्या ।

(4)

(5) अमरटीका पृ. ११० ।

२. श्रीसर्वानन्दस्य टीकासर्वस्वम्

श्री सर्वानन्दनामकस्य या टीका लिखिता तस्या नाम टीकासर्वस्वमस्ति (1)। अस्य रचनाया उल्लेखो ग्रन्थाभ्यन्तर एव कालवर्गस्य व्याख्यायामेवाभूत्। सर्वानन्दस्य टीकालेखनकालः ११५९ ईशवीयाब्दोऽस्ति (2)। सर्वानन्दस्य उपाधि हि "वन्द्यद्घटीयः" विद्यते। वन्द्यद्घटीयः वन्द्योपाध्याय उपाधेरेव नामान्तरम् (3)। कथनस्यायमाशयो यदयं सर्वानन्दः बंग-ब्राह्मणः- आसीत्। अस्य पुत्रः-आर्तिहरः वभूव। अमरस्य टीकेयं "टीका सर्वस्वम्" क्षीरस्वामिनोऽमरकोशोद्घाटनमिव प्रामाणिका पाण्डित्यपूर्णा च। अयं टीकाकारो बंगीयसंस्कृतकोशकारान् सर्वाधिकं प्रभावयाञ्चक्रे। स्वव्याख्यापोषणमनेन विभिन्नकोषाणामाधारम् गृहीत्वा कृतम्। यथा :

श्री क्षीरस्वामी ब्राह्मणार्थकवाडवशब्दव्युत्पत्तिमनेन प्रकारेण करोति। वाडव इवातृप्तः। सर्वानन्दस्त्विमां व्युत्पत्तिमशुद्धाम् कल्पनाप्रसूताञ्च मनुते। वडवायां भवः वाडवः। वड़वा-ब्राह्मणी। वडवा कुम्भदास्यश्च स्त्रीविशेषो द्विजाङ्गनाः (4)। सर्वानन्देन स्वटीकासर्वस्वे अजय-पुरुषोत्तमदेव-भागुरिरभस-रुद्र-वररुचि - शाश्वत - वोपालित - व्याडि • हड्डचन्द्रहलायुधकोशकाराणां नामनिर्देशो विहितः। सर्वानन्दो हि टीकामिमाम् ११७९ (ए. डी.) शतके ईशवीये विनिर्मितवान् (5)।

३. रायमुकुटस्य पदचन्द्रिका :

एवमेव रायमुकुटः पदचन्द्रिकानाम्नीं व्याख्याम् अमरकोशस्य विनिर्ममे। अत्रोभयो सर्वानन्दीय - रायमुकुटीयटीकयोश्चेत्तुलनात्मकमध्ययनं विधीयेत तु रायमुकुटस्य विवेचनमेव विदुषां मतेन सन्तुलितं विद्यते। उभाभ्यामेव व्याख्या-काले

---

(1) इयं टीका श्रीगणपति शास्त्रिणः सम्पादकत्वेऽनन्तशयनम् ग्रन्थमालाया अन्तर्गतं प्रकाशमुपगता १९१४-१७।

(2) इदानीं चैकाशीतिवर्षाधिक-सहस्रैकपर्यन्तेन शकाब्दकालेन (१०८१ शकः) षष्टिवर्षाधिकद्विचत्वारिंशच्छतानि कलिसन्ध्याया भूतानि (४२६०) अमर १-४-२१ टीका।

(3) डा. श्री हरप्रसाद शास्त्री।

(4) भरतकोशः।

(5) A. D. C., S. M. Tanjore.

विभिन्नशास्त्राणां मतांपन्यासो विहितः स्वस्वव्याख्यां परिपुष्टां प्रदर्शयितुम्। अत्र किल सर्वानन्दोऽमरस्य दशसंख्यकविभिन्नटीकानामालोड़नं विधाय स्वकीयं टीका-सर्वस्वं लिखितवान्। उतश्च रायमुकुटः पदचन्द्रिकां स्वपूर्वषोडष टीकाध्ययनं विधयाम रचितवान्। सर्वानन्दो रायमुकुटात् शतत्रयवर्षप्राचीनः। इत्थ किलामरस्य लोकप्रियत्वं टीकाकारानुत्तरोत्तरम् समाचकर्ष। रायमुकुटो हि स्वीयां टीकाम् १३५३ तमे शकाब्दे प्रणिनाय।

४. सुभूति चन्द्रस्य कामधेनुः

सुभूतिचन्द्रोऽमरकोशस्य कामधेनुनामिकां टीकाम् विरचयामास। सुभूति चन्द्रो बौद्ध आसीत्। त्रिविष्टपस्य (तिब्बतस्य) नागौर मठऽस्याष्टीकायाः संस्कृतपाण्डुलिपि-र्हि विराजते। तिब्बतीयभाषायामस्या अनुवादश्चाभूत्। सस्कृतपाण्डुलिपि-रस्यास्तत्रापूर्णा वर्तते। लेखनकालश्चास्या नेपालीय सम्बत् ३१३, ११९१ ईशवा-याब्दश्च विद्यते। मद्रासस्य पत्रिकायामपि द्वितीयो हस्तलेखोऽस्या व्याख्याया मिलति। तत्र सरस्वतीकण्ठाभरणस्य शृगारप्रकाशस्य च निर्देशोऽस्यां टीकायां कृतः। परिणामतो ज्ञायते यदयं क्वचित् १०८२ ईशवीयाब्दानन्तर (भोजराजस्य मरणकालोऽयमेव) जनिर्लेभे। शरणदेबोऽपि स्वकीयदुर्घटवृतौ (1) अस्य वचन-मेकमुद्धरणरूपेणोपन्यस्तवान्, (रचनाकालः ११७२ ई,) इत्थमस्य समयः १०६२ ११७२ ईशवीयाब्दानाम् मध्ये भवितव्यः। सम्भवतो द्वादशशतकस्य प्रथमचरणे। नागोरबौद्धमठस्य हस्तलेखोऽस्य पोषको मन्यते। सुभूतेः कामधेनु टीकाया प्रभावो-ऽवान्तरकालीनटीकाकारेषु विशेषरूपेण निपतितोऽस्ति। सर्वानन्देन याऽमरटीका विरचिता तस्या कालः ११५९ ईशवीयाब्दो वर्तते। अयं सर्वानन्दो बौद्ध विद्वान् आसीत्। सुभूतिरपि बौद्धः। एकस्य वौद्धविदुषोऽयवौद्धविद्वांसं प्रत्याग्रहः स्वाभाविकस्तथापि सर्वानन्दोऽस्योल्लेखं न चकार। अनेन स्पष्टं भवति यत्तावत्का-लम् यावदस्य सुभूतेष्टीका प्रथिमानं न लेभे। सर्वानन्दः स्वयं लिखति यदसौ स्वटीकालेखन–काले दशप्राचीनटीकाधारम् गृहीतवान्। परमासु कामधेनुटीकाया अनुल्लेखादस्या अप्रसिद्धत्वमेव सिद्धम् भवति।

पदचन्द्रिकाया लेखकेन सुभूतेर्विशिष्टमतानामुल्लेखो विहितः। एवमेवार्वाची-नटीकाकारोऽपि श्रीलिङ्गभट्टः स्वटीकायां सर्वानन्देन साकमेव सुभूतेरप्युल्लेखम् चकार। अनेन सुस्पष्टो भवति अमरस्योत्तरकालीनटीकाकृत्सु सुभूतेः प्रभावः।

यद्येषा कामधेनुरपि मिलेत्तु कोशविद्या-इतिहासे महत्वपूर्णं कार्यमिदं स्यात्। पदचन्द्रिकाया अध्ययनेन सुभूतेर्विचाराणां किञ्चिद् ज्ञानम् भवति। यथा—

(1) संज्ञापूर्वं विधेरनित्यत्वात् वृद्ध्यभाव इति सुभूतिः. दुर्घटवृति पृ. ८२ अनन्त-ग्रं. मा.

"लक्ष्मण" शिचन्हवाचकशब्दः- रभसमते । परम् सुभतिस्तथा न स्वीकरोति । रभसो यद्यप्यत्र मकारम् मध्यस्थितम् मनुते । सुभूतिस्तु तथा न । सुभूतिरत्र मकार-हीनमेव शब्दमेनम् स्वीकरोति । रभसमते (लक्ष्मणम्) सुभूतिमते (लक्षणम्) भवति । क्षीरस्वामी कूर्दनम् स्वीकरोति । सुभूतिस्तु कुर्दनमित्येव कथयति । एवमस्याः सुभूतेष्टीकाया महत्वम् प्रकटी भवति [1] ।

५. वृहस्पतेः रायमुकुटस्य पदचन्द्रिका-

अमरकोशस्य एकापरा व्याख्या पदचन्द्रिका वर्तते । इयमपि स्वकीयम् विशिष्टम् महत्वम् धारयति [2] । अस्या लेखकश्च बृहस्पतिः । असौ स्वयमेव ग्रन्थारम्भे स्वकीयं परिचयं प्रददाति । अस्य पितुर्नाम गोबिन्दः- मातुश्च नाम सुखायिदेवीति । अयम् वङ्गदेशस्य प्रख्याते राढ़ा नगरे न्यवात्सीत् । गौड़स्य राज्ञाऽस्मै "पण्डितसार्वभौमः" इत्युपाधिप्रदानमकारि । परमयम् रायमुकुटमणिः, रायमुकुटो वेति प्रख्यातो वभूव । अय विश्वास-रामादयः पुत्रा दिग्विजयिनो विख्याताश्च पण्डिता वभूवुः । जनतायाम् समाजे चायं प्रख्याततमोऽभूत् ।

कालवर्गस्य टीकायामनेन स्व-समयस्य सुस्पष्टसङ्केतः प्रदत्तः [3] । अर्थात् शकाब्दाः १३५३, कलिवर्षाणि ४५३२, ईशवीयाब्दाश्च १४३१ । पदचन्द्रिकाया अयमेव रचनाकालः । इयम् टीका पाण्डित्यपूर्णा । डा० आडफ्रेक्टः २७० ग्रन्थानामुद्धरणोल्लेखमस्याम् टीकायाम् कुरुते । रायमुकुटः स्वयमपि लिखति यदसौ षोड़शव्याख्याधारम्—सङ्गृह्य टीकामिमाम् विनिर्ममे [4] । परमेता षोड़शटीकाः का आसन्निति लेखो न लभ्यतेऽन्यथा कोशविद्या - इतिहासकृते महत्व-पूर्णोल्लेखोऽयमभविष्यत् । इत्थमनेकटीकाग्रन्थकाव्यादिभ्योऽनेनानेकोद्धरणविन्यासः

---

(1) संस्कृतशास्त्रों का इतिहास । डा० बलदेव उपाध्य पृ. ३४२ ।

(2) पदचन्द्रिकायाः प्रथमो भागः राजकीयसंस्कृतमहाविद्यालयः कलकत्तातः डा० काली किंकरस्य सम्पादकत्वे १९६६ ईशवीयाब्दे प्रकाशित । प्रमाणिकञ्चेदम् संस्करणम्

(3) इदानीं शकाब्दाः १३५३ द्वात्रिंशदब्दाधिक–पञ्चशतोत्तर–चतुः सहस्रवर्षाणि कलिसन्ध्याया भूतानि ४५३२ । पदचन्द्रिका व्या. १५७ पृ. ।

(4) इयं षोड़शटीकार्थं सारमादाय निर्मिता ।
अतोऽभिलिखितो ऽर्थोऽस्यां न हेयः सहसा बुधैः ॥
आरम्भस्य ३ श्लोकः ।

स्वटीकायाम् विहितस्तेन चास्य पण्डितप्रकाण्डत्वम् परिपूर्णतया सिद्ध्यत्येव नात्र संशयः।

प्राचीनविस्मृतानुपलब्धकोषाणां विषयेऽस्याम् प्रभूता सामग्री विद्यते। अस्या व्याख्याया अध्ययनेन शब्दविषयकम् बहुमूल्यज्ञानम् भवति। अत्रानेकमेदिनी-शब्दार्णव-सुभूतिसर्वधर-सर्वानन्द-वोपालितादीनाम् प्राचीनकोषाणामुल्लेखः, प्राचीनकाव्यानाम्—विशेषतोऽनुपलब्धस्य पाणिने जाम्बवती काव्यस्योल्लेखश्चास्या-ष्टीकाया महत्व-सम्वर्धने कारणानि।

अनेकेषां नवीनशब्दानां तथा च नवीन-प्रयोगाणाम्-निर्देशो रायमुकुटस्य बहुज्ञानस्य विशालाध्ययनस्य च प्रमाणम्। अस्या व्याख्याया अध्ययनेन चेदम् सर्वमपि ज्ञातम् भवति।

रायमुकुटस्य शब्दार्थानाम् तुलनात्मकविवेचनम् शब्दानां वर्तनी (Spelling) विषयकम् प्रत्युत्पन्नमतित्वम् सर्वतः प्रशस्यम्। चन्द्रमाः, रोचिः, दीप्तिः, आतपः रौद्रः, विश्वकेतुः, ऋष्यकेतुः, रिष्यकेतुः, रिश्यकेतुः त्रिविष्टपः, त्रिपिष्टपः, अलगर्धः-अलगर्दः (सर्ववाचकः) एवंविधशब्दानामनेकेषामध्ययनेन रायमुकुटस्य प्रख्यात वर्तनीकारत्वम् शब्दानां तुलनात्मकाध्ययनप्रौढत्वञ्च निःशङ्कम् सिद्ध्यति।

अनेन प्रकारेण पदचन्द्रिका शब्दानां व्युत्पादन–वर्तनी–प्रयोगादिविषया-णामाधार एवेति स्वीकरणीयम् भवति।

६. भानुदीक्षितस्य व्याख्यासुधा

भानुदीक्षितः-भट्टोजिदीक्षितस्य पुत्रो बभूव। अयम् भानुदीक्षितोऽपि—अमर-कोशस्य लोकप्रियामेकाम् टीकाम् विरचयामास। अस्या व्याख्याया नाम यद्यपि व्याख्यासुधा विद्यते। तथापीयम् "रामाश्रमी" नाम्ना प्रसिद्धा। भानुदीक्षितेनानन्त-रम् सन्यासग्रहणमकारि। ततोऽसौ रामाश्रमनाम्ना प्रसिद्धोऽभूत्। तस्य नाम्नैव चेयम् टीका रामाश्रमीति कथ्यते। १६४९ ईशवीयाब्दीया पाण्डुलिपिरेकाऽस्या टीकाया मिलति। अस्याः पुष्पिकाया अध्ययनेन ज्ञातं भवति यद् बघेलवंशोद्भव-महीधर विषयाधिपति-(मईहर) महाराज-कुमार—कीर्तिसिंहस्याज्ञया अस्याष्टीकाया निर्माणमकरोत् भानुदीक्षितः। अत्र डा० गोडे महाभागष्टीकयति :—"कीर्तिसिंहस्य मूलनाम फतेहसिंह आसीत्। अयं स्वपितुः—अमरसिंहस्य (१६२४–१६६० ई.) शासनकाल एव रीवातः पृथक् भूत्वा महीधरस्य (मईहर) शासकोऽभूत् (1)। अस्य

(1) Dr. Gode-Studies in Indian Literary History, Vol. III Puna 1956 P. 25-34.

कीर्तिसिंहस्य फतेह सिंहस्य वा कालः १७ सप्तदशशतकोऽस्ति । अनुमानतः १६३०-१६७० । रामाश्रमस्य शिष्यो वत्सराजः १६९८ विक्रमाब्दे १६४१ ईशवीयाब्दे "वाराणसीदर्पण प्रकाशिका" नामकग्रन्थं लिलेख । अस्याध्ययनेन स्पष्टं भवति यद् भानुदीक्षितः १६४१ ईशवीयाब्दात् पूर्वमेव सन्यासाश्रमम् स्वीचकार (1)। व्याख्यासुधाम् चासौ गृहस्थाश्रम एव लिखितवान्। भट्टोजिदीक्षितस्य समयः १५६० १६२० ईशवीयाब्दाः निर्धारयितुं शक्यन्ते। अतो भानुदीक्षितस्य कालः १६००-१५० ईशवीयाब्दाः स्वीकर्तुं शक्यन्ते ।

इयं व्याख्यापि विद्वत्तापूर्णा । विशेषतोऽत्र व्याकरणशास्त्रानुसारित्वमवलोक्यते । यथा मङ्गलाचरणेनैव प्रतीयते (2) । भानुदीक्षितस्य व्याख्यासुधायां निम्नाङ्किता विद्वांसो ग्रन्थाश्च समुद्धृता :—

अजयः १, अभिनन्दः २, अमरदत्तः ३, अमरमाला ४, अनेकार्थः ५, अनेकार्थमञ्जरी ६, अरुणः ७, अश्वशास्त्रम् ८, आकरः ९, आगमः १०, आत्रेयसंहिताः ११, आपिशलिः १२, आर्षकोषः १३, इन्दुः १४, उज्ज्वलदत्तः १५, उणादिसूत्रम् १६, उत्पलिनी १७, उपाध्यायः १८, उष्मविवेकः १९ एकाक्षरः २०, कलिङ्गः २१ कात्यः २२, कात्यायनः २३ कामन्दकीयम् २४ काशिका २५, केशरमाला २६, केशवः २७, क्षीरस्वामी २८, गणितावली २९, गीता ३०, गोवर्धनानन्दः ३१, गौड ३२, चन्द्रः ३३, चन्द्रगोमी ३४, चन्द्रनन्दनः ३५, चाणक्यः ३६, तारपालः ३७, तैत्तरीयब्राह्मणम् ३८, त्रिकाण्डशेषः ३९, दामोदरः ४०, दुर्गः ४१ देशीकोशः ४२, द्विरूपकोशः ४३, धनञ्जयः ४४, धनपालः ४५, धन्वन्तरिः ४६, धरणिः ४७, धर्मदासः ४८, धातुपारायणम् ४९, नरसिंहः ५०, नाटकरत्नकोषः ५१, नानार्थ रत्नमाला ५२, नामनिधानम् ५३, नामप्रपञ्चः ५४, नाममाला ५५, नामलिङ्गानुशासनम् ५६, नामानुशासनम् ५७, नारदः ५८, निगमः ५९, निघण्टुः ६०, निरुक्तम् ६१, पुरुषोत्तमः ६२, पूर्णचन्द्रः, ६३, बृहदमरः ६४, बृहद्हारावली ६५ बोपदेवः ६६, ब्रह्म वैवर्तम् ६७, भट्टः ६८, भट्टिः ६९, भट्टो जिदीक्षितः ७० भरतः ७१, भागवतम् ७२, भागुरिः ७३, भारतम् ७४, भारविः ७५ भाषावृत्तिः ७६, भाष्यम्, ७७, भोजः ७८, मनुः ७९, मनोरमा ८०, मनोरमामण्डनम्

(1) भट्टोजिदीक्षितं नत्वा रामाश्रमगुरुं पुनः ।
वत्सराजः करोत्येतां काशीदर्पणकाशिकाम् ।।
— वाराणसीदर्पणप्रकाशः

(2) बल्लवी बल्लभं नत्वा गुरुं भट्टोजिदीक्षितम् ।
अमरे विदधे व्याख्यां मुनित्रयमतानुगाम् ।। अ. व्या. पृ. १ ।

८१, मन्त्रः ८२, माघः ८३, माधवः ८४, माधवी ८५, माधवीयवृत्तिः ८६, मार्कण्डेयः ८७, माला ८८, मालाकारः ८९, मुकुटः ९०, मेदिनी ९१, मैत्रेयः ९२, याज्ञवल्क्यः ९३, रक्षितः ९४, रत्नकोषः ९५, रत्नमतिः ९६, रत्नमाला ९७, रन्तिदेवः ९८, रभसः ९९, राजदेवः १००, राजशेखरः १०१, रुद्रकोषः १०२, रूपरत्नाकरः १०३, लिङ्गानुशासनम् १०४, वररुचिः १०५, वर्णदेशनः १०६, वाचस्पति १०७, वामनः १०८, वामनलिङ्गानुशासनम् १०९, वायुपुराणम् ११०, वार्तिकः १११, विक्रमादित्यः ११२, विन्ध्यवासी ११३, विश्वः ११४, विष्णुपुराणम् ११५, वृत्तिः ११६, वैद्यकम् ११७, वोपालितः ११८, व्याड़िः ११९, व्यासः १२०, शब्दार्णवः १२१, शभेदः १२२, शाकटायनः १२३, शाब्दिकः १२४, शालिहोत्रम् १२५, शाश्वतः २२६, शुभाङ्कः १२७, श्रुतिः १२८, संसारावर्तः १२९, सम्याः १३०, सर्वधरः १३१, सर्वानन्दः १३२, साम्बपुराणम् १३३, सारस्वतकोशः १३४, साहसाङ्कः १३५, सुभूतिः १३६, सुश्रुतम् १३७, सूतसंहिता १३८, सूत्रकारः १३९, सूदशास्त्रम् १४०, सोमनन्दो १४१, स्मृतिः १४२, स्वामी १४३, हट्टचन्द्रः १४४, हरदत्तः १४५, हलायुधः १४६, हारावली १४७, हेमचन्द्रः ।

अस्याः सूच्याः समवलोकनेन स्पष्टं प्रतीयते यत् कियता परिश्रमेण विनिर्मितेयं टीका ।

७. भरतमल्लिकः

वङ्गदेशीयो हि गौरांगमल्लिकस्य पुत्रो भरतमल्लिको भरतसेनो वा अमरकोशोपरि टीकामरचयत् । इयं टीका सुविस्तृता सुविस्तृतनिर्देशग्रन्थमण्डिता च बिराजते । अस्यां शब्दानां विभिन्नरूपप्रदर्शनमपि कारितम् । अत्र शब्दानां व्युत्पत्ति वोपदेवस्य व्याकरणानुसारम् विहिता । वोपदेवः "कविकल्पद्रुमम् १६३९ ईशव्यां व्यरचयत् । अस्य टीकां दुर्गादासो ऽकरोत् । स हि भरतस्य टीकायां बहुबार चर्चां कृतवान् । परिणामतः भरतस्य समयः सप्तदश–(१७) ईशवीयशतकात् पूर्वमेव निर्धारितो भवति ।

८. श्री तिरुवेंकटाचार्यस्य बालप्रबोधिका-

अमरकोशस्यान्ध्र भाषया विलिखिता टीकेयम् बालप्रबोधिका । अस्या लेखकस्तिरुवेंकटाचार्यः । अयम् बालप्रबोधिकाया समारम्भ एव स्वस्थान-जन्मादिविषये समुल्लिखति :–

आसीदासेतु नीहार गिरिविख्यातनामवान्,
बाल्लपाकान्नामाचार्यो वेङ्कटेश-वराञ्चितः ॥
ततोऽभवत्तिरुमलगुरुर्गुरु — समानधीः ।
भारद्वाजान्वयपयः पारावारकलानिधिः ॥

तस्मादभून्नन्दवर वरहारि हरिन्मणिः ।
दीक्षितश्चिन तिम्माख्यो मुक्ताच्छत्रद्वयाङ्कितः ॥
तदात्मजन्मा तिरुवेङ्कटाख्यः ।
ऋग्वेदसज्यो विबुधैकवन्द्यः ॥
सोऽहं जनानामतिबुद्धिदं प्रियम् ॥
बालप्रबोधाख्यामिदं करोमि ॥
आलोक्यदीक्षितीयादिटीकाम् बालप्रबोधिकाम् ।
टीकाममरसिंहस्य रचयत्यान्ध्रभाषया ॥

इयं टीका आन्ध्रभाषाविज्ञानां कृते विशेषतश्च बालकानामान्ध्र वास्तव्यानां कृते परमोपयोगिनी सहायिका च विद्यते । ———

९. श्रीनिवास यज्वनो बालबोधिनी

श्री निवासयज्वा बालबोधिनीं टीकाममरकोशस्य विरचयामास । परमियं प्रायेण खण्डिता समुपलभ्यते । अस्या पाण्डुलिपिर्हि ग्रन्थलिप्यामथ च तमिलाक्षरेषु मिलति ।

सुस्पष्टमिदं यदयं दक्षिणभारतीयो ब्राह्मणः आसीत् । अन्यत्—विशिष्टमस्य विषये न किमपि ज्ञातम् भवति । इदञ्चापि नास्ति तिरोहितम् यदियं टीका बालकानां कृते विशेषतो लाभप्रदा स्यात् । तच्चेदमस्या नाम्नैव ज्ञायते । अस्या प्रारम्भिकमिदमित्थमस्ति—

वन्दे रामाम्बुदं श्यामं वैदेही– तडिदुज्ज्वलम् ।
यो राक्षसदवं दीप्तं शरवर्षैरशीशमत् ॥
क्रियते श्रीनिवासेन यज्वना बालबोधिनी ।
टीका ह्यमरकोशस्य सम्यगागस्त्य (1) भाषया ॥

मङ्गलाचरणश्लोक द्वारा स्वयमेव स्पष्टं भवति यदेषा बालबोधिनी–नाम व्याख्या अमरकोशस्य श्रीनिवासयज्वना दाक्षिण्यां भाषायां तमिलाक्षरेषु विनिर्मिता । अस्या पाण्डुलिपिरेव प्राप्यते न चान्यत् किमपि विशेषतोऽत्र ज्ञायते ।

१०. महेश्वरस्य परमविवेकः

एवमेवापरा ऽमरस्य व्याख्यैका महेश्वरविरचिताऽपि प्राप्यते । परमियमपि प्रायः खण्डिता एव । अस्या व्याख्याया नाम "परमविवेकः" इ त द्ध

---

(1) आगस्त्य भाषा-दक्षिणीभाषा पृ. १७६, संस्कृतशब्दार्थ कौस्तुमः।

पुष्पिकाऽनेन प्रकारेण वर्तते:—"श्रीमत्परमविवेके महेश्वरेण विरचित एवा भूम्यादि-द्वितीयकांण्ड: समाप्तिमगमच्छुभं भवतु ।" अनया पुष्पिकया स्पष्टत: सिद्ध्यति यदयं महेश्वरोऽपि—अमरस्य परमविवेकनामिकां व्याख्यां लिलेख।

११. लिङ्गयसूरेः पदविवृतिः

लिङ्गयसूरिर्हि तेलुगु—ब्राह्मणोऽभूत् । अयम् १८ (ए.डी.) शतकस्य विद्यते। अनेनामरकोशस्य "पदविवृतिः नामिका व्याख्या कृता। इयमस्य पदविवृतिर्दक्षिण-भारते परमप्रसिद्धा ।

अस्य पितुर्नाम वेंकलंकामयभट्टोपाध्यायः आसीत् । तदिदं सर्वम् निम्नाङ्कित-पुष्पिकया सिद्ध्यति । यथा—"इति वेकल कामय भट्टोपाध्यायसूनु लिङ्गयसूरि-विरचितायाममरकोशपदविवृतौ लिङ्गादिसङ्ग्रहवर्गोक्तलिङ्गविवेचनम् समाप्तम् ।"

अयं लिङ्गय सूरिः क्षीरस्वाम्यादिटीका कृद्भ्यः अर्वाचीनो वर्तत । तदिदञ्च मङ्गलाचरणश्लोकैः संसिद्ध्यति । यथा—

"शिवं गुरुं विधातारं तत्पत्नीम् तत्सुतांश्च वै ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥
पदवाक्यप्रमाणज्ञ क्षीरस्वाम्यादिसूरिभिः ।
कृतान् ग्रन्थान् समालोच्य बालानां सुखवृद्धये ॥
यत्कृतं सूरिसिंहेन नामलिङ्गानुशासनम् ।
तत्रस्थायाः पदावल्या विवृतिर्वक्ष्यते मया ॥

श्रीलिङ्गयसूरिकृताया अस्याष्टीकायाः– तेलुगुलिप्यामथ च ग्रन्थलिप्यामपि संस्करणानि मिलन्ति ।

१२. रामकृष्णदीक्षितस्य-अमरपीयूषम्

अयम् श्रीरामकृष्णदीक्षितोऽपि—अमरकोशस्य अमरपीयूषनामिकाम् टीकाम् चकार। इयं टीका खण्डित-प्राया पाण्डुलिपिरूपेणैव प्राप्ता भवति। केवलमस्य पुष्पिकया सर्वमिदम् सुसिद्धम् भवति यदयम् अमर-पीयूषम् निर्मितवान् । तद्यथा—

"इति श्री रामकृष्णदीक्षितीये अमरपीयूषे प्रथमः काण्डः समाप्तः ।

१३ विठ्ठलस्य लोकभाषाया व्याख्या

विठ्ठलनामा कश्चिद्—विद्वान्—दाक्षिणात्य-लोकभाषायाम्— अमरकोशस्य व्याख्याम्—विनिर्मितवान् । यथास्य मङ्गलाचरणश्लोकाभ्याम् स्वयमेव सुस्पष्ट भवति—

'दन्तकान्ति—शलाकाभिः पाणिपृष्ठगतः सुतः ।
पञ्जरस्थ इवाभाति यस्यास्तां नौमि भारतीम् ॥
श्रीमान् विठ्ठलनामाहम् नामलिङ्गानुशासनम् ।
व्याचक्षे निपुणम् लोकप्रीतये लोकभाषया ॥
इयं व्याख्या जनसाधारणस्य कृते विहिताऽभूत् ।

१४ श्रीवेंकटेशस्यम-रपञ्चिका

अमरकोशस्येयमन्या व्याख्या श्रीवेंकटेशनिर्मिताऽवाप्यते । अस्याः व्याख्यायाः पाण्डुलिपिः—ग्रन्थलिप्यामथच तमिललिप्यामवाप्यते । इयमस्य कोशस्य व्याख्या बालानां कृते विनिर्मिताऽभूत् । मङ्गलाचरणश्लोकाभ्यामिदम्—सिद्धम् भवति । यथा—

"इभवक्त्रम् त्रिणयनम् गौरीपुत्रम् नमाम्यहम् ।
लम्बोदरम् शूर्पकर्णं गणानामीश्वरं वरम् ॥
श्रीशैलवेंकटेशानावानम्य शिवकेशवौ ।
बालकानन्दजननीम् करोम्यमरपञ्चिकाम् ॥

अस्याम् व्याख्यायां प्रत्येकस्य श्लोकस्यार्थंस्तमिलभाषायां प्रदत्तोऽस्ति ।

१५. अमरस्यान्यटीकासु—एताः सुप्रसिद्धाः—

नारायणशर्मणः "अमरकोश पञ्जिका", अथवा पदार्थकौमुदी । अस्या रचनाकालः १६१९ ईशवीयाब्दः ।

१६. रमानाथ विद्यावाचस्पतेः त्रिकाण्डविवेकः । अस्य रचनाकालः १६२३ ईशवीयाब्दः ।

१७. मथुरेश विद्यालङ्कारस्य सारसुन्दरी टीका । अस्या रचनाकालोऽपि १६६६ ।

१८. अच्युतोपाध्यायस्य व्याख्या प्रदीपः ।

१९. रघुनाथचक्रवर्तिनः त्रिकाण्डचिन्तामणिः ।

२०. कलिकातातः प्रकाशिता । स्वयं प्रकाशशिष्यवेदान्तिमहादेव-विरचिता बुधमनोहरा ।

२१. परमानन्दमथिलकृता मुकुटसारभूता अमरचन्द्रिका ।

नामलिङ्गानुचासनम् :- (स. म. पु.)

संस्कृत कोशवाङ्मय रत्नभूतमिदं नामलिङ्गानुशासनमिति सर्वथा विश्चप्रचम्। अस्य पाण्डुलिपि: कर्गजोपरि $9\frac{1}{4}\times4\frac{3}{4}$ आकारे ७० पत्रकेषु परिपूर्णा देवनागर्यां मिलति। अस्य विश्वविख्यातकोशस्य लेखक :—अमरसिंह: :

अस्यारम्भ श्लोक:—

यस्य ज्ञानदयासिन्धोरगाधस्यानधा गुणाः ।
सेव्यतामक्षयो धीराः स श्रियै चामृताय च ।।

समाप्तिश्लोक :—

षट्संज्ञिकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषन्तु ज्ञेयं शिष्ट-प्रयोगतः ।।

:-

इति लिङ्गसङ्ग्रहवर्गः ।
इत्यमरसिंहकृतौ नाम लिङ्गानुशासने ।
शब्दादित्रयकाण्डेदं साङ्ग एव समर्थितः ।।

विषय:

अमरकोश: १-३ काण्डा: ।
समापकस्यान्ते निम्नपङ्क्तयः सन्ति ।
कण्ठे बहन्तु कवयोऽमरसिंह नाम ।।
लिङ्गानुशासनविभूषणमार्यंबार्यम् ।
रम्यं सुवर्ण - सुगुणं ...... सुवृत्तम् ।।
श्री मीनाक्षी सौन्दरेश्वराय नमः ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।।

———

नामलिङ्गानुशासनस्य स. म. पु. प्राच्यपाण्डुलिपिविवरणं संक्षेपत :-

संख्या	संग्रह सं.	द्रव्यः	आकारः	पत्र सं.	प्र. पृ. प.स	लिपिः	पूर्णापूर्णविवरणम्
१	भज. ५४६६	कर्गजः	१०×३$\frac{3}{4}$	४८	१२ अथवा १३	नागरी	परिपूर्णः १-३ काण्डाः ।
२	बल ५४ ७	कर्गजः	६$\frac{1}{2}$×५$\frac{3}{8}$	७६	१४	,,	परिपूर्णः १-३ काण्डाः
३	,, ५४७१	,,	१२×६	८४	११	,,	,,
४	,, ५४७२	,,	१४×६	५७	१०	,,	,,
५	,, १०३२८	ताडपत्रम्	१७$\frac{1}{2}$×१$\frac{1}{2}$	७५	१०	तेलुगुः	,,
६	,, १०३२९	,,	१६×१$\frac{1}{4}$	७९	६	,,	,,
७	,, १०३३०	,,	१५$\frac{1}{2}$×१$\frac{1}{4}$	३७	४	,,	,,
८	,, १०३३१	,,	१६$\frac{1}{4}$×१$\frac{1}{4}$	११५	५	ग्रन्थः	,,
९	,, १०३३२	,,	१५$\frac{1}{2}$×१$\frac{1}{4}$	८८	६	,,	,,
१०	,, १०३३३	,,	११$\frac{1}{4}$×१$\frac{1}{8}$	११७	६	,,	,,
११	,, १०३३४	,,	१६×१$\frac{1}{2}$	७०	७	,,	,,
१२	,, १०३३५	,,	१८$\frac{1}{2}$×१$\frac{1}{2}$	५८	६-७	,,	,,
१३	,, १०३३६	,,	१३$\frac{1}{2}$×१	१४९	५	,,	,,
१४	,, १०३३७	,,	१६$\frac{1}{4}$×१$\frac{1}{4}$	८१	४	तेलुगुः	मध्ये भाग एक लुप्तोऽस्ति ।
१५	,, १०३३८	,,	१८$\frac{1}{4}$×१$\frac{1}{4}$	७२	५	ग्रन्थः	अन्तिम भागोऽस्ति लुप्तः ।
१६	,, १०३५९	,,	१६$\frac{1}{2}$×१$\frac{1}{8}$	१०६	४	तेलुगुः	द्वितीय तृतीय काण्डावेव ।
१७	,, ५४७३	कर्गजः	९$\frac{1}{2}$×४$\frac{1}{2}$	४१	११	नागरी	खण्डितः ।
१८	,, ५४७४	,,	१०$\frac{1}{2}$×४	२२	८-१०	,,	,,
१९	,, १०३४३	ताड़पत्रम्	१७$\frac{1}{2}$×१$\frac{1}{8}$	३३	४	ग्रन्थः	,,
२०	,, १०३६५	,,	१६×१$\frac{1}{4}$	२६	९	,,	,,

संख्या	संग्रह सं.	द्रव्यः	आकारे	पत्र सं.	प्र. पृ, पं. सं.	लिपिः	पूर्णापूर्णं	विवरणम्
२१	,, ५४७५	कर्गज	९$\frac{1}{4}$×४	३३	६-७	नागरी	,,	केवलं प्रथमकाण्डः
२२	,, ५४७६	,,	१०×३$\frac{3}{4}$	१९	७-११	,,	,,	,,
२३	,, ५४७७	,,	१०$\frac{1}{2}$×४$\frac{1}{2}$	२०	८-११	,,	,,	,,
२४	,, ५४७८	,,	५$\frac{1}{2}$×४$\frac{1}{2}$	३०	१२	,,	,,	,,
२५	,, ५४७९	,,	१०$\frac{1}{2}$×३$\frac{1}{4}$	२१	७-८	,,	,,	,,
२६	,, ५४८०	,,	९$\frac{1}{4}$×४$\frac{1}{4}$	१५	१०-११	,,	,,	,,
२७	,, ५४८१	,,	१२$\frac{3}{4}$×६$\frac{3}{4}$	१५	११	,,	,,	,,
२८	,, ५४८३	,,	१४×६	१४	८/९	,,	,,	,,
२९	,, ५४८४	,,	१३$\frac{1}{4}$×६$\frac{1}{4}$	१२	१२/१३	,,	,,	,,
३०	,, १०३३९	ताड़पत्रम	११$\frac{3}{4}$×१$\frac{1}{8}$	४३	३	तेलुगुः	,,	,,
३१	,, १०३४०	,,	१२$\frac{7}{8}$×१$\frac{1}{4}$	२३	४	,,	,,	,,
३२	,, १०३४१	,,	११$\frac{1}{2}$×१$\frac{1}{4}$	४४	४-५	ग्रन्थः	,,	,,
३४	,, १०३४२	,,	१०$\frac{1}{2}$×१$\frac{1}{8}$	३९	५	,,	,,	,,
३५	,, १०३४४	,,	१५×१	३०	४	,,	,,	,,
३६	,, १०३४५	,,	१२$\frac{1}{2}$×१$\frac{1}{8}$	३३	४	,,	,,	,,
३७	,, १०३४६	,,	१६$\frac{1}{2}$×१	२७	५	,,	,,	,,
३८	,, १०३४७	,,	१८$\frac{1}{2}$×१$\frac{1}{4}$	२७	४	,,	,,	,,
३९	,, १०३४८	,,	१४×१$\frac{1}{8}$	१३	८	,,	,,	,,
४०	,, १०३४९	,,	१६$\frac{1}{2}$×१$\frac{1}{4}$	१४	७.८	,,	,,	,,
४१	,, १०३५०	,,	१२×१$\frac{1}{2}$	१६	७.८	,,	,,	,,
४२	,, १०३५२	,,	१८$\frac{1}{2}$×१$\frac{1}{4}$	१३	६	तेलुगुः	,,	,,
४३	,, १०३५४	,,	१६×१$\frac{1}{2}$	२४	५	ग्रन्थः	,,	,,
४४	से.का. २७८	कर्गजः	१०×३$\frac{3}{4}$	२९	७	नागरी	,,	,,

सख्या	संग्रह सं.	द्रव्यः	आकारः	पत्र सं.	प्र. पृ, प. सं.	लिपिः	पूर्णापूर्णविवरणम्
४५	पु.ग्र.सं. १५४२१	ताड़पत्रम्	१६$\frac{7}{8}$×१$\frac{1}{4}$	३०	५-६	तेलुगुः	,, ,,
४६	म.ल. ५५११	कर्गजः	९$\frac{3}{4}$×४	१६	८	नागरी	खण्डितः
४७	,, ५५१०	,,	८$\frac{1}{8}$×४$\frac{1}{4}$	१८	९-१०	,,	,,
४८	,, ५५०४	,,	९$\frac{3}{4}$×४$\frac{1}{4}$	२९	६	,,	,,
४९	,, १०३५५	ताड़पत्रम्	१४$\frac{1}{2}$×१$\frac{1}{4}$	२६	६	ग्रन्थः	,,
५०	,, पु.ग्र.सं. १४६९६	कर्गजः	१०×४	१६	७-८	नागरी	,,
५१	भ.ल. ५५०८	,,	८$\frac{3}{0}$×५$\frac{1}{2}$	१५	१०	,,	,,
५२	पु.ग्र.स. १५४४७	ताड़पत्रम्	१४$\frac{7}{8}$×१$\frac{1}{4}$	२६	५	ग्रन्थः	,,
५३	भ. ल. ५५०६	कर्गजः	९$\frac{1}{2}$×३$\frac{3}{4}$	१०	११	,,	,,
५४	ज. भ. ६९२	कर्गजः	९$\frac{1}{4}$×४$\frac{1}{4}$	१;	८	देवनागरी	खण्डितः
५५	ब. ल. ५५०५	,,	९$\frac{1}{2}$×४$\frac{1}{4}$	२३	८	,,	,,
५६	,, १०३५१	ताड़पत्रम्	१७×१$\frac{1}{2}$	१६	४	तेलुगुः	,,
५७	,, १०३५८	,,	११$\frac{1}{2}$× $\frac{1}{4}$	१८	७	ग्रन्थ	,,
५८	,, ५५१३	कर्गजः	१०×४$\frac{1}{4}$	१६	५-८	नागरी	,,
५९	,, ५४८२	,,	१४×६	८	९	,,	,,
६०	,, ५५१२	,,	१ ×४	१५	८	,,	,,
६१	,, १०३५७	ताड़पत्रम्	१३$\frac{1}{2}$×१$\frac{1}{4}$	१३	६	ग्रन्थः	,,
६२	,, ५५०७	कर्गजः	७$\frac{1}{4}$×४$\frac{1}{4}$	११	१०-११	नागरी	,,
६३	,, १०३५६	ताड़पत्रम्	१५$\frac{1}{2}$×१$\frac{1}{8}$	२१	४	ग्रन्थः	,,
६४	,, ५५०९	कर्गजः	७$\frac{1}{4}$×४$\frac{1}{8}$	१५	७	नागरी	,,
६५	,, १०३५३	ताड़पत्रम्	१७×१	७	४	तेलुगुः	,,
६६	,, ५५१५	कर्गजः	९$\frac{3}{4}$×४$\frac{1}{2}$	१४	५-६	नागरी	,,
६७	,, ५५१४	,,	१०$\frac{1}{4}$×५	१०	८	,,	,,
६८	,, ५४८५	,,	७$\frac{1}{2}$×५$\frac{1}{4}$	८१	८-११	,,	काण्डद्वयम्

संख्या	संग्रह सं.	द्रव्यः	आकारः	पत्र सं.	प्र. पृ. प. सं.	लिपिः	पूर्णापूर्णविवरणम्
६९	,, ५४८६	,,	७$\frac{7}{8}$×४$\frac{3}{4}$	५८	१०	,,	काण्डद्वयम्
७०	,, ५४८७	,,	६$\frac{3}{4}$×४$\frac{3}{4}$	५८	९	,,	,,
७१	,, ५४८८	,,	६$\frac{1}{8}$×३$\frac{1}{2}$	११७	६-७	,,	,,
७२	,, ५४८९	,,	६$\frac{1}{2}$×४$\frac{1}{8}$	५२	८	,,	,,
७३	,, ५४९०	,,	१०×४$\frac{1}{8}$	५८	८-९	,,	,,
७४	,, ५४९१	,,	१०$\frac{1}{4}$×३$\frac{7}{8}$	४६	७-८	,,	,,
७५	,, ५४-९२	,,	१०$\frac{1}{2}$×३$\frac{3}{4}$	८८	६	,,	,,
७६	,, ५४९३	,,	१०$\frac{3}{4}$×४$\frac{1}{2}$	२६	१२-१४	,,	,,
७७	,, ५४९४	,,	१८$\frac{1}{8}$×६	२८	१४-१६	,,	,,
७८	,, १०३६०	ताड़पत्रम्	१८$\frac{1}{2}$×१$\frac{1}{2}$	४७	५	तेलुगुः	,,
७९	,, १०३६१	,,	१५$\frac{1}{2}$×१$\frac{1}{8}$	८५	३-४	,,	,,
८०	,, १०३६२	,,	१४$\frac{3}{4}$×१$\frac{1}{4}$	७२	५	ग्रन्थः	,,
८१	,, १०३६३	,,	१६$\frac{3}{4}$×१	६२	५	,,	,,
८२	ब. ल. १०३६४	ताड़पत्रम्	१३×१$\frac{1}{4}$	७२	९	ग्रन्थः	काण्डद्वयम्
८३	,, १०३६७	,,	१५$\frac{1}{2}$×१$\frac{1}{4}$	४५	५	तेलुगुः	,,
८४	,, १०३७१	,,	१४×१$\frac{1}{4}$	५४	६	ग्रन्थः	,,
८५	,, १०३७८	,,	१२$\frac{1}{2}$×१$\frac{1}{2}$	१२	१२	,,	,,
८६	त्या. स्व. ७३८	कगंजः	९$\frac{3}{4}$×४$\frac{1}{4}$	६४	८	नागरी	,,
८७	ब. ल. १०३६८	ताड़पत्रम्	१३$\frac{1}{2}$×१	७९	४	तेलुगुः	काण्डद्वयादधिकः
८८	व. ल. ५५१६	कगंजः	९$\frac{3}{4}$×४	४४	७.८	नागरी	,,
८९	पु.ग्र.सं. १५५४१	,,	१०$\frac{7}{8}$×४$\frac{5}{8}$	६७	६	,,	,, डा. बर्नेलोऽपि पाण्डुलिपिमेनां नैव ज्ञातवान् ।
९०	ब.ल. ५५२०	,,	८$\frac{1}{4}$×४$\frac{1}{4}$	२१	११	,,	काण्डद्वयःदधिकः

संख्या	संग्रह सं.	द्रव्यः	आकारः	पत्र सं.	प्र. पृ. पं. सं.	लिपिः	पूर्णापूर्णविवरणम्
९१ ,,	१०३७५	ताड़पत्रम्	$१७\times१\frac{1}{2}$	३०	६	ग्रन्थः	काण्डद्वयादधिकः
९२ ,,	१०३७६	,,	$१०\frac{3}{4}\times१\frac{1}{8}$	४०	५	,,	,,
९३ ,,	१०३७३	,,	१५×१	५६	४	,,	,,
९४ ,,	१०३७२	,,	$१८\times१\frac{1}{4}$	४७	५	,,	,,
९५ ,,	१०३७४	,,	$१८\frac{1}{2}\times१\frac{1}{2}$	३५	७	,,	,,
९६ ,,	१०३७९	,,	$१४\times१\frac{1}{4}$	२५	९	,,	,, तमिल भाषायामपि यत्र तत्र टिप्पणिर्मिलति
९७ ,,	१०३७७	,,	$१६\frac{1}{2}\times१\frac{1}{4}$	२२	५	,,	खण्डितः काण्डद्वयादधिकः
९८ ,,	५५१७	कर्गजः	$१९\frac{1}{4}\times४$	१४	७-९	नागरी	,, ,,
९९ ,,	५५१८	,,	$८\times४\frac{3}{4}$	१८	७	,,	,, ,,
१०० त्या. स्वा.	७४१	,,	$१०\frac{3}{4}\times३\frac{1}{2}$	८	८	,,	,, ,,
१०१ ब.ल.	५५१९	,,	$८\frac{1}{2}\times४\frac{3}{4}$	१०	६	,,	,, ,,
१०२ ज. म.	६९३	,,	$९\frac{1}{4}\times४\frac{1}{4}$	१५	१०	,,	,, ,,
१०३ ब.ल.	१०३७०	ताड़पत्रम्	$१२\times१\frac{1}{4}$	१०	३	तेलुगुः	,, ,,
१०४ ,,	५५२१	कर्गजः	$९\times४\frac{1}{2}$	४३	८	नागरी	,, ,,
१०५ ,,	५५२२	,,	$१०\frac{3}{4}\times२\frac{3}{4}$	७१	६	,,	,, ,,
१०६ ज,म.	६९४	,,	$९\frac{1}{4}\times४$	५७	७	,,	,, ,,
१०७ त्या.स्वा.	७४३	,,	$९\frac{1}{2}\times४\frac{1}{2}$	२२	८	,,	,, ,,
१०८ ब.ल.	१०३६९	ताड़पत्रम्	$१८\times१\frac{1}{2}$	१५	८	तेलुगुः	,, ,,
१०९ त्या. स्वा.	७४२	कर्गजः	$९\times४\frac{1}{2}$	६०	७-८	नागरी	,, ,,
११० ब.ल.	१०३६६	,,	$११\frac{1}{2}\times१\frac{1}{4}$	३६	६-७	,,	,,
१११ ,,	५४९५	,,	$९\frac{1}{8}\times३\frac{7}{8}$	६६	,,	,,	काण्डत्रयम्
११२ ,,	५४९६	,,	$९\frac{1}{2}\times४\frac{1}{4}$	३५	८	,,	,,

संख्या	संग्रह सं.	द्रव्यः	आकारे	पत्र सं.	प्र. पृ, पं. सं.	लिपिः	पूर्णापूर्णविवरणम्
११३	ब.ल. ५४९७	,,	१०$\frac{1}{8}$×४$\frac{1}{2}$	३१	९	,,	,,
११४	,, ५४९८	,,	९$\frac{7}{8}$×४	२७	८	,,	,,
११५	,, ५४९९	,,	८×४$\frac{1}{4}$	४८	८	,,	,,
११६	,, ५५००	,,	८×४$\frac{3}{8}$	४९	९	,,	,,
११७	,, ५५०१	,,	७$\frac{3}{4}$×५$\frac{1}{4}$	५८	९-१०	,,	,,
११८	,, ५५०२	,,	१०-$\frac{7}{8}$×४$\frac{5}{8}$	७१	६	,,	,,
११९	त्या. स्वा. ७४४	,,	१०$\frac{1}{2}$×५	३०	१०-११	,,	,,
१२०	ब.ल. ५५०३	,,	९$\frac{1}{2}$×४	२२	९	,,	,,
१२१	त्या. स्वा. ७४६	,,	१०×३$\frac{3}{8}$	३८	८	,,	,,
१२२	,, ७४२	,,	९$\frac{3}{4}$×४	३३	७-९	,,	,,
१२३	ब.ल. ५५२५	,,	१०×४	१८	८	,,	,,
१२४	ज. भ. ६९५	,,	८$\frac{3}{4}$×३	४९	६	,,	,,
१२५	,, ६९६	,,	८ ३	११	७-८	,,	अन्तिम भागो नास्ति ।
१२६	ब.ल. १०३८१	ताड़पत्रम्	१६×१$\frac{1}{4}$	२०	७	ग्रन्थः	,,
१२७	,, १०३८२	,,	११$\frac{3}{4}$×१$\frac{1}{4}$	५६	५	,,	,,
१२८	,, १०३८३	,,	१४×१$\frac{1}{8}$	३६	६	,,	,,
१२९	प. अ. ३६९	कर्गजः	९×४	४४	७	नागरी	प्रारम्भिक भागो ऽपेक्ष्यते ।
१३०	ब.ल. १०३८४	ताड़पत्रम्	१४×१$\frac{3}{4}$	३४	७	,,	,,
१३१	पु.ग्र.सं. १५५४२	कर्गजः	९$\frac{1}{2}$×४$\frac{1}{8}$	२९	८	,,	खण्डितः । डा, बर्नल सग्रहे नास्ति ।
१३२	ब.ल. १०३८८	ताड़पत्रम्	१४$\frac{1}{2}$×$\frac{7}{8}$	१२०	४	ग्रन्थः	खण्डितः
१३३	,, १०३८९	,,	१३×१$\frac{1}{2}$	२९	६	,,	,,
१३४	,, १०३८०	,,	१७$\frac{1}{2}$×१	४८	३	तेलुगु:	,,
१३५	,, १०३८५	,,	११$\frac{3}{4}$×१$\frac{1}{4}$	·०	७	,,	,,
१३६	,, १०३८६	,,	१६$\frac{1}{2}$×१	१२	५-६	,,	,,
१३७	,, १०३९०	,,	१५×१	२०	,,	ग्रन्थः	,,
१३८	ज.भ. ६९७	कर्गजः	८×६$\frac{1}{2}$	१०	१७-१८	नागरी	खण्डितः
१३९	ब.ल. ५५२३	,,	१०$\frac{1}{4}$×१	१६	६-८	,,	,,
१४०	,, १०३८७	ताड़पत्रम्	१३ १	८	४	तेलुगु:	,,
१४१	,, ५५२४	कर्गजः	८ ४	२०	१०	नागरी	,,
१४२	,, ५५२६	,,	८$\frac{1}{2}$×४	१७	८	,,	,,

नाम लिङ्गानुशासनस्य विभिन्नपाण्डुलिपिषु भेदादिविवरणम् ।

सं. १ :—

अस्या आवरणपृष्ठे ' राजे श्रीपतिराये लिखितमस्ति ।

सं २ :—

अस्यां पाण्डुलिप्यां समापकानन्तरमधस्तनश्लोकाः सन्ति :—

"इत्युक्तं व्यवहारार्थं नामलिङ्गानुशासनम् ।
शब्दानां न गतावन्तं तावपीन्द्रबृहस्पती ॥
पद्मानि वोधयत्यर्कः काव्यानि कुरुते कविः ।
तत्सौरभं रमत्वन्तः सन्तस्तन्वन्तु तद्गुणम् ॥
यावच्चन्द्रदिवाकरौ गृहपती क्षोणी समुद्रा अपि ।
यावद् व्योमवितानसन्निभतया दिक्चक्रमाक्रामति ।
यावददेहनिवासिनी पशुपतेर्गौरी मुखं चुम्बति ।
तावतिष्ठतु कोश एष सुधियां कण्ठेषु रत्नोज्वलः ॥
नाना कवीनां यदि नामकोशाः ।
सन्त्येव शब्दार्थविदां प्रबन्धाः ॥
तथापि सूक्तेऽमरसिंहनाम्ना ।
कवेरतीरं प्रसृतं मनो मे ॥
श्री रङ्गसहजबोधपादुकां पूजयामि नमः ॥

सं. ७ :—

अस्याः पाण्डुलिप्या अन्तिमपत्रे "वेङ्कटनारायणः" इति लिखितमस्ति ।

सं. १० :—

अस्या समापकस्यान्ते निम्नपङ्क्तयो मिलन्ति लिखिता :—

"ज्ञातस्तेन समस्तशास्त्र विषयः कस्याप्यनल्पामतिः ।
शब्दज्ञानमहोदधेरुपतटं तेनापि दृष्टं पुनः ॥
काव्यं कर्तुमलं मनोहरमसौ शक्तो जनानां प्रियो—
येनैवामरकोश एष पठितः शास्त्रार्थसारो वरः ॥"
कृष्णावधानि स्वहस्तेन लिखितोऽयं ग्रन्थस्तस्यैव ॥

सं. ११

समापकस्यानन्तरं—

श्रीरङ्गनाथस्वामिपादारविन्दाभ्यां नमः ॥
तिरुवेङ्कडय्यन् स्वहस्तलिखितम् ।
श्री सुमतीन्द्रस्वामिपादारविन्दभ्यां नमः ॥

सं. १५

अस्य कोशस्य पाण्डुलिप्याः प्रारम्भे एकस्य पत्रस्योपरि "उपमन्युस्तोत्र"—इति लिखितम् मिलति। स्तोत्रञ्चेत्थं प्रारभते—

अम्भोधरश्यामलकुन्तलाय, तड़ित्प्रभा तुङ्गजटाधराय ॥

सं. १७

अस्याः पाण्डुलिप्या :- "आवरणपृष्ठोपरि बेलं भट्टाचे पोथि अमर तीनि काण्ड"

सं. २६

अस्या। पाण्डुलिप्या उपरि—आवरण पृष्ठे "तुलजामहाराजस्येदं पुस्तकम्" इति लिखितम्-वर्तते।

सं. २७

अस्याः समापकान्ते "या काण्डीवर्गसंग्रह सांगतों+एकून बारा वर्ग" इति लिखितमस्ति।

सं. ३१

अस्याः समापकान्तेऽपि "या अमर सिंहमु संन्यासि आशि तारण सम्वत्सर।" इत्यस्ति लिखितम्।

सं. ४३

अस्याः-आवरणे ईश्वरी न वर्ष श्बालुमासं हुजूरिनिदि वचिनदु" एवं लिखितमस्ति।

सं. ६२

अस्या उपरि-आवरणे "भोसलेत्युपनाम तुलजाराजस्य पुस्तकम्" एवं प्राप्यते।

सं. ७१

अस्याः पाण्डुलिप्याः- आवरणोपरि "तुलजाराजमहाराजस्येदं पुस्तकम्" इत्थं लिखितं प्राप्यते।

सं. ७२

'रत्नाकरस्यात्मजस्येदम्' इत्यस्ति लिखितमस्या उपरि।

सं. १११

अस्या अप्यावरणे "तुलजामहाराजस्येदं पुस्तकम्" एवं लिखितमस्ति-अथच समापकस्यान्ते।

कवेरमरसिंहस्य कृतिरेषातिनिर्मला।
आ चन्द्रतारकस्थायी नाम लिङ्गानुशासनम् ॥
ज्ञातस्तेन+सारोवर :—इत्थं मिलति।

सं. ११२

इद पुस्तकं रत्नाकरस्यात्मजस्य । परोपकाराय सम्पादितम् ।" एव लिखित मिलति ।

स ११३

"इदं पुस्तकं मंशेकर थाण्ड भट्टसूनुना रघुपतिभट्टेन लिखितम् ।" इत्थ किलास्याः । पाण्डुलिपेः समापकस्यान्ते मिलति ।

सं. ११५

"अस्या आवरणपृष्ठे "वेल भट्टाचि पोथि अमर तिसकाण्ड" एवं लिखितम् ।

सं. ११६

राज श्रीत्यागराजस्येदं पुस्तक "मित्यस्ति लिखितमस्याः पाण्डुलिप्या :— आवरणपृष्ठे ।

नामलिङ्गानुशासनस्य विविधा व्याख्यास्तासाञ्च पाण्डुलिप्यः ।

१ नामलिङ्गानुशासनव्याख्या — (स. म. पु.)

कर्गजोपरि $8\frac{1}{2} \times 4\frac{1}{2}$ अंगुलाकारे २४५ पत्रेषु नागर्यां क्षीरस्वामिनोऽपूर्णा व्याख्यापाण्डुलिपिरत्रावाप्यते ।

अस्या आरम्भश्लोकाः—

दिश्याच्छिवानि शिवयोस्तिलकायमानं ।
गोरोचनारुचिललाटविलोचनं नः ।
अन्योन्यगाढ़परिरम्भनिपीड़नेन
पिण्डीभवन् वहिरिव स्फुटितोऽनुरागः ॥
अथाप्यभिन्नमुद्रो योर्थार्थिभिरमरकोश एवं बुधाः ।
उदघाट्यते यथेच्छं गृह्णीध्वं नामरत्नानि ॥
प्राकृतिप्रत्ययवाक्यैस्त्वसमस्तैर्निरुक्तनिगदाभ्याम् ।
इति सप्ताष्टैः पथिभिर्नाम्नां पारायणं कुर्मः ।
भग्ना अभिधानकृतो विचारितरश्च यत्र विभ्रान्ताः ।
नामानि तानि वक्तुं गहनमहोऽध्यवसिता स्मः ॥
समाप्तौ च

परं विरोधे लिङ्गादि शेष.......

पूर्वार्धविधेः परलिङ्गं भवति । असुरपर्यायाः पुस्त इत्यस्य विषमैनैक :-...... इदं तेजः यशः ।

विषय :-

अमरकोश व्याख्या ।

टिप्पणि :-

अत्यन्तं प्राचीना पाण्डुलिपिरेषा । वर्तमानयुगे प्राप्तामरकोशव्याख्यासु क्षीरस्वामिनो व्याख्या सर्वप्राचीना । एवं कथ्यते यदयं श्री स्वामिः चिङ्गले पट मण्डलस्य-उत्तिरामेरुस्थानस्य निवासिरासीत् ।
अयं किल (ए. डी.) एकादशशतकेऽभूत् ।

त्रिवेन्द्रम् संस्कृत मालान्तर्गतम्-अस्याः व्याख्यायाः- एको भागः प्रकाशितोऽभूत् । अस्याः पूर्णभागः पुनातः प्रकाशितोऽभूत् ।

२ नाम लिङ्गानुशासनव्याख्या–

अस्याः व्याख्यायाः पाण्डुलिपिः कर्गजोपरि १२$\frac{7}{8}$X५ अंगुलाकारे ३१० पत्रेषु देव नागर्यां प्राप्यते । व्याख्याकारोऽस्ति सर्वानन्दः ।

आरम्भश्लोका :-

बर्हिणवर्हापीड़ः सुषिरपरो बालवल्लभो गोष्ठे ।
मेदुरमुदिर श्यामल रुचिर व्यादेश गोबिन्दः ॥
मुदेऽसौ धीराणा न गुणलववान् स्यान्मम परि-
श्रमः किञ्चित् सार्थंस्तदिहबिवुधाः क्षन्तुमुचितम् ॥
अतो ये सासूया अनृजुमतयो नूतनतया ।
खलास्तेऽमी हेयाः गुणिषु पुनरत्यञ्जलिरियम् ॥
अथटीका सर्वस्वं दशटीकावित्करोत्यमरकोशे ।
श्रीमत्सर्वानन्दो वन्दिघटी मातुरार्तिहा पुत्रः ।
यद्यपि सन्त्यतिगुणिनः श्रमस्तथाप्यत्र मे मौर्ख्यात् ।
ललितं रौति पिकश्चेत् वाग्यामं यातु किं काकः ॥

तत्रादौ भगवतः सेवायां परोपदेशेन प्रारीप्सित प्रत्यूह शमनाय धर्ममार्जयन्नाह–

यस्येत्यादिः ॥ हे धीराः ॥ सेव्यतामित्यनेन धैर्यशालिन एव सेवितुं शक्नुवन्ति इति-तान् सम्बोधयति । यस्य गुणाः अनघा अनवद्या रागादि तापरहिताः । तथा च अजयकोशे "अद्य शब्दो भवेत् पापे दुःखे व्यसनयोरपि" इति । गुणाः मैत्रीक्षमादयः । समाप्ति :–

शेषन्तु ज्ञेयं शिष्ट प्रयोगतः । यदत्र ग्रन्थे लिङ्गं नोक्तम् । नाम च नोक्तम् । तत्पूर्वाचार्याणां महाकवीनां प्रयोगादवसेयम् । यथा :–अनणन्तात्क्रत्यन्त गायत्र्याद्यं तथा छन्दः इति स्त्रीत्वानुशासनम् । अरुणस्येत्यन्यबोद्धव्ये नामानुशासनं यथा । "निलिम्पा चु सदो देवाः" इत्यादि गंगाधरादीनाम् ।

त्रीणि व्याकरणान्यधीत्य सकलं साहित्यमालोक्य च
प्राज्ञाध्यापकभाषितानि हृदये न्यस्याकृतेदं स हि।
प्राज्ञेनानु सनातनेन बहुशः प्रत्यक्षर शोधितम्।
जिज्ञासा यदि शब्द वर्त्मनि तदा चैतत्समालोक्यताम् ॥

समापकम्—

इति वन्दिघटीय [श्री सर्वानन्दकृतौ टीका सर्वस्वे लिङ्गादिसङ्ग्रहवर्गः।

श्री सीतालक्ष्मणहनुमत्-समेत श्री रामचन्द्राय नमः।

सान्ततया काण्डत्रयं लिखितम्।

करकृतमपराध क्षन्तुमर्हन्ति सन्तः।

अस्या एव व्याख्याया नाम "टीकासर्वस्वः"–इत्यप्यस्ति।

वङ्गदेशीयोऽयं सर्वानन्दः ११७९ (ए.डो.) शतके टीकामिमां लिलेख त्रिवेन्द्रम्

संस्कृतग्रन्थमालान्तर्गतञ्चास्या प्रकाशनमभूत्।

३ नाम लिङ्गानुशासन व्याख्या :-

इयमपरा पाण्डुलिपिरस्या एव व्याख्याया :- वर्तते। ताड़पत्रोपरि लिखिता $१७\frac{१}{२}X१\frac{१}{४}$ आकारे २२१ पृष्ठेषु ग्रन्थाक्षरेषु।

इयं टीका किल सर्वानन्दस्यव वर्तते अस्या पाण्डुलिप्याः।

अस्याः पाण्डुलिप्याः प्रारम्भः, समाप्तिः समापकादिकं च सर्वं पूर्ववदेव।

४ नाम लिङ्गानुशासन व्याख्या-

ताड़पत्रेषु $१६\frac{१}{८}X१\frac{५}{८}$ अगुला-कारे ६३ पत्रकेषु तेलुगु लिप्यां सर्वानन्दस्य व्याख्या-पाण्डुलिपिर्मिलति। परमियमपूर्णा। केवलं प्रथमकाण्डमात्रम्। प्रारम्भः यथापूर्वम्।

समाप्तौ-

नाट्यसङ्गतं भ्रूकुंसादिः।

समापकम्-

इति वन्द्यघटीय श्री सर्वानन्दकृतौ+पातालवर्गः।

५ नाम लिङ्गानुशासनव्याख्या

ताड़पत्रेषु $१७\times१\frac{१}{२}$ अंगुलाकारे १०५ पत्रकेषु ग्रन्थलिप्यां सर्वानन्द टीकाऽमर-कोशस्योपलभ्यतेः परमियमपि केवलं प्रथमकाण्डस्य एव।

अस्यारम्भः, समाप्ति. समापकञ्च ४ सं. व्याख्यावदेव वर्तते।

नामलिङ्गानुशासनव्याख्या-

इयं व्याख्या ताड़पत्रोपरि तेलुगु लिप्यां सर्वानन्दस्येव प्राप्ता भवति आकारः १७X१½ अंगुलमितः। पत्र सं. ६० प्रारम्भः समापकं विषयादिकञ्च तद्वदेव यथा ४ संख्यकाया व्याख्यापाण्डुलिपेः। केवलं प्रथमकाण्डः।

७ नामलिङ्गानुशासनव्याख्या–

इयमन्या पाण्डुलिपिरस्या एव सर्वानन्द व्याख्याया: प्राप्ता भवति। इयं किल ताड़पत्रोपरि, तेलुगुलिप्यां, १६½×१¾ अंगुलाकारे १२४ पत्रेषु प्राप्यते। अस्यां द्वितीयकाण्डमात्रम् वर्तते।

समारम्भ :-

वर्गाः पृथ्वीत्यादिः।

सङ्ग्रहश्लोकः सुखग्रहणार्थः।

समाप्ति :-

शूद्रादिवदेव स्त्रीपुंसयोरिति।

समापकम्

इति वन्दि+शूद्रवर्गः

इदं पुस्तकं वन्दि घटीयं रामाभट्टेन लिखितम् ॥

टीका सर्वस्वः। द्वितीयकाण्डः।

८ नाम लिङ्गानुशासन व्याख्या–

१७×१½ अगुलाकारे ९१ पत्रकेषु तेलुगुः- लिप्यां सर्वानन्दकृतटीकासर्वस्वस्य केवल द्वितीयकाण्डः प्राप्यते।

अस्या आरम्भः, समाप्तिः समापकादिकञ्च सर्वमपि ७ संख्यकायाः पाण्डुलिपेः समानम्। इयं पाण्डुलिपिरत्यन्त-जीर्णा।

९ नामलिङ्गानुशासनव्याख्या-

ताड़पत्रेषु १७× ½ आकारे १३७ पत्रकेषु च ग्रन्थलिप्यां सर्वानन्दीयटीकासर्वस्वस्य द्वितीयकाण्डमात्र :–मिलति। अस्यापि-आद्यन्तं सर्वं पूर्ववदेव। केवलमन्ते "जीवेरात्पुंजीवातुः। पुंन पुंसकर्मिति रभसः॥ इति क्षत्रिय वर्गः।

१० नाम लिङ्गानुशासन व्याख्या-

कर्गजेषु ६⅝×४½ अगुलाकारे ७९ पत्रकेषु देवनागर्यां सर्वानन्दीयटीकासर्वस्व-स्य केवलं तृतीयकाण्डः- प्राप्तो भवति।

आरम्भ :-

अथ तृतीयकाण्डमारभते।

विशेष्यनिघ्नैः+वर्गसंश्रयाः॥ विशेष्यनिघ्नैर्विशेषणैः ॥

अस्मिन् काण्डे काण्डान्तरे च प्रकीर्णकैः नानार्थैरव्ययैरलिङ्गैः॥

समाप्ति-समापकादिकञ्च पाण्डुलिपिसं. २ वत्।

११ नाम लिङ्गानुशासन व्याख्या—

इयं पाण्डुलिपिः भानुजीदीक्षितकृतामरकोशटीकाया वर्तते। कर्गजेषु लिखिता १०+$\frac{1}{4}$४ अगुलाकारे ५४० पत्रेषु नागर्यां मिलति।

समारम्भः—

वल्लबी वल्लभं नत्वा गिरं भट्टोजिदीक्षितम्।
अमरे विदधे व्याख्यां मुनित्रयमतानुगाम् ॥
प्रारीप्सितप्रत्यूहापनुत्तये कृतं मङ्गलं शिष्यशिक्षार्थंमादौ निवबन्ध।
यस्येति ॥ हे अनघा भवद्भिः स धीराः सेव्यताम् ॥

समाप्ति :—

मूलम्

परं विरोधे शेषन्तु ज्ञेयं शिष्टप्रयोगतः ॥४६॥
इति लिङ्गादिसङ्ग्रहबर्गः।

व्याख्या —

यत्तु "गोधापोटा" इत्युदाहृतवान् मकुटः तन्न।
ङ्याबूडन्तमित्युक्तत्वेन शेषत्वाभावात्।

समापकम्—

इति श्री भट्टोजिदीक्षितात्मजभानुजिदीक्षितविरचितायां व्याख्यासुधाख्यायां तृतीयः काण्डः समाप्त शुभमस्तु।

टिप्पणिः—

अस्यान्तिमपत्रे "षड्दर्शनी लक्ष्मणभट्ट अमरटीका १ काण्ड सं० शितिकण्ठदीक्षितद्वितीयकाण्ड पत्र २०९।

मूलपाठोऽप्यस्यां पाण्डुलिप्यां वर्तते। भानुजिदीक्षितो हि भट्टोजिदीक्षितस्य प्रख्यात-वैय्याकरणस्य पुत्रोऽस्ति। अयं लेखकः षोडशशतकस्यान्ते सप्तादशशताब्द्याश्चारम्भे वभूव। अस्यैवापरनाम रामाश्रमिन्-अस्ति मुम्बईस्थ-निर्णयसागरमुद्रणालयेन प्रकाशितोऽयं ग्रन्थः।

१२ नाम लिङ्गानुशासनम्-व्याख्या :—

कर्गजोपरि १०×४$\frac{1}{2}$ अंगुलाकारे ७१६ पत्रकेषु देवनागर्यां भानुजिदीक्षित-व्याख्यायाः पूर्णा पाण्डुलिपिरेषाऽपरा प्राप्यास्ति। प्रारम्भः, समाप्तिः विषयादिक (११ सं.) वदेव।

समापकम्—

इति श्रीवघेलवंशोद्भवश्री महीपरविषयाधिप श्रीकीर्तिसिंहदेवाज्ञया

श्रीभट्टोजिदीक्षितात्मजश्रीभानुजिदीक्षितविरचितायाममरटीकायां व्याख्या सुधाख्यायां प्रथमः काण्डः सम्पूर्णतामगात् । इयं अमरटीका व्यय-नामसम्बत्सरे उत्तरायणे हेमन्ततौं पुष्यमासे कृष्णपक्षे सप्तम्यां इन्दुवासरे श्रीरामभट्टेन लिखिता श्री शाहराज भूपालानाम् ॥

शिवार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

अमरे तृतीयकाण्डः ॥

सर्वजिन्नामसम्वत्सरे उत्तरायणे वसन्ततौं वैशाखमासे कृष्णपक्षे तृतीयायां गुरुवासरे परशुरामभट्टेन लिखितः । लेखकपाठकयोः शुभं भवतु ॥

यादृशं+न विद्यते करकृतं+सन्तः ॥

१३ नामलिङ्गानुशासनव्याख्या—

कर्गजोपरि १०½×४ अगुलाकारे १७६ पत्रेषु देवनागर्यां भानुजिदीक्षित-कृतटीकायाः केवलं प्रथमः काण्डोपलभ्यते ।

प्रारम्भः १८ सख्यकव्याख्यापाण्डुलिपिवत् ।

समाप्तिः

वराटकः पद्मबीजकोशे रज्जौ कपर्दके ॥४३॥

इति वारि वर्गः ॥ उक्तवर्गान् सङ्गृह्णाति ॥

उक्तमिति ॥ अत्रैकादशवर्गाः ॥

समापकम्

इति श्रीबघेलवंशोद्भवश्रीमहीधरविषयाधिप+अमरटीकायां व्याख्या सुधाख्यायां प्रथमः काण्डः सम्पूर्णतामगात् ॥

१४ नाम लिङ्गानुशासनव्याख्या :—

कर्गजेषु १२¼×६¼ अगुलाकारे ७३ पत्रकेषु ग्रन्थलिप्यां भानुजिदीक्षित टीकायाः केवलं प्रथमकाण्डस्य पाण्डुलिपिरेषा प्राप्यते अस्याः प्रारम्भ-समाप्ति—समापकादिकं सर्वमपि १२ पाण्डुलिपिवत् अस्ति ।

१५ नाम लिङ्गानुशासनव्याख्या :—

९½×५ अगुलाकारे १२५ पत्रकेषु नागरी—अक्षरेषु च नामलिङ्गानुशासन व्याख्यायाः प्रथमकाण्डस्य-एव पाण्डुलिपिरेषा विद्यते । टीकाकारः रामाश्रमिन् । प्रारम्भः समाप्तिः विषयादिकञ्च १२ सं. पाण्डुलिपिवत् । समापकस्यान्ते ऽधस्तनपङ्क्तीनामुल्लेखोऽस्ति ।

'इति श्री बघेलवं' शोद्भव श्री महीधर विषयाधिप श्रीकीर्तिदेव सिंहाज्ञया श्री भट्टोजिदीक्षितशिष्यगुर्जरजातीयरामाश्रमविरचितायाममरटीकायां

व्याख्या सुधाख्यायां प्रथमः काण्डः समाप्तः ।
इत्यमर समर्थितः ।
खरसम्वत्सरवैशाखशुक्लद्वितीयाभानुवासरे राजश्रीवेङ्काजिनायकाख्यब्रह्मण्य-स्यारुणाचलभट्टेन लिखितमिदं पुस्तकम् ।

१६ नाम लिङ्गानुशासन व्याख्या :—

१०½५ अंगुलाकारे १७१ पत्रकेषु नागर्यां रामाश्रमिन् कृतायाः नामलिङ्गानु-शासनव्याख्यायाः केवलं प्रथमकाण्डस्य पाण्डुलिपिरेषा प्राप्यते । १२ संख्यक-पाण्डुलिपिबदेव प्रारम्भ-समाप्तिसमापकादिकं सर्वमस्य विद्यते ।

१७ नामलिङ्गानुशासनव्याख्या : –

ताड़पत्रोपरि १९×१½ अंगुलाकारे १५३ पत्रकेषु नामलिङ्गानुशासनस्य प्रथम-काण्डमात्रम् मिलति । टीकाकारः भानुजिदीक्षितः ।
आरम्भः समाप्तिश्च १२ सं. पाण्डुलिपिवत् ।
समापकञ्चेत्थम्-
इति श्री+सम्पूर्णतामगात् ।। हरिः ओम् ।।
शुभमस्तु ।
कालमेघमिवनीलशरीरं शालिहोत्रशिरसि स्थितबाहुम् ।
इन्दिराङ्कविनिवेशितपदं वीरराघवमहं प्रणतोऽस्मि ।।
विषु नामसम्वत्सर वंशाख शुक्लसप्तमी शनिवार श्री मत्प्तव-सिद्धान्त प्रतिष्ठा-पनाचार्य राव (?) साङ्गनिगमन्यायमीमांसाव्याकरणभाट्टप्राभाकरतर्कवेदान्ता-दिसकलकलाबल्लभराजश्रीमत्सुमतीन्द्र श्री पाद...सरस्वती श्री नारायणवरद अमरकोश—प्रथमकाण्डं सम्पूर्णम् ।।

१८ नाम लिङ्गानुशासनव्याख्या :—

कर्गजेषु १०×४½ अंगुलाकारे ७६ पत्रेषु देवनागर्यां भानुजिदीक्षित कृत नाम-लिङ्गानुशासनव्याख्यायाः प्रथमः काण्डः अस्यारम्भः समाप्तिः समापकादिकञ्च सर्वम् पूर्ववदेव यथा १२ संख्यकपाण्डुलिप्यामस्ति ।

१९ नाम लिङ्गानुशासन व्याख्या :—

९¼×५½ अंगुलाकारे १०६ पत्रेषु देवनागर्यां—अपूर्णा पाण्डुलिपिरेषा समुपलभ्यते । अस्याटीकायाः लेखकः भानुजिदीक्षित एव । प्रारम्भः १० पाण्डुलिपिवत् ।

समापकम्
पुंसि क्लीवेति चेति विषेणापि सम्बध्यत इति केचित् ।।९।। १०२ पत्रके समापकम् ।

इति नाट्यवर्गः ।

२० नाम लिङ्गानुशासन व्याख्या—

ताड़पत्रकेषु १९½×१⅛ अंगुलाकारे २३६ पत्रकेषु ग्रन्थलिप्यां अमरकोशस्य केवलं द्वितीयकाण्डस्य व्याख्यापाण्डुलिपिर्मिलति । व्याख्याकारः श्रीभानुजिदीक्षितः ।

आरम्भ :—

शुक्लाम्बरधरं+शान्तये ।।

द्वितीयकाण्डे वर्गा उक्ताः वदितुमारब्धाः । आदिकर्मणि क्तः कर्तरि च । कीदृशाः, साङ्गोपाङ्गैः पुरादिभिरुपलक्षिताः ।।

समाप्तौ चेत्थम्—

कुम्भकारादयस्ते जातिवचनत्वात् "शुद्रावज्जाते" रित्यादिना ङीषि लिङ्गान्तरे स्त्रीलिङ्गे क्लीबत्वे ऽपि बोद्धव्याः ।।

समापकम्—

इतिशूद्रवर्ग विवरणम् इति श्री मदमरसिंहटीकायां व्याख्या सुधायां द्वितीयः काण्डः सम्पूर्णतामगात् ।। श्री गुरुभ्यो नमः ।

२१ नामलिङ्गानुशासनव्याख्या :—

एषा पाण्डुलिपिर्हि कर्गजोपरि ०×४½ अंगुलाकारे २३९ प्रत्रकेषु देवनागर्यां मिलति । इयमपि खण्डितप्राया । व्याख्याकारः भानुजिदीक्षितः । आरम्भः २० पाण्डुलिपिरिव ।

समाप्तिश्चानेन प्रकारेण—

"लक्षं व्याज शरव्ययोः" इति हेमचन्द्रः । अचो यत् । शरवे हिंस्राय हितम् । उगवादिभ्यो यत् । यद्वा ।

समापकम् २१६ पत्रके—

इति ब्रह्मवर्गः ।

अत्रापि केवलं द्वितीयकाण्डोपलब्धिरेव । क्षत्रियवर्गस्य मध्ये-एवास्या पाण्डुलिप्याः समाप्तिर्भवति । अस्यां मूलपाठोऽपि वर्तते ।

२२ नामलिङ्गानुशासनम्—व्याख्या :-

कर्गजोपरि ९½×५¼ अंगुलाकारे १०२ पत्रेषु - इयमपरा पाण्डुलिपिः रामाश्रमिणः-अमरकोशव्याख्यायाः मिलति । इयमप्यपूर्णा । नागरीलिप्या लिखिता ।

अस्यारम्भः २१ संख्यकपाण्डुलिपिरिव । समाप्तिश्च निम्नशब्दैर्भवति-
"निषादशूद्रयोः पुत्रे तृणोल्कायाञ्च कुक्कुभे" इति विश्वमेदिन्यौ ॥

चरण आयु.........॥

समापकम्-

इति श्री वघेल+द्वितीयकाण्डे वनौषधिवर्ग विवरणम् ॥

२३ नामलिङ्गानुशासनव्याख्या :-

भानुजिदीक्षितकृताया अमरकोशव्याख्याया एकापर पाण्डुलिपिरपि मिलति ।
अस्याकारः १०¼×५ अंगुलप्रमाणः । पत्राणि ३२ लिपिर्देवनागरी । अपूर्णा ।

प्रारम्भिकम्-

वहि युष्यां विदित्यसच् । सञ्ज्ञापूर्वकत्वान्न वृद्धिः । द्वे गवाद्यदनीयतृणवि-
शेषस्य ।

तृण्यते । तृण अदने घञ् । संज्ञापूर्वकत्वान्न वृद्धिः ।

द्वे तृणमात्रस्य ॥ १६७ ॥

सामाप्तिकम्-

अर्धर्चादिः । उपस्थः । शेफसि ।............ मदनमन्दिरे इति विश्वमेदिन्यौ ।
॥ ७५ ॥

समापकम्—

१९ पत्रके—इति मनुष्यवर्गः ।

२४ नाम लिङ्गानुशासनव्याख्या:—

नाम लिङ्गानुशासनव्याख्याया :—अपरेय पाण्डुलिपिः । अस्याङ्गुलेष्वाकरः
१०¼×५ । पत्राणि १८ । लिपिर्नागिरी । लेखको भानुजि दीक्षितः । अपूर्णा ।

प्रारम्भ :—

शुक्लाम्बर धरं+शान्तये ।

द्वितीयकाण्डे वर्गा उक्ताः वदितुमारब्धा इत्यादिः पूर्ववत् २० पा. ।

समाप्तिः-

अत इति ठनौ । कुमुद्दालयति दलविदारणे । कर्मण्यण् शकन्ध्वादिः । युगं
युग्मपत्रमस्य । चत्वारि कचनार ख्यातस्य ।

समापकम्

केवलं द्वितीयः काण्डः । पुस्तकस्यावरणे लिखितमिदम्—

"श्री मुद्गल इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ।।

२५ नाम लिङ्गानुशासन व्याख्या—

कर्गजोपरि १० $\frac{1}{8}$ × ५ $\frac{7}{8}$ अङ्गुलाकारे १२१ पत्रकेषु देवनागर्यां रामाश्रमिणोऽपरापाण्डुलिपि रेषा व्याख्यायाः अपूर्णा प्राप्यते ।

प्रारम्भ :—

शुक्लाम्बरधरं+शान्तये यथा २० संख्यकपाण्डुलिप्यामिति ।

समाप्ति :—

"निनादशूद्रयोः पुत्रे तृणोल्कायाञ्च कुक्कुभे" इति विश्वमेदिन्यौ । चरण आयु:—

समापकम्—

तुक्कोजिभूपालानुज्ञया शिवभट्टेन लिखितमिदं पुस्तकम् ।

अयमपि द्वितीयकाण्ड एवोपलभ्यते व्याख्यासुधायाः ।

२६ नाम लिङ्गानुशासन व्याख्या :—

व्याख्यासुधाया तृतीयकाण्डस्येव पाण्डुलिपि रेषोपलभ्यते । कर्गजेषु । आकारः १०×४$\frac{3}{4}$ अगुलेषु । पत्राणि ११६ । लिपिर्देवनागरी । लेखको भानुजिदीक्षितः । अपूर्णा ।

प्रारम्भिकम्—

खालिनी । खल्या ।

अनेकार्थाः केचिदत्रैव वर्गे कान्ता आदयो येषां कान्त गान्तादीनां तेषु, वर्गेषु कथिताः ।।

समाप्तौ च

मूलम्

परं विरोधे शेषन्तु ज्ञेयं शिष्टप्रयोगतः । ४६ । इति लिङ्गादिसंग्रहवर्गः इत्यादि पूर्ववत् यथा ११ संख्यकजिप्याम् ।

समापकम्

श्री साम्ब शिवार्पण मस्तु ।। अमरे तृतीय काण्डः ।

सर्वजिन्नाम सम्वत्सरे उत्तरायणे बसन्ततौं वैशाखमासे कृष्णपक्षे तृतीयायां गुरु वासरे परशुरामभट्टेन लिखितः ।।

लेखकपाठकयो :-शुभं भवतु ।

अस्माः पाण्डुलिप्या अपि केवलं प्रथमकाण्ड एवोपलभ्यते ।

२७ नाम लिङ्गानुशासन व्याख्या :—

ताड़पत्रेषु १७×१½ आकारे १४८ पत्रकेषु ग्रन्थलिप्यां काण्डत्रयाणां पूर्णेयं व्याख्या—पाण्डुलिप्याः-रूपेण प्राप्यते । अस्याः प्रणेता लिङ्गय सूरिः – अस्ति ।

प्रारम्भिकम्—

शिवं गुरूं विधातारं तत्पत्नीस्तत्सुतांश्च वै ।
नत्वा समस्तप्रत्यूह — शान्तये मङ्गलाय च ॥

पदवाक्यप्रमाणज्ञ क्षीरस्वाम्यादिसूरिभिः ।
कृतान् ग्रन्थान् समालोच्य बालानां सुखबुद्धये ॥
यत्कृतं सूरिसिंहेन नामलिङ्गानुशासनम् ।
तत्रस्थायाः पदावल्याः- विवृतिर्वक्ष्यते मया ॥
यस्येति ॥ यस्येति हे धीराः, विद्वांसः । यस्य गुणा ।-अनघाः निर्मलाः ।

समाप्ति पङ्क्तय :–
अनुक्तं लिङ्गशेषं शिष्टप्रयोगतः वृद्धव्यवहारतो ज्ञेयम् । यथा अयं पचति । इयं पचति । वेदाः प्रमाणम् । सर्वमनवद्यम् ॥

समापकम्—
इति वेंकलं कामयभट्टोपाध्यायसूनुलिङ्गय सूरिविरचितायाममरकोशपद-विवृतौ लिङ्गादिसङ्ग्रहवर्गान्वित लिङ्गविवेचनं समाप्तम् ॥

टिप्पणि :–
लिङ्गयसूरि :-तेलगु-ब्राह्मणः-आसीत् । अस्येयं पदविवृतिर्व्याख्या दक्षिणभारते परमप्रसिद्धा । अयं लेखकः १८ (ए. डी.) शतकस्य-अस्ति । ग्रन्थलिप्यामपि कानिचित् संस्करणानि-अस्य समुपलभ्यन्ते ।

२८ नाम लिङ्गानुशासनम् :–

लिङ्गयसूरिविरचिताया अमरकोशपदविवृत्याः-अपरैषा पाण्डुलिपिरपूर्णा ९½×४½ आकारे कर्गजोपरि लिखिता ४१ पत्रकेषु देवनागर्यां प्राप्या ।

प्रारम्भः

शिवं गुरुं विधातारं-इत्यादि २७ पाण्डुलिपिरिव ।

समाप्तौ चैते शब्दाः सन्ति–

नरकसंगतं पीड़ाबाधादि । वारि संगतं नौकादि च । एवं सङ्गत्या उक्त-मित्यर्थः । करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

इत्यमरकोशपद विवृतौ नरक वर्गः ॥

२९ नाम लिङ्गानुशासन व्याख्या-

इयमपरा पाण्डुलिपिर्हि लिङ्गय सूरिकृतामरकोश व्याख्यायाः पदविवृतिनामिकायाः प्राप्यते। परमियमपि-अपूर्णा केवलं प्रथमकाण्डरूपा एव। कर्गजोपरि ९½×३½ आकारे ८६ पत्रेषु। समारम्भः २७ पाण्डुलिपिवत्।

समाप्ति :-

चन्द्रेण भागतो न्यस्ता चन्द्रभागाः। चन्द्रभागाभ्यां गिरिभ्यां जाता वा। सरांसि विद्यन्तेऽस्यामिति सरस्वती।

समापकम् (४९ पत्रके)

इति नरक वर्गः।

३० नाम लिङ्गानुशासन व्याख्या :-

ताड़पत्रेषु १ ×१⅜ अंगुलाकारे ४५ पत्रकेषु तेलुगुः लिप्याम् अपूर्णा लिङ्गयसूरि-व्याख्या-पाण्डुलिपिः प्राप्या। अस्यारम्भः पूर्ववदेव भवति। समाप्तिश्च शब्दैरेभिः

दिगीश्वरादिकं गृह्यते। एषा दिग्वर्गादिनां सङ्गतम्।

समापकम्

३१ नाम लिङ्गानुशासन व्याख्या-

लिङ्गयसूरि टीकाया एवापरा पूर्णा पाण्डुलिपिः।

आकारः १८×१ अगलेषु। ८८ पृष्ठात्मिका।

तेलुगुः लिप्याम्।

आरम्भ :-

घुर भीमशब्दयोः प्रतिभयम्। भयङ्करनामानि।

समाप्ति :-

धरित्री धरिणी च। धृ धारणे। कथादिः

समापकम् (६८ पत्रके)

इति स्वरादि काण्डः।

३२ नामलिङ्गानुशासन व्याख्या-

कर्गजेषु ९½×४ अंगुलाकारे ४० पत्रकेषु देवनागर्या लिङ्गयसूरि कृत टीकायाः पाण्डुलिपि रेषा। प्रारम्भादिकं सर्वं २७ लिपिवत्।

३३ नामलिङ्गानुशासनव्याख्या :-

लिङ्गयसूरे एव पदविवृत्याः पाण्डुलिपिरेषा १०×४½ अंगुलाकारे ४४ पत्रेषु देवनागर्या-अपूर्णा मिलति। केवलं द्वितीयः काण्डः।

प्रारम्भश्चास्याः शब्दैरेभिर्भवति :-

अथ द्वितीयकाण्डमारभते । इत्यस्मिन् काण्डे साङ्गोपाङ्गैः पृथ्वीपुरक्ष्माभृत् वनौषधिमृगादिभिः सह वर्तमानैः सम्पादिता वर्गा उक्ताः ।

समाप्तिः

माता च पिताच पितरौ । मातरपितरौ च प्रसूजनकयोर्नामनी । श्वश्रूश्वशुरश्च ।

समापकम् (९७ पत्रके)

इत्यमरकोशपदविवृतौ सिंहादि वर्गः ।

३४ नाम लिङ्गानुशासनव्याख्या :-

लिङ्यसूरे एवान्या पदविवृत्याः पाण्डुलिपिरियम् । आकारः ९$\frac{3}{4}$×५$\frac{1}{8}$ पत्रकाणि ६४ । लिपिर्देव नागरी । अपूर्णा ।

प्रारम्भः ३३० पाण्डुलिपिरिव ।

समाप्ति :—

अक् अग कुटिलायां गतौ । एते प्रत्येकं तृणविशेषाः । कौ भूमौ शेते ।

समापकम्-

द्वितीयकाण्डम् ।

३५ नाम लिङ्गानुशासन व्याख्या-

ताड़पत्रेषु, आकारे—१७$\frac{3}{4}$×१$\frac{1}{4}$ अंगुलामिते । १२७ पत्रेषु ग्रन्थलिप्याम् मिलति पाण्डुलिपि रेषा । लेखकः लिङ्गयसूरिः ।

अपूर्णा ।

आरम्भः-

अथ द्वितीयकाण्डमारमते । इत्यस्मिन् काण्डे साङ्गोपाङ्गैः पृथ्वी पुरक्ष्माभृत् इत्यादिः– पूर्ववत् ।

अन्यतो वृत्तोस्त्र्यादिवृत्तौ सत्यां लिङ्गान्तरे ऽपि स्त्रीलिङ्गे नपुंसके एवमूह्या। तद्यथा मायाकारी स्त्री । मायाकारमित्यादिः ॥

समापकम् :-

इ शूद्रवर्गः । इति वेङ्गल कामयभट्टोपाध्याय सूनु लिङ्गयसूरिविरचितायाममरकोशपदविवृतौ भूम्यादिद्वितीय काण्डोक्तवर्गनामविवेचनं साङ्गमेव समर्थितम् ।

द्वितीयः काण्डः

३६ नामलिङ्गानुशासन व्याख्या :-

ताड़पत्रेषु, १८×१¼ अगुलाकारे ३८ पत्रकेषु तेलुगुः लिप्यां अपूर्णेयं पाण्डुलिपिः प्राप्यते लिङ्गयसूरिकृतायाः पदविवृत्याः ।

प्रारम्भः ३५ सख्यक पाण्डुलिपिवत् ।

समाप्तौ च-

खर्ज व्यथने । चिन्मयान्दुः ।

समापकम्-

इति श्री वेंगल+विवृतौ वनौषधिवर्गः ।

केवलं द्वितीयः काण्डः ।

३७ नाम लिङ्गानुशासन व्याख्या:-

कगंजोपरि ११½×५½ अंगुलाकारे, ११ पत्रकेषु, देवनागर्यां पाण्डुलिपिरियम्-अवाप्यते । व्याख्याकारः रामकृष्णदीक्षितः । केवलं प्रथमः काण्डः ।

आरम्भिकम्-

अमर+दिवौकसः ।

॥ व्या ॥

अमर इति षड्विंशति देवता सामान्यस्य । अत एव बहुवचनिनो विशेष्य सन्निधौ तल्लिङ्गवचना अपि समुदायेषु वृत्ताः ।

समाप्ति :-

उक्तं+सङ्गतं

॥ व्या ॥

क्वचित्तु आदि शब्देन पातालस्यापि ग्रहणम् । अस्यापि शेषादिदेवाधिष्ठानत्वेन स्वग तुलय......कथनम् ।

समापकम्-

इति श्री रामकृष्णदीक्षितीये अमरपीयूषे प्रथमः काण्डः समाप्तः । अनन्त भट्टस्येदं पुस्तकम् ।

३८ नाम लिङ्गानुशासन व्याख्या :-

ताड़पत्रोपरि १०¾×१⅛ अङ्गुलाकारे ३ पत्रकेषु ग्रन्थलिम्यामथ च तमिल लिप्यां प्राप्ता भवति पाण्डुलिपिरेषा ।

लेखकः- श्री निवास बज्वन् ।

प्रारम्भिकम् :-

वन्दे रामाम्बुदं श्यामं बैदेही तड़िदुज्ज्वलम् ।
यो राक्षसदवं दीप्तं शरबर्षै रशीशमत् ।
क्रियते श्री निवासेन यज्वना बालवोधिनी ।
टीका ह्यमरकोशस्य सम्यगागस्त्यभाषया ।

समाप्ति :-

स्वर्गंनाक त्रिदिब त्रिदशालया......द्वन्द्व......नासत्यादिस्थल......द्वन्द्व

टिप्पणि:- मातृकान्यासादिनामपुस्तकस्यांशा:- अप्यत्र मिलन्ति। स्पष्टमिदं यदयं लेखक :- दक्षिणभारतीय:- ब्राह्मण: । अन्यत् विशिष्टं किमपि-अस्य लेखकस्य विषये नावाप्यते । इयं टीका च नास्ति मुद्रिता ।

३९ नामलिङ्गानुशासन व्याख्या :-

कर्गजेषु १३×५$\frac{1}{4}$ अंगुलाकारे ६१ पृष्ठेषुदेव नागरी लिप्यां एकापरा पाण्डुलिपि-रपूर्णा ऽमरकोश व्याख्योया :- प्राप्ता भवति। परमस्या: प्रणेतुर्नामधामादिकं किमपि - न ज्ञायते ।

प्रारम्भ :-

श्रीगणेशाय नम:

श्रीरस्तु शुभमस्तु ।
अध्यास्ते य: सर्वं धव ईदृशा :- इत्यगोचरो वचस: ।
अहमिति संविद्विशाय: पुरुष: स पर पुरातनो जयति ।

अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धक धर्मतिरोधानद्वारा प्रारीप्सितपरिसमापयतीति प्रामाणिकमतोविरूप्रत्यूहं प्रारीप्सितं परिसमाप्तिहेतु स्वेष्ट देवता सङ्कीर्तनात् विशिष्टादृष्टानुव पिपादयिषु: ग्रन्थकार: प्रथमं पद्यं निवबन्ध । यस्येति ।

हे धीरा: स भगवान् सेवयतामाराध्यताम् । धैर्यशालिन एव सेवितुं शक्नुवन्तीति तानेव सम्बोधयति ।

समाप्ति :-

गान्धार: यद्वा गान्धारो ऽभिजनो यस्या: । सिन्धुतक्षा शिलादिभ्योऽण् ।

समापकम् (६१ पत्रके)

इति शब्द वर्ग विवरणम् ।

इयं किलानामव्याख्यामरकोशस्य विद्यतेऽस्यां पाण्डुलिप्याम् । नापि चैषा मुद्रिता । अस्यैव लेखकस्य व्याख्याया: पाण्डुलिपि द्वयं (४०,४१ संख्यकम्) मल ति।

४० नाम लिङ्गानुशासनव्याख्या-
कर्गजोपरि ९$\frac{3}{4}$×५$\frac{1}{8}$ अगुलाकारे ९४ पत्रेषु देवनागर्या-अपूर्णाऽज्ञात-लेखका चान्यैका पाण्डुलिपि: प्राप्यते । अस्यारम्भ: समाप्ति: समापकम् च सर्वमपि यथा पूर्वम् । (३९ वत्)

ामलिङ्गानुशासन व्याख्या :-
इयमपि कर्गजेषु १३×५$\frac{3}{4}$ आकारे ९८ पत्रकेषु देवनागर्या अपूर्णाऽ नाम-लेखका च पाण्डुलिपि: प्राप्ता भवति ।

आरम्भ :-
श्री गणेशाय नम: ।
अथ द्वितीयकाण्डे वर्गान् संगृह्णन् आह वर्ग इत्यादि । इह द्वितीयकाण्डे ।

समाप्ति :-
आश्चर्य रससङ्घातोऽस्या जटा अस्ति । दो: क्विपि अत् झटति अच् श्य :-

समापकम् (८८ पत्रके)
इति क्षत्रियवर्गं विवरणं समाप्तम् ।
द्वितीयकाण्डस्य भागोऽयम् ।

४२ नामलिङ्गानुशासन व्याख्या :—
इयं पाण्डुलिपिरपि कर्गजोपरि १३×५$\frac{1}{2}$ अंगुलाकारे २० पत्रेषु देवनागर्या—अज्ञातलेखकस्यैवापूर्णा प्राप्ता भवति ।

प्रारम्भ :—
श्रीगणेशाय नम: । शुभमस्तु ।
विशेष्येत्यादि वक्ष्यमाणेऽत्र सामान्ये काण्डे विशेष्यनिघ्नादिभिर्वर्गा वंक्ष्यन्ते । ते च स्वतन्त्रा: । किन्तु वर्गा: पूर्वोक्त स्वर्गादि-वर्गसंश्रयो आश्रय येषां तादृशा: । तथाहि विशेष्यनिघ्ना: ।

समाप्ति :—
आदिना चार्मणाङ्गारारिद ग्रह: ।

समापकम्—
सङ्कीर्णं प्रधान विवरणं समाप्तम् ।
इयं केवलं तृतीयकाण्डस्यैव व्याख्या- पाण्डुलिपिरस्ति ।

४३ नामलिङ्गानुशासनव्याख्या :—

ताड़पत्रकेषु १८ × १$\frac{3}{4}$ अंगुलाकारे २४६ पत्रकेषु च तेलुगुलिप्यां तृतीयकाण्डस्य पूर्णस्य व्याख्यापाण्डुलिपिरेषावाप्यते ।

आरम्भिकम् —

सर्वज्ञ सर्वगल भजत सदा शैलजार्धसङ्कीर्णम् ।
नानार्थप्रदमव्ययमनेकलिङ्गैः प्रकाशितस्फूर्तिम् ।

एवं काण्डद्वयेन तत्तल्लोकप्रतितियत नामान्यनुशिष्य सम्प्रति साधारणकाण्डान्तर मारभमाणः प्रेक्षावत् प्रवृत्तिसिद्धये वक्ष्यमाणं सङ्गृह्य दर्शयति—

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसङ्ग्रहैर्वर्गैः सामान्यैर्वर्ग संश्रयाः ॥

सकललोकसाधारणार्थनिरूपणादस्य काण्डस्य सामान्यत्वम् ।

समाप्ति :-

प्रकृतिप्रत्ययादिमुखेनैव चिरन्तनशिष्टानुशिष्टप्रबन्धशीलनाच्च नामलिङ्गानि च परिज्ञातव्यानि—इत्युपायोपदेशोऽपि नामलिङ्गानुशासनप्रभेद एवेति तं तदुक्तिप्रतिज्ञया न काचिद् व्याहृतिः किन्तु सम्पूर्णतैव निर्व्यूढेत्यभिप्रायः ॥

समापकम्

इति लिङ्गादिवर्गः । हरिः ओम् ।
इत्यमरसिंह व्याख्या तृतीयकाण्डसमाप्तम् ।

साम्बशिवाय नमः ।

इयमपि व्याख्यानामलेखकप्रणीताऽमुद्रिता च ।

४४ नामलिङ्गानुशासन व्याख्या :—

१७ × १$\frac{1}{2}$ अंगुलाकारे ताड़पत्रकेषु १५८ ग्रन्थलिप्यां प्रथमकाण्डव्याख्यानाम लेखकस्य मिलति । अस्याः प्रारम्भिकम् समाप्तिविषयादिकं समापकञ्च सर्ववदेव (४३ वत्) द्वादशपत्रकमत्र मीमांसा विषयस्यापि वर्तते ।

४५ नाम लिङ्गानुशासनव्याख्या :—

ताड़पत्रेषु ११$\frac{1}{4}$ × १$\frac{1}{8}$ अंगुलाकारे ४८ पत्रकेषु (११८-१५५) ग्रन्थलिप्यां तमिललिप्याञ्च प्राप्ता भवतीयं पाण्डुलिपिः । लेखकः- वैंकटेशः । अपूर्णेयं पाण्डुलिपिः ।

समारम्भ :—

इभ वक्त्रं त्रिणयनं गौरीपुत्रं नमाम्यहम् ।
लम्बोदरं शूर्पकर्णं गणानामीश्वरं वरम् ॥

श्री शैल वेङ्कटाशाना वानम्य शिवकेशवौ ।
बालकानन्दजननीं करोम्यमर पञ्चिकाम् ।।

ओम् । यस्य, ज्ञानदयासिन्धोः, अगाधस्य, अनघाः, गुणाः । सेव्यताम्, अक्षयः, धीराः, सः श्रियै च अमृताय च ।

हे धीराः युष्माभिर्ज्ञानदयासिन्धोरगाधस्य यस्य अनघाः गुणाः सन्ति । अक्षयः गुणाः सन्ति । अक्षयः सः श्रियै च अमृताय च सेव्यताम् ।
"प्रत्येकस्य श्लोकस्य तमिलार्थोऽत्र प्रदत्तोऽस्ति ।

४६ नाम लिङ्गानुशासन–व्याख्या —
ताड़पत्रेषु ११½×१ अंगुलाकारे ३८ पत्रकेषु ग्रन्थलिप्यां वेंकटेश लिखिता-पूर्णा व्याख्या प्राप्यते । ४५ संख्यकपाण्डुलिपिबत्-एवं प्रारम्भादिकं सर्वम् । द्वितीयकाण्डस्य मध्यादेवाग्रे नेषा प्राप्यते ।

४७ नामलिङ्गानुशासनव्याख्या :—
ताड़पत्रेषु १४¼×१⅓ आकारे ६६ पत्रकेषु ग्रन्थलिप्यां प्रथमकाण्डमात्रयुक्ता पाण्डुलिपिरवाप्यते । लेखकस्य नाम वेंकटेशः । तमिललिप्यामपि । अपूर्णा । आरम्भसमाप्ति—समापकादिकं सर्वमपि पूर्ववत् । समापकम् (२४२ पत्रके)

इति श्रीमदात्रेयवेंकटेश्वरभट्टविरचितायाममरपञ्चिकायां सङ्कीण वर्गविवरणम् । शुभमस्तु । द्वितीयतृतीयकाण्डौ ।

४८ नाम लिङ्गानुशासन व्याख्या—
ताड़पत्रोपरि लिखितेय पाण्डुलिपिः । आकारः १६×१¼ । ९७ पत्रकाणि । ग्रन्थलिप्याम् तमिल लिप्याञ्च । लेखको न ज्ञातः । द्वितीयकाण्डमात्रम् । तमिलटिप्पणियुक्तापि चेयं पाण्डुलिपिः ।

४९ नाम लिङ्गानुशासनव्याख्या :—
इयमपरा पाण्डुलिपिरपि ताड़पत्रकेषु १३×१¼ अंगुलाकारे ग्रन्थ–तमिललिप्योः-वर्तते ऽपूर्णा । लेखकश्चापि न ज्ञायते ।

मूलोपरि तमिल टिप्पणि रपि वर्तते ।

५० नाम लिङ्गानुशासन व्याख्या :—
ताड़पत्रेषु १२½×१¼ अगुलाकारे १० पत्रकेषु ग्रन्थलिप्यामपूर्णाऽज्ञातलेखका च पाण्डुलिपिरेषा । मध्यतो न प्राप्यते ।

५१ नाम लिङ्गानुशासन व्याख्या :—
ताड़पत्रेषु १६×१¼ अंगुलाकारे १३७ पत्रेषु तेलुगुः लिप्यां मिलति । लेखको-ऽज्ञातः । परिपूर्णेरिपूयम् ।

तेलुगुः–टिप्पणैरलङ्कृता ।

५२ नाम लिङ्गानुशासन व्याख्या :—

ताड़पत्रेषु १६ × १¼ अगुलाकारे तेलुगु :—लिप्यां अपूर्णेयं पाण्डुलिपिरवाप्यते । लेखको न ज्ञातः तेलुगु टिप्पणैरलङ्कृता ।

५३ नाम लिङ्गानुशासनव्याख्या :—

ताड़पत्रेषु १८ × १½ अगुलाकारे ४० पत्रकेषु तेलुगु :—लिप्याम् मिलति पाण्डुलिपि रेषा । लेखकोऽज्ञातः । तेलुगु टिप्पणैर्युक्ता ।

५४ नाम लिङ्गानुशासन व्याख्या :—

ताड़पत्रकेषु १६ × १¼ अगुलाकारे ३० पत्रकेषु । तेलुगुलिप्यां लेखकोऽज्ञातः । प्रथमकाण्डयुक्ता । अस्यामपि तेलुगु-टिप्पणिरस्ति ।

५५ नाम लिङ्गानुशासन व्याख्या :-

ताड़पत्रेषु १८½ × २½ आकारे ३८७ पत्रेषु—अज्ञातलेखकस्य तेलुगु—लिप्यामज्ञातलेखकस्य द्वितीयकाण्डमात्रम् । तेलुगु टिप्पणैरलङ्कृता ।

५६ नाम लिङ्गानुशासन व्याख्या :—

१७¾ × १½ अगुलाकारे ४० पत्रकेषु तेलुगुलिप्यां द्वितीयकाण्डम् । लेखकोऽज्ञातः । तेलुगुटीकयाऽलंकृता । अपूर्णा ।

५७ नाम लिङ्गानुशासन व्याख्या :—

१६ × १¼ अगुलाकारे ५७ पत्रेषु ताड़पत्रोपरि तेलुगुलिप्यां लेखकः ? परिपूर्णा केवलं तृतीयकाण्डस्य पाण्डुलिपिरवाप्यते । व्याख्या तेलुगुलिप्यामस्ति ।

५८ नाम लिङ्गानुशासन व्याख्या :—

इयं पाण्डुलिपिरपि ताड़पत्रेषु १६ × १½ अंगुलाकारे ३४ पत्रकेषु तेलुगुलिप्यां मिलति । अस्या लेखकोऽपि अज्ञातः । तृतीयकाण्डस्यैव व्याख्या लभ्यते ।

५९ नाम लिङ्गानुशासन व्याख्या :—

ताड़पत्रोपरि १८¼ × १¼ अगुलाकारे ४० पत्रकेषु तेलुगुलिप्यामेव १.३ काण्डं यावत् परमपूर्णा खण्डिता च मिलति । लेखकोऽज्ञातः ।

६० नाम लिङ्गानुशासन व्याख्या :—

ताड़पत्रोपरि १५ × १¼ आकारे १३५ पत्रकेषु ।
तेलुगुलिप्यां १—३ काण्ड यावत् खण्डिता समुपलभ्यते ।

६१ नाम लिङ्गानुशासनटीका बालप्रबोधिका :—

ताड़पत्रेषु १७×१½ आकारे १०९ पत्रेषु तेलुगुलिप्यां अपूर्णा प्रथमकाण्डमात्रा एवोपलभ्यते । अस्या लेजकः तिरुवेङ्कटार्यः ।

आरम्भिकम्—

श्री वेङ्कटेशेन सरोजजाता सेयं सरोजालयलालनीया ।
इतीव नित्य हृदयारविन्दे निवेशिता मां कमलालयाव्यात् ॥

आसीदासेनु नीहार गिरि विख्यात नामवान् ।
बाल्लपाकान्नामाचार्यो वेङ्कटेशवराञ्चितः ॥

ततोऽभवत्तिरुमलगुरुर्गुरु समानधीः ।
भारद्वाजान्वयपयः पारावारकलानिधिः ॥
तस्मादभून्नन्दवरहारि हरिन्मणिः ।
दीक्षितशिवनतिम्माख्यो मुक्ताच्छत्रद्वयाङ्कृतः ॥
तदात्मजन्मा तिरुवेङ्कटाख्यः ।
ऋग्वेदसज्यो विवुधैकवन्द्यः ॥

सोऽहं जनानामति बुद्धिदं प्रिय ।
बालप्रबोधाख्यमिदं करोमि ॥

आलोक्य दीक्षितीयादिटीका बाल प्रबोधिका ।
टीकाममर्रसिंहस्य रचयत्यान्ध्रभाषया ॥

६२ नाम लिङ्गानुशासन टीका बालप्रबोधिका :—

इयं पाण्डुलिपिः—ताड़पत्रेषु १७½×१¼ अंगुलआकारे २०९ पत्रेषु तेलुगु लिप्यां खण्डितप्राया केवलं द्वितीयकाण्डस्यैव टीकारूपा—प्राप्यते ।

अन्यत् सर्वं ६१ सं० पाण्डुलिपिवत् ।

६३ नाम लिङ्गानुशासन टीका बालप्रबोधिका :—

इयमपि ताड़पत्रेषु वर्तते । आकारः १४¼×१½ अंगुलमितः । पत्राणि ३९२ । लिपिस्तेलुगुः । लेखकः तिरुवेङ्कटार्यः । खण्डिता । द्वितीयकाण्डस्यैव ।

अस्याः—अपि सर्वं पूर्ववदेव ।

६४ नाम लिङ्गानुशासन टीका बाल प्रबोधिका :—

ताड़पत्रेषु १७½×१½ अंगुलाकारे तेलुगु लिप्यां खण्डिता ८७ पत्रात्मिका तिरुवेङ्कटार्यस्योपलभ्यते । अन्यत्सर्वं पूर्ववत् ।

६५ नाम लिङ्गानुशासन व्याख्या :—

१०$\frac{1}{4}$×४$\frac{1}{4}$ अगुलाकारे ४१ पत्रेषु देवनागर्यामपूर्णा ऽनामलेखका कर्गजेषु प्राप्यते ।

अस्यारम्भ :—

.........कान्तिर्धैर्यमार्दवमेव चेत्यादयो गुणाः । ज्ञानदयासिन्धोः ज्ञायतेऽनेनेति ज्ञानम्, शास्त्रम् ।" इत्यनेन भवति ।

समाप्ति :—

निधिर्नाशेवधिर्भेदाः पद्मशङ्खादयो निधेः ।
पद्मोऽस्त्रियां महापद्मः शंखो मकरकच्छपौ ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ।
चानेन ।

समापकम्

इति स्वर्ग वर्गः ।

६६ नाम लिङ्गानुशासनव्याख्या :—

कर्गजेषु १०×३$\frac{3}{4}$ आकारे ६८ पत्रकेषु नागर्यां अपूर्णा प्राप्यते । लेखकस्य नाम न ज्ञायते ।

प्रारम्भिकमस्या :-

.........मशयनादि शं सुखं वृणोति शम्बरः । वृत्रवरणे रक्तवर्णः ह्रस्वं न्यङ्कु नाम ।

समाप्ति :—

भरण्यं भरणं मूल्यं निवेशः पण इत्यपि ।
कर्मणि साधुः । कर्मण्या । भरण्या वा विधीयते ।
नय विधश्चाभोज ...... अनेन भवति ।

७२ पत्रके समापकम्—

इति वैश्यवर्गः ।

६७ नाम लिङ्गानुशासन व्याख्या :—

कर्गजोपरि १०×३$\frac{3}{4}$ आकारे ४२ पत्रकेषु देवनागर्यां मिलति । इयमपि खण्डिता । लेखकोऽप्यज्ञातः ।

प्रारम्भिकमित्थम्—

पद्मूमौर्वः । बड़बायां भवो बाड़वः बडबायामनलः ।
बाड़बानलः बड़बाग्निनामानि ।

समाप्तौ चेत्थम्-

भरण्यं भरणं मूल्यं निवेशः पण इत्यपि।

कर्मणि साधुः कर्मण्या। भरण्या वा विधीयते।

नयाविधाभोजः।

समापकम् - (७२ पत्रे)

इति वंश्यवर्गः।

६८ नाम लिङ्गानुशासन व्याख्या :-

कर्गजोपरि १०×४$\frac{1}{4}$ आकारे १८३ पत्रेषु देवनागर्यां खण्डिता पाण्डुलिपि-रेषान्या व्याख्याया मिलति।

लेखको न ज्ञायते।

प्रारम्भिकमत्रानेन प्रकारेण वर्तते-

क्षेमं करोऽरिष्टतातिः शिवतातिः शिवंकटः

सुकृती पुण्यवान् धन्यो..........

अ। पु। क्षेमंकरः।

इ। पृ। अरिष्टतातिः।

इ। पु। शिवतातिः।

अ। पु। शिवंकरः।

हें ४ हीं वरें करणारांची नावें।

न। पु। सुकृती सुकृतं अस्यास्तीति सुकृतिः।

त। पु। पुण्यवान् पुण्यमस्यास्तीति पुण्यवान्।

अ। पु। धन्यः धनं लब्ध्वा धनगणं लब्धे तोपात।

हें ३ हीं पुण्यवताचीं नावें।

समाप्तौ चेदं वर्तते-

दिग्देशकालपूर्वादौ प्रागुदक्प्रत्यगादयः।२३।

इत्यव्ययवर्गः सम्पूर्णः।

व्याख्या-

दक्षिणाहि आहि च दूरे दक्षिणतः उत्तरतः दक्षिणोत्तराभ्यामत सुजित्यादयो बोध्या।

समापकम्-

इत्यव्ययवर्गः।

महाराष्ट्रियभाषायां क्वचित् २ टिप्पणयः सन्ति।

६९ नाम लिङ्गानुशासन व्याख्या :-

कर्गजेषु ११×४ आकारे देवनागर्यां खण्डिता पाण्डुलिपिरेषोपलभ्यते । लेखकोऽपि न ज्ञायते । ४९ पत्राणि सन्ति ।

प्रारम्भिकञ्चैवम्-
यस्य ज्ञान दया सिन्धोः- अगाधस्य+अमृताय च टीका । ज्ञानदयासिन्धोः ज्ञानाचाहि दया दये चाहि ।

समाप्तौ च:-
निष्ठुरम्-परुषम् । कठोर बोल । २ नपुंसक ग्राम्यम् ।
अ......।
समापकम् (३३ पत्रके)
ऐसा बुद्धिवर्गः ।
प्रथमकाण्डस्य महाराष्ट्रिय भाषायां टीका ।

७० नाम लिङ्गानुशासनव्याख्या :-

कर्गजोपरि १०×४½ आकारे ८६ पत्रकेषु देवनागर्यां खण्डिता पाण्डुलिपि रेषावाप्यते । लेखकश्च न ज्ञायते । प्रारम्भिकम् :-

विशेष्यनिघ्नैः+संश्रयाः ।
व्याख्या ।
विशेष्यनिघ्नवर्गं ५ हे पांच वर्ग । कान्तखान्तादिअवान्तरवर्गास आश्रया वा सामान्यकाण्डी आरम्भिजेताहेत ।

समाप्तौ च-
मूल ।
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ।
व्याख्या ।
या प्रकारे अधरादिक् शब्दही जानावे ।२३। एकमस्ति ।

समापकम्-
ऐसाअव्यय वर्गः
अत्रापि महाराष्ट्रिय भाषायां टीका वर्तते ।

७१ नाम लिङ्गानुशासन व्याख्या :-

कर्गजेषु ११×४¼ अंगुलाकारे ७६ पत्रकेषु देवनागरीलिप्यां खण्डिता भानुजि-दीक्षित कृतायाः व्याख्यायापाण्डुलिपिः प्राप्ता भवति ।

अस्या रम्भो निम्नप्रकारेण जायते -

महानुद्यमोऽस्य द्वे दुःसाध्यकृत्येऽपि साधनपरस्य ।३।

प्रवीणो प्रकृष्टा वीणा यस्य । यद्वा । वीणया प्रगायति प्रगीयते वा । सत्यापेति णिजन्तात् पचाद्यच् । कर्मणि घञ्च । एरचि व्यन्तानामितिनाच् । निपुणाति पुणकर्मणि शुभे । इगुपधेतिकः अभिजानाति विजानाति ।

समाप्तिश्चेत्थम्-

तथा ताटङ्कः इत्याचार्य प्रयोगात् ताटङ्कशब्दस्य पुंस्त्वम् । यथा वा कलिका कोरकः पुमानिति-इहोक्तम् । कोरकाणीति माधवप्रयोगान्न पुंसकत्वमपि । यत्तु गोधा पोटा इत्युदाहृतवान् मुकुटस्तन्न । ङ्या बूडन्तमित्युक्तत्वेन शेषत्वा भावात् ।४६।

समापक्रम्-

श्रीः शके १५९१ सौम्यवत्सरे माघकृष्ण १२ चन्द्रे बिदुरग्रामे लिखितमिदम् अम्बाजी श्रोत्रियदवज्ञपण्डितेन स्वार्थं परार्थञ्च ।

तेन श्री लक्ष्मीनारायणः प्रीयताम् ।

७२ नाम लिङ्गानुशासन व्याख्या :-

कर्गजेषु आकारः ११×४¾ पत्राणि १५ देवनागर्यां खण्डिता पाण्डुलिपि रेषा मिलति । न च लेखकनाम ज्ञायते ।

प्रारम्भिकम्-

...कन्ते पश्यन्त्यत्र लोक्यते वा घञ्, लोकः । विष्टपं भुवनञ्च प्रागुक्तम् । विष्टपः पुल्लिङ्गोऽपि । "भुवनं विष्टपः पुमान्" इति बोपालितात् । जगदुक्तमेव । एवमस्तभूत पृथ्वी ।

समाप्तौ चेदं वर्तते-

प्रेति । त्रिफला विशरणे । विशरणं विकासः । ञीतः क्तः । आदितश्चेतोऽभावः । निष्ठातकारस्य अनपसर्गात् "फुल्लक्षीब कृशोल्लाघाः" इति लत्वम् । प्रादिसमासेन प्रफुल्लादित्रयम् । "उत्फुल्ल सफुल्लयोरुपसङ्ख्यानम्" इतिलत्वम् । प्रफुल्लस्तूत्फुल्लसाधनात् पश्चादुपसर्गा......विकसने प्रपूर्वः । पचाद्यचि वा । उपसर्गंप्रतिरूपको वा प्रशब्दः । यथा प्रदत्तमित्यत्र व्यावृत्तोनि...

———

उपयोजितग्रन्थसूची

१. नृसिंहोत्तर तापिन्युपनिषत् ।
२. वाक्यपदीयः ।
३. The Philosophy of grammar
४. पाणिनीयशिक्षा
५. छान्दोग्योपनिषद्
६. एतरेयोपनिषद्
७. तैत्तरेयोपनिषद
८. मुण्डकोपनिषद्
९. प्रपञ्चसारः
१०. सिद्धान्तकौमुदी
११. श्रीमद्भागवतम्
१२. सुरभारती संस्कृत पत्रिका (वा०)
१३. गीता
१४. सूर्योदयः सं. पत्रम् (मा)
१५. रघुवंशम्
१६. रामचरितमानस
१७. निरुक्तम्
१८. सारस्वती सुषमा (त्रै.)
१९. Lectures on Patanjali's Mahabhashya
२०. मीमांसा दर्शनम्
२१. वैशेषिकदर्शनम्
२२. The meaning of meaning G. K. Agdev
२३. महाभाष्यम्
२४. नागरी प्रचारिणी
२५. Out line of linguistic analyses
२६. भाषाविज्ञान कोश. डा. भोलानाथ तिवारी
२७. World book Ensyclopaedia
२८. सामान्यभाषाविज्ञान, डा. बाबूराम सक्सेना
२९. भाषा जो वाँद्रियाज्
३०. दिव्यज्योतिः (स. मा.)
३१. Panini and his place in Sanskrit गोल्डस्टुकर
३२. Phonetics in ancient India डब्ल्यू. एस. एलन, न्यूयार्क
३३. Introduction to the Devnagari script. H. H. Lumburt
३४. दिरेनेसाँ आफ देव नागरी अक्षरज्. प्रेम कृष्ण भट नागर, दिल्ली
३५. हिन्दी शब्दानुशासन, पं० किशोरीदास
३६. एन्साइक्लोपीडिया ब्रेटेनिका खण्ड २
३७. एन. सी. आर. टी. आई. दिल्ली डा. मा. गो. चतुर्वेदः ।
३८. A. History of Sanskrit literature Prof. Mecdonell
३९. A course in Modern Linguistics Charles F. Haket. न्यूयार्क
४०. भाषा विज्ञान सिद्धान्त और प्रयोग, डा. अम्बाप्रसाद सुमन, दिल्ली
४१. Discriptive linguistics एच. ए. ग्लीसन, न्यूयार्क
४२. भारतीय आर्यभाषा और हिन्दी डा. सु. कु. चैटर्जी दिल्ली
४३. भारतीय प्राचीन लिपिमाला गौरीशकर हरिचन्द ओझा
४४. संगोष्ठी अङ्क जनवरी ६९
४५. देवनागरी लिपि और वैज्ञानिकता, नागरी प्रचारिणी पत्रिका, बालकृष्ण अकिंचन ।

२०२७ वि. सं.

४६. हलायुधकोश:
४७. हिन्दी विश्वकोष डा धीरेन्द्र वर्मा
४८. शब्दसाधना
४९ शब्दकल्पद्रु मखण्ड ३
५०. शब्दरत्नावली
५१. भावप्रक श:
५२. सुश्रुत:
५३ महाभारतम्
५४. रामायणम्
५५. जोनस डे गारलैंडिया डिक्शनेरीज्
दे. नेलसन्स एन्साइक्लोपीडिया।
५६. एन्साइक्लोपीडिया ब्रिटानिका, १४ सं.
५७. एन्साइक्लोपीडिक डिक्शनरी
५८. कम्प्रेहैंसिव इंगलिश हिन्दी डिक्शनरी
— डा. रघुवीर. दिल्ली
५९. रीडर्स डायजेस्ट ग्रेट एन्साइक्लोपीडिया ।
६०. एन्साइक्लोपीडिया अमेरिकाना
६१. नेलसन्स एन्साइक्लोपीडिया
६२. एन यू. इंगलिश डिक्शनरी आन हिस्टोरिकल
प्रिंसिपल्स ।
६३. हाट्म्फुस वाकेबुलरीज्
६४. दि वेस्टमिनिस्टर डिक्शनरी ।
६५. वेवर्स्टट्वेंटियथ सेंचरी डिक्शनरी आन हिस्टो-
रीकल प्रिंसिपल्स ख ३
६६. ए डिक्शनरी आव सिलेक्टेड सिनानिम्स इन
दि प्रिंसिपल इण्डो यूरोपियन लैंग्वेजिज
डालिंग बक्
५७. दि इम्पीरियल डिक्शनरी, जौन ओगिल्वी
६८. अमेरिकन डिक्शनरी, नो आहवेंब्टर
६९. इंगलिश सिनानिम्स फ्रैंव
७०. चैम्बर्स एन्साइक्लोपीडिया खं: ४
७१. हिन्दी कोशसाहित्य डा. अचलानन्द जखमोला
७२. डिक्शनरीज अ व्फारेन लैंग्वेजिज —राबर्ट
७३ सस्कृत इंग्लिश डिक्शनरी, मोनियर विलियम्स
७४. हेमकोश:
७५. अमरकोश:
७६. शब्दार्थ चिन्तामणि
७७ कोशकला - डा० रामचन्द्र वर्मा
७८. ए डिक्शनरी आव् न्यूमैथर्डस डा. प लसी वर्ग
७९. काव्यप्रकाश:, भामह
८०. काव्यालंकार: ,,
८१. द इन्टरनेशनल थेसारस पी. एम. राजेट
८२. संस्कृत भाषा में कोश प्रामाण्य
रामशंकर भट्टाचार्य
हिन्दी अनुशीलन फा. २०१० वि. सं.
८३. ऋग्वेद:
८४. यजुर्वेद:
८५ शतपथ ब्राह्मणम्
८६. काव्यादर्श :
८७. काव्यमीमाँसा
८८. काव्यकल्पलता वृति:
८९. देशी नाममाला
९०. निरुक्तम
९१. संस्कृत शास्त्रों का इतिहास
डा. बलदेव उपाध्याय:
९२. वैदिकवाङ्मयका इतिहास
डा. राजवंशसहाय हीरा
९३ संस्कृत साहित्यकोश ,,
९४. सरस्वती अक्टूबर १९६० डा. हेमचन्द्र जोशी
९५. हिन्दुस्तानी अ: १०६० डा वलदेव
९६ H. History of Skt. Literature
डा. मधुकर मंगेशकर
९७ ज्योतिष्मती, स. २०१५ कार्तिक
९८. पदचन्द्रिका
९९. अभिधानचिन्तामणि
१००. संस्कृतव्याकरण शास्त्र का इतिहास
१०१. आयुर्वेद का इतिहास
१०२. A History of Indian Literature
M. Winternitz.

१०३. संस्कृत साहित्यका इतिहास

१०४. वृहद्देवता

१०५. Studies in Indian Literary History/Bombay

१०६ सस्कृत साहित्य का इतिहास, डा. मगलदेव

१०७. पा. सू.

१०८. ज्योतिर्निवन्धावलिः पं० श्री चन्द्रपाण्डेयः

१०९. श्लोकवार्तिक

११०. भोजवृतिः

१११. मनुभाष्य

११२. A descriptive Catalogue of Sanskrit, Manuscripts. T. M. S.S. M. L. Tangore 1930

११३. धन्वन्तरि निघण्टुः

११४. रभसकोशः

११५. दुर्घटवृत्ति, अनन्तग्रन्थ माला

११६. Studies in Indian Literary History, Dr. Gode, Puna 1956

११७. बाराणसीदर्पण प्रकाशः

११८. संस्कृत शब्दार्थ कौत्तुभम्

संस्थानस्य प्रकाशनानि

१, भारतीस्तोत्रम् सटीकम् ।

२. सहस्रशीर्षा सूक्तम् सभाष्यम् ।

३. वेदान्त प्रश्नोत्तर माला :

४, विष्णुस्तोत्रम् सटीकम् ।

५. शान्तिसुख सोपान ।

६. ध्यान साधना ।

७. कोशवाङ्मयस्य सामान्य परिचयः

मुद्रणालयस्थानि

१. गान्धी वचनामृतम् । सं०

२. फलादेशकल्पतरुः । ,,

३. अथर्ववेदस्य दुर्लभखण्डम् ,,

४. झञ्झा (नाटकम्) ,,

५. आप्लवशकटिम् (नाटकम्) ,,

६. सूनृता (काव्यम्) ,,

७. प्रबुद्धभारतम् (सगीतिका) ,,

८. सुधा (संस्कृतगीतानि) ,,

९. पथ्यापथ्य विनिर्णयः (आयुर्वेदस्य)

१०. वैद्यकल्पतरुः ,,

११. कक्षपुटम् (दुर्लभम्)

१२. शिवप्रोक्तं कायाकल्प विज्ञानम् ,,

१३. रसायनतन्त्र विज्ञानम् ,,

१४. वृत्त रत्नावली ,,

१५. वैजयन्ती काव्य (हिं.) ,,

१६. तीन एकांकी (हिं.) ,,

१७. आचार्य जी के पत्र (हिं.) ,,

१८. Education in India during ancient. medieval & Mo[...] periods.

